M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 378

Title: Skanda Purana
Brahmottar Khanda

378

स्कन्द पुराणे ब्रह्मोत्तर खंडः

		Skanda Purāna Brahmo-	Title
		-ttara Khanda	Author
			Editor
			Year, Vols.
			Publisher
378			Remarks

ब्र.सो.
१

॥श्रीगणेशायनमः॥ ॥ज्योतिर्मात्रसदानंदनिर्मलज्ञानमूर्त्तये॥नमःशिवा
यशांतायब्रह्मणेलिंगमूर्त्तये॥१॥ऋषयऊचुः॥ ॥आख्यातंभवतासूतविष्णो
र्माहात्म्यमुत्तमं॥समस्ताघहरंपुण्यंसमासेनश्रुतंचनः॥२॥अन्येषांचैवदेवा
नांश्रुतंविस्तरशःपुनः॥सांगोपांगविधानेनसूताख्यातविशेषतः॥३॥इदा
नींश्रोतुमिच्छामोमहात्म्यंत्रिपुरद्विषः॥तद्भक्तानांचमाहात्म्यंसर्वपापहरं
परं॥४॥तन्मंत्राणांचमहात्म्यंतथैवद्विजसत्तम॥तत्कथायाश्चतद्भक्तेःप्रभाव १
मनुवर्णय॥५॥सूतउवाच॥॥एतावदेवमर्त्यानांपरंश्रेयसनातनं॥यदीश्व
रकथायांवोजाताभक्तिरहैतुकी॥६॥अतस्तद्भक्तिलेशस्यमहात्म्यंवर्ण्यते

मया॥अविकल्पायुषानालंवक्तुंविस्तरतस्ततः॥७॥सर्वेषामपिपुण्यानांसर्वेषां
श्रेयसामपि॥सर्वेषामपियज्ञानांजपयज्ञःपरःस्मृतः॥८॥तत्रादौजपयज्ञस्यपरं
स्वस्त्ययनंमहत्॥शैवंषडक्षरंदिव्यंमंत्रमाहुर्महर्षयः॥९॥देवानांपरमोदेवो
यथावैत्रिपुरांतकः॥मंत्राणांपरमोमंत्रस्तथावैषडक्षरः॥१०॥एषपंचाक्षरो
मंत्रजप्तॄणांमुक्तिदायकः॥संसेव्यतेमुनिश्रेष्ठैरशेषैःसिद्धिकांक्षिभिः॥११॥अस्यै
काक्षरमहात्म्यंनालंवक्तुंचतुर्मुखः॥श्रुतयोयत्रसिद्धांतगाथाःपरमनिर्वृताः॥
१२॥सर्वज्ञःपरिपूर्णश्चसच्चिदानंदलक्षणः॥सशिवोयत्ररमतेशैवेपंचाक्षरेशुभे
॥१३॥एतेनमंत्रराजेनसर्वोपनिषदात्मना॥लेभिरेमुनयःसर्वेपरब्रह्मनिरामयं
॥१४॥नमस्कारेणजीवत्वंशिवेत्रपरमात्मनि॥जपत्यैकांतगोमंत्रःपरब्रह्ममयोह्य

ब्रह्मो॰
२

सो॥१५॥भवपाशनिबद्धानांदेहिनांहितमिच्छया॥प्राहोंनमःशिवायेतिमंत्रमाद्यं
शिवःस्वयं॥१६॥किंतस्यबहुभिर्मंत्रैःकिंतीर्थैःकिंतपोध्वरैः॥सर्वज्ञानविहिनस्यैसो
यंशैवषडक्षरः॥१७॥कैवल्यमार्गदीपोयमविद्यासिंधुवाडवः॥महापातकदावा
ग्निःसोयंमंत्रषडक्षरः॥१८॥तस्मात्सर्वप्रदोमंत्रःसोयंपंचाक्षरःस्मृतः॥स्त्रीभिःशू
द्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः॥१९॥नास्यदीक्षानहोमश्चनसंस्कारोनतर्पणं॥
नकालनियमश्चात्रजप्यसर्वमयोमंत्रः॥२०॥उपदिष्टसद्गुरुणाजप्यःक्षेत्रेच २
पावने॥सद्योपथैसितंसिद्धिंददातीतिकिमद्भुतं॥२१॥अतःसद्गुरुमाश्रित्यग्रा
ह्योयंमंत्रनायकः॥पुण्यक्षेत्रेषुजप्तव्यःसद्यःसिद्धिंप्रयच्छति॥२२॥गुरवोनिय
माःशांताःसाधवोमितभाषिणः॥कामक्रोधविनिर्मुक्ताःसदाचाराजितेंद्रियाः॥

॥२३॥एतैःकारुण्यतेमंत्रोदत्तोक्षिप्रंहिसिध्यति॥क्षेत्राणिजपयोग्यानिसमासात्क
थयाम्यहं॥२४॥प्रयागंपुष्करंरम्यंकेदारंसेतुबंधनं॥गोकर्णंनैमिषारण्यंसद्यःसि
द्धिकरंनृणां॥२५॥वाराणसीमहाक्षेत्रंउत्तरस्यांविशेषतः॥धर्मारण्यंदंडकंच
गोदातीरंचत्र्यंबके॥२६॥तत्रानुवर्ण्यतेसद्भिरितिहासंपुरातनं॥असकृद्वासत
द्वापिशृण्वतांमंगलप्रदं॥२७॥मथुरायांयदुश्रेष्ठोदाशार्हइतिविश्रुतः॥बभू
वराजामतिमान्महोत्साहोमहाबलः॥२८॥शास्त्रज्ञोबलवान्शूरोधैर्यवानप्र
मितद्युतिः॥अधृष्यश्चसुगंभीरःसंग्रामेष्वनिवर्त्तकः॥२९॥महारथोमहेष्वासो
नानाशास्त्रार्थकोविदः॥विद्वज्जनसखानित्यंप्रजापालनतत्परः॥३०॥परद्रव्य
परदारापाषाणजननीसमः॥वदान्योरूपसंपन्नोयुवालक्षणसंयुतः॥३१॥ध

श्लो॰ ३ नुर्वेदे सुकुशलो विख्यातो धरणीतले ॥ तत्रांतरे कृतं तेन काशिराजेन धीमता ॥३१
स्वयंवरमुखेनैव दाशार्हो गुणवानिति ॥ स कन्यां दापयामास दाशार्हाय स्वलंकृतां
॥३२॥ पारिबर्हं ददौ सम्यक् दासीनां शतमेव च ॥ गजानां त्रिशतं प्रादाद् अश्वानां च त्रि
षट्शतं ॥३३॥ पंचाशच्छिबिकां प्रादाद् अमरत्नविभूषितां ॥ वस्त्राणि च महार्हाणि
यामातुः प्रभृतिस्ततः ॥३४॥ कलावतीं स्वतनयां भूषणैरिति पूज्य च ॥ रथमारोप
यामास स्वजनैः परिवेष्टितः ॥३५॥ कांतां कलावतीं नाम रूपश्रीजगुणैर्युतां ॥ पंचाश
त्मतीश्रेष्ठं विश्वनाथार्चने रतां ॥३६॥ तया समं शुशुभे राजा चंद्रकांत्या यथा शशी ॥३७ ३
आपृच्छ्य सर्वान्प्रययौ दाशार्हः स्वपुरं प्रति ॥३८॥ चतुरंगसमायुक्तो गीतवादित्रनि
स्वनैः ॥ धनं प्रादाद्द्विजादिभ्यो यथाविभवयोगतः ॥३९॥ कृतोद्वाहः स राजेंद्रः संप्राप्य निज

मंदिरं ॥ बंदिभिः स्तूयमानस्तु प्रजाभिश्चानुमोदितः ॥४०॥ मातावृद्धौ पितौ सम्यक्
कृतगोत्रजपूजनं ॥ प्रणम्य वृद्धान्विधिवत्सुखेन निजसद्मनि ॥४१॥ दिनैः कतिप
यैरेव कामासक्तोऽभवन्नृपः ॥ रात्रौ तां शयनारूढः संगमाय समाह्वयत् ॥४२॥ सा
स्वभर्त्रा समाहूता बहुशः प्रार्थिता सती ॥ न बबंध मनस्तस्मिन्नो वा गच्छन्नदंति
कं ॥४३॥ संगमाय समाहूता नागता निजवल्लभा ॥ बलाद् दाहर्तुकामस्तामुद
तिष्ठन्महीपतिः ॥४४॥ एकांतं शयनं प्राप्य विलोक्य विजनं ततः ॥ तमापतंतं सह
सान्नृपतिं प्राह भामिनी ॥४५॥ राज्ञ्युवाच ॥ मा मा स्पृश महाभाग कारणाद्व्रते
स्थितां ॥ धर्माधर्मौ विजानासि मद्वचः शृणु तां प्रिय ॥४६॥ कृचित्प्रियेण भुक्तं यद्रो
चते न मनीषिणां ॥ दंपत्योः प्रीतियोगेन संगमः प्रीतिवर्द्धनः ॥४७॥ प्रियं यदा मे

ब्रसो॰ ४

भासेततद्रासंगोस्तुतेमयि॥काप्रीतिःकिंसुखंपुंसांबलाद्भोगेनयोषितां॥४८॥अ
प्रियांरोगिणींनारीमंतवर्त्रीधृतरहतां॥रजस्वलामकामांचनाक्रमेतबलात्तुमान्
॥४९॥प्रीणनंलालनंयोषांरंजनंमर्दवंदय॥युवतौकुसुमेचैववविधेयंसुखमिच्छ
ता॥५०॥इत्युक्तोपितयासाध्व्यासराजास्मरविह्वलः॥कामांधानैवपश्यंतिधर्मा
धर्मौविचारतः॥५१॥स्वकीयंपरकीयांवाश्रीक्षुद्रपरायणाः॥गतंज्ञानंगताः
बुद्धिविवेकोदूरतोगतः॥५२॥बलद्राकृष्यतांहस्तेपरीरेभेतिरंहसा॥तांस्पृष्टमानां
सहसातप्तायःपिंडसन्निभां॥५३॥निर्दहंतीमिवात्मानंतत्याजभयविह्वलः॥अहो ४
सुमहदाश्चर्यमिदंदृष्टंतवप्रिये॥५४॥कथमग्निसमंजातंवपुर्गेहत्वकोमलं॥इत्थं
सुविस्मितंस्मितंराजानंराजवल्लभा॥५५॥प्रत्युवाचप्रहस्यैनंविनयेनशुचिस्मिता

॥कलावत्युवाच॥॥राजन्ममपुरावाल्येदुर्वासामुनिपुंगवः॥५६॥शैवींपंचाक्ष
रींविद्यांकारुण्येनोपदिष्टवान्॥चातुर्मास्येस्थितस्तत्रमुनिर्मत्पितृसद्मनि॥५७॥
रहस्यंपरमंज्ञात्वोरुव्वाचपितरंप्रति॥तस्मैवाहंसमायाताप्रणतामुनिपादयोः॥
५८॥उक्तंगेस्यापितातेनदर्शनंज्ञात्वाकुमारिकां॥एकस्मिन्दिवसेतस्यकृपाजा
तामममोपरि॥५९॥एहिपुत्रिप्रसन्नोस्मिदद्मितुभ्यंशुभंमनुं॥यत्प्रभावाद्भवाब्धे शि॰पं॰मं॰२
स्पारंगच्छतिधारकः॥६०॥तेनमंत्रानुभावेनममांगंकलुषोज्झितं॥स्पृष्टुंनशक्य
क्यतेपुंभिःसपापैर्मंत्रवर्जितैः॥६१॥त्वयाराजप्रकृतिनाकुलटागुणिकादयः॥
मदिरास्वादनिरतानिषेव्यंतेस्त्रियःसदा॥६२॥नस्नानंक्रियतेनित्यंनमंत्रोजप्यते
शुचिः॥नाराध्यतेत्वयाज्ञोभुःकथंमांस्प्रष्टुमर्हसि॥६३॥॥दशार्हउवाच॥॥तामममा

ब्रह्मो॰ ५

रक्षा हि सुश्रोणि त्वं देवी पंचाक्षरीं शुभां ॥ विद्यां विध्वस्तपापोहं त्वदीछामि रतिं प्रिये ॥६४
यत्प्रसादात्त्वदीयं गतप्रायः पिंडवद्भुतं ॥ संयोगोप्रियतां याति चंदनेन समं मम
॥६५॥ ॥राजभार्योवाच॥ ॥नाहं तवोपदेशं हि कुर्यां मम गुरुर्भवान् ॥ अन्यस्मैश्रा
रणं याहि यस्त्वां विद्यां प्रयच्छति ॥६६॥ ॥राजोवाच॥ ॥नाहं जानामि सुश्रोणि गुरुं दे
वं च किंचन ॥ विषयेन गतं जन्म न कृता संगतिस्सतां ॥६७॥ तस्मात्त्वमेव वामोरु
न च मां गुरुसन्निधौ ॥६८॥ ॥सूत उवाच॥ ॥श्रुत्वैवं वचनं तस्याः संतप्तहृदयस्य
च ॥ पतिस्तस्याः पुरस्तत्र सोवाच वचनं प्रियं ॥६९॥ मा भैः राजन्गमिष्यावो गर्गस्य
चाश्रमं प्रति ॥ युष्मत्कुलगुरू राजन्विद्यायां व्यसनी सदा ॥७०॥ तपस्वी परमोदा
रः कृपापात्रं जितेंद्रियः ॥ यस्य तपःप्रभावेन कानने सर्वजंतवः ॥७१॥ चरंति त्य ५

क्त वैराणि सिंहाद्या मृगपक्षिणः ॥ इति संभाष्यमाणौ तौ दंपती रथमास्थितौ ॥७२॥
शकुनैस्सुशुभैर्युक्तौ परिमेयपुरःसरौ ॥ पश्यंतौ मार्गमध्ये हि कौतुकानि पत
त्रिणां ॥७३॥ उपायनानि सर्वेषां गृह्णंतौ पुरवासिनां ॥ आश्रमं प्रापतुस्तस्य संध्या
यां दंपती मुदा ॥७४॥ मृगैर्गयूथैः समाकीर्णं पुष्पवाटीविराजितं ॥ मत्तभ्रम
रसंघुष्टं कोकिलाराव संकुलं ॥७५॥ वेदघोषेण विप्राणां समाक्रांतं तस्मिन्वृक्षस्थितं ॥
अवारोप्य रथात्कांतां रथं स्थाप्य बहिस्ततः ॥७६॥ विवेशाप्रियया सार्धं राजा गा
र्गस्य मंदिरं ॥ दूरतो मुनिशार्दूलं संध्यावंदनतत्परं ॥७७॥ अन्वासितं महाछात्रैर्ने
त्रैः शास्त्रिनं यथा ॥ प्राप्य तच्चरणौ साध्व्या ववंदे संकृतांजलिः ॥७८॥ पादयोः
पतितौ ज्ञात्वा आशीर्भिश्चाभिनंद्य च ॥ पप्रच्छ कुशलं राज्ये राजानं मुनिसत्तम ॥७९॥

श्री से
६

॥ ॥ राजोवाच ॥ ॥ कृतार्थं मां कुरु गुरो समापं करुणार्द्रधीः ॥ शैवीं पंचाक्षरीं विद्यामु
पदेष्टुं त्वमर्हसि ॥ ६० ॥ अज्ञानाद्वा तथाज्ञानाद्यत्कृतं राजकर्मणि ॥ तत्पापं येन नश्य
द्वेतं तं मंत्रं देहि मे प्रभो ॥ ६१ ॥ एवमभ्यर्थितो राज्ञा तथा पत्न्या विशेषतः ॥ प्रस
न्नवदनस्तत्र गर्गो ब्राह्मणपुंगवः ॥ ६२ ॥ तौ निनाय महापुण्यं कालिंद्यास्तटमु
त्तमं ॥ तत्र पुण्यतरोर्मूले निषण्णः स गुरुः स्वयं ॥ ६३ ॥ पुण्यतीर्थजले स्नातं राजा
नं समुपोषितं ॥ प्राङ्मुखं चोपवेश्याथ ध्यात्वा शिवपदांबुजं ॥ ६४ ॥ तन्मस्तके
करं न्यस्य ददौ मंत्रं शिवात्मकं ॥ तन्मंत्रधारणादेव तद्गुरोर्हस्तसंगमात् ॥ ६५ ॥ ६
निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ॥ ते दग्धाः पक्षाः क्रोशंतः पतंति स्म
महीतले ॥ ६६ ॥ भस्मीभवंतः सर्वे ते दृश्यंते स्म सहस्रशः ॥ दृष्ट्वा तद्वायसकुलं

दह्यमानं सुविस्मितौ ॥ ६७ ॥ राजा च राजमहिषी तं गुरुं पर्यपृच्छतः ॥ भगवन्निद
माश्चर्यं कथं जातं शरीरतः ॥ ६८ ॥ वायसानां कुलं जातं पंचाक्षरप्रभावतः ॥ वा
यसाः के शरीरेस्मिन्निवसंति सितेतराः ॥ ६९ ॥ कुतः स्थिताः स्वस्य देहे पात्रम
ध्ये त्वभण्यतां ॥ ७० ॥ ॥ गर्ग उवाच ॥ ॥ राजन् भवसहस्रेषु यानि पुण्यानि संति
वै ॥ तेषामाधिक्यतः क्वापि जायते पुण्ययोनिषु ॥ ७१ ॥ तथा पापीयसी योनिं
तथा पापेन गच्छति ॥ मानुषत्वं गतोसि त्वं भवेस्मिन् पापपुण्ययोः ॥ ७२ ॥ शैवीं पं
चाक्षरीं विद्यां यदा ते हृदयं गता ॥ अघानां कोटयस्त्वत्तः काकरूपेण निर्गताः ॥
७३ ॥ कोटयो ब्रह्महत्यानामगम्यागम्यकोटयः ॥ भवकोटिसहस्रेषु ये न्ये पात
कराशयः ॥ ७४ ॥ क्षणाद्भस्मीभवंत्येते शैवे पंचाक्षरे धृते ॥ आसां स्त्वद्वायद्वरा

ब्र·स्तो· जैर्दग्धाः पातककोटयः ॥ ९५ ॥ अनाया सह पूतात्मा भार्यया गुणपूर्णया ॥ भा
७ ग्येन प्राप्स्यसे देव्या विहरस्व यथासुखं ॥ ९६ ॥ राजोवाच ॥ संशयं छिंधि मे तात
यन्मे मनसि वर्त्तते ॥ उपकारः कृतो मह्यं कांतया किं निबंधनं ॥ ९७ ॥ कासा पूर्वभ
वे कांता कोऽहं मत्र समागमः ॥ केन पुण्यप्रभावेन चोपकारः कृतस्त्रिया ॥ ९८ ॥
गर्ग उवाच ॥ शृणु राजन्प्रवक्ष्यामि संक्षेपाद्युवयोः स्थितिं ॥ क्षणानुबंधाद्राः
जेंद्र द्वयोः संगः प्रवर्त्तते ॥ ९९ ॥ शुभे शुभं सदा ज्ञेयं पापे पापं विनिर्दिशेत् ॥ त्रेतां
ते त्वम योध्यायां जातो भद्रधनिनां कुले ॥ १०० ॥ वसुप्रिय इति ख्यातो नाम्ना त्वं तत्र
जन्मनि ॥ व्यापारैर्धनमन्विच्छन्स्थितः पोते महार्णवे ॥ १ ॥ क्रयवस्तूनि सर्वाणि
पोते संस्थाप्य यत्नतः ॥ समारोहणवेलायां सार्थश्चैकः समागतः ॥ २ ॥ क्षीरोदस्य प ७

रे पारे मुक्तेश्वर समीपतः ॥ गंतुकामो दर्शनार्थं माघमासे विशेषतः ॥ ३ ॥ तस्मि
न्पोते स्थिताः सर्वे शिवदर्शनलालसाः ॥ पूर्वजन्मनि तत्कांर्या जाता क्षत्रियस
कुले ॥ ४ ॥ तस्याः शिवे परा [illegible] भक्तिः सापि पोते समास्थिता ॥ सागरस्य परे तीरे
किंचित्शेषे तदानघ ॥ ५ ॥ विघ्नो बभूव तत्रैव योजनार्द्धे स्थिते सति ॥ आकाशे
भ्रमतात्यर्कं कबंधं दंतिनस्तदा ॥ ६ ॥ पक्षिणा नलराजेन युध्यता सह शत्रुणा ॥
सागरे पतितं दृष्टं ग्राहाभ्यां पोतसंनिधौ ॥ ७ ॥ उत्पतंतौ तदा ग्राहौ हेयुद्ध धातेप
रस्परं ॥ क्रोधसंरब्धगात्रौ तौ मांसा[illegible]र्थं गजवर्ष्मणः ॥ ८ ॥ महानपि समुद्रे सौ चुः
क्षुभे त्युर्मिभिस्तदा ॥ नावं संप्लावयामास ग्राहं गघर्षितां मुहुः ॥ ९ ॥ तत्रस्था ये जः
नाः सर्वे भग्ने पोते सुविह्वलाः ॥ पारं यातुं मतिं चक्रुः स्वहस्तैस्तरणेन च ॥ १० ॥ के

श्री·स्तो·
८

श्चित्तुता परं पारं स्वहस्तबलवेगतः॥ गृहीतपोतकाष्ठाश्च केचित्पारं गता जनाः॥
॥११॥ तत्र त्वं हस्तमुत्क्षिप्य पारं गंतुं यदा स्थितः॥ क्षत्रियस्य तदा कन्या जलेमग्ना
प्रवेपिता॥१२॥ हाहा शिव शिवेत्याहक्रंदंती विकलं मुहुः॥ तदा त्वया गृहीता सा
करिमालंब्य संस्थिता॥१३॥ पारं नीता समुद्रस्य रक्षिता मरणात्त्वया॥ गते पोते ग
तद्रव्यमेकाकी संस्थितो भवान्॥१४॥ समुद्रस्य परे पारे द्वितीया क्षत्रियात्मजा॥
द्वावपि तत्र संप्राप्तै मुक्तेश्वरसमीपतः॥१५॥ पूजां कृता यथा द्रव्यं वैराग्यं च समा
श्रितौ॥ तपस्यं तेच मां तत्र योगधारणया तदा॥१६॥ सहस्त्रारे समास्थाय प्राणा॥ ८
ध्यानपरायणं॥ हष्टवंतौ जिनाहारं युवां धर्मपरौ दृढं॥१७॥ प्रणामं च कृतुस्तत्र
योगादुपरते मयि॥ कालोद्भवानि पत्राणि पुष्पाणि च फलानि च॥१८॥ कंदमूलानि

चानीय दद्तुर्मह्यमादरात्॥ एवं वर्षाणि सप्तैव कृतं मत्सेवनादिकं॥१९॥ युवाभ्यां सु
पवित्राभ्यां प्रसन्नोहं तदाभवत्॥ मदाशीर्वचनात्त्वं हि काशिराजसुताभवत्॥२०॥
मथुरायामयं जातो दाशार्हइति विश्रुतः॥ सागरादुद्धृता सेयं त्वया जन्मनि पूर्वजे
॥२१॥ तस्मात्त्वमिह संप्राप्ता समुद्धर्तुं भवार्णवात्॥ पूर्वपुण्यविपाकेन नरौ वौ पंचा
क्षरीपरा॥२२॥ मया दत्ता विनिश्चित्य पूर्वसेवानुसारतः॥ यत्पृष्टोहं त्वया राजन्त
त्तैसर्वं निवेदितं॥२३॥ किमन्यच्छ्रोतुमिच्छामि तत्तुभ्यं वर्णयाम्यहं॥२४॥ ॥राजोवा
श्री च॥॥ इदं सम्यक् श्रुतं गर्ग तवैव वदनांबुजात्॥ निर्गतं चामृतमयं सर्वसंदेह
नाशनं॥२५॥ प्रष्टव्यमेकं विभोः प्रश्नं प्रीतिमानस्मि वेदह॥२६॥ कानि कानि च पाप
नि कृतानि पूर्वजन्मनि॥ यानि पापस्वरूपेण निर्गतानि शरीरतः॥२७॥ त्वत्प्रसाद

ब्र॰स्तो॰ त्रविद्यायाःसामर्थ्येनविशेषतः॥ सर्वपापविनिर्मुक्तःस्थितोस्मितवसन्निधौ॥१८॥
९ ऋषिरुवाच॥ ॥पापानांगणनानास्तित्वदीयानांनरोत्तम॥ बहूनीतेव्यतीतानि
जन्मानिपापकर्मणः॥१९॥ तान्यहंवेदसर्वाणित्वंवेत्सिनकदाचन॥ एकज
न्मकृतंपापंवदामिश्रृणुसांप्रतं॥२०॥ यस्यश्रवणमात्रेणपुनर्नैवंकरिष्यसि॥
दक्षिणस्यांप्रभुभेदेशेस्थितबंधसमीपतः॥२१॥ तन्नेनापट्टीसंज्ञासानगरीसज
नाश्रिता॥ तत्रधर्मध्वजोनामराजाराज्यंतदाकरोत्॥२२॥ तत्रत्वंद्विजवर्यस्यपु
त्रतांगतवानसि॥ जातेनभक्षितामातात्वयामूलर्क्षेजन्मना॥२३॥ षण्मासिकोय ९
दाजातस्तदातातोऽहिनाहतः॥ पितृस्वसासमायोताप्रजाहिनासमृद्धिभाक्॥२४॥
तयासैपालितःपुत्रोनाम्नामूलविशोधनः॥ पंचाब्दिकोयदाजातस्तदासापिदि

वंगता॥२५॥ तत्पतिःसंस्थितोवृद्धोधनाढ्योबहुलोभवान्॥ कृतोपवीतः पंचाब्दः
ध्या पितुर्योजितस्तदा॥२६॥ उद्वाहितोद्वादशेसौवृद्धेनसुखमिच्छता॥ सयौवनेयदा
सातसुतोमूलविशोधनः॥२७॥ वृद्धस्यगरलंदत्वाद्रव्यार्थंनिशिसद्मनि॥ देहस्यत
त्राःकृत्वाखंडानिखड्गपाणिना॥२८॥ वस्त्रेनिक्षिप्यबध्वाचकूपेरात्रौनिचिक्षिप
त॥ प्रातरुत्थंगतोवृद्धोवाराणस्यांसमागमात्॥२९॥ स्वीयत्नीकृत्यवृद्धस्यधनंधा
न्यंतथागृहं॥ भार्ययासहदुष्टात्माविषयादरलालसः॥३०॥ परदाररतोनित्यंय
क्त्वाभार्यामनिंदितां॥ वेश्यापाशंचकारासौतयासंमोहितोभ्रमत्॥३१॥ द्यूतकार्यं
चकारोच्चैःसुरापानंतयासह॥ एकपात्रेतथामांसंवेश्याहस्तेनभुज्यते॥३२॥ ए
वंबहुतिथेकालेद्रव्यंचक्षीणतांगतं॥ भार्यागतापितुर्गेहेएकएवगृहेस्थितः॥

ब्र.ला. क्रीतं गृहं मद्यपेन ततोपि विषयादसौ ॥ एकस्मिन्दिवसे रात्रौ गतो गुरुनिकेतनं ॥४
१० रात्रौ धृता गुरुसुता दोहनार्थं गता तदा ॥ भुक्त्वा बलात्तां खड्गेन हत्वा तद्देहतः पुनः ॥
४५ ॥ भूषणानि च वस्त्राणि संगृह्य निर्ययौ गृहात् ॥ वेश्यायै वसनं दत्तं भूषणं
द्यूतकारिणे ॥४६॥ मद्यार्थं च स्थितं किंचिन्मांसार्थं च विशेषतः ॥ विचार्येति निर्गतो
रात्रौ चौरवत्पत्तने पुनः ॥४७॥ मार्गे निलीय चैकत्र विकोशं खड्गमावहन् ॥ च
तुर्थे यामे गतानाथस्य भूत्वा ब्राह्मणसत्तमः ॥४८॥ यजमानगृहे सम्यक्तस्य पुत्रो गृह १०
मागतः ॥ यदा याति तदा दैवाद्बालकः पंचहायनः ॥४९॥ शौचार्थं संस्थितः पश्चा
त्पितादूरतः स्थितः ॥ तदाहं तु समायातः पुत्रं मूलविशोधनः ॥५०॥ मुखं बध्वा
च वस्त्रेण बालकस्य सुवैगतः ॥ स्कंधमारोप्य चैकांते नगराद्बहिरागतः ॥५१॥

हत्वा तं च गृहीत्वा च तन्मांसाभरणानि च ॥ वेश्यागेहे समानीय भोगं चकृतवान्नि
शि ॥५२॥ पुनर्द्रव्यं गतं नाशं व्यसनं न गतं तदा ॥ जैपुनर्विचारयामास यामे भा
र्या पितुर्गृहे ॥५३॥ वेषं कृत्वा विशेषेण श्वशुरस्य गृहं गतः ॥ स्थित्वा वै कैतिचिन्मास
न् भुक्त्वा भोगान्यथेप्सितान् ॥५४॥ भार्यां गृहीत्वा चैकाकी वने यातो हि दुर्गमे
॥ तत्र कांता हि पिपासार्त्ता च नीरं कांत वर्त्तते ॥५५॥ तत्रैवावांगमिष्यावो जलं पी
त्वाध्वनि पुनः ॥ निर्जलं कूपमत्रैव दृष्ट्वा दुष्टेन वै तदा ॥५६॥ आदावादाय सर्वस्वं
तत्समीपाद्द्विजः सुतः ॥ अंधकूपे हि निक्षिप्ता वस्त्रभूषणलोभतः ॥५७॥ पुनस्तत्रै
व दुष्टात्मा वेश्यानिकटमागतः ॥ अंधकूपस्य मध्ये हि द्वारं दृष्टं हिरण्मयं ॥५८॥
कपाटपिहितं तच्च हस्तेनोद्घाटितं तया ॥ तद्धस्ते दोरको कश्चित्त्रिवद्वत विनिर्मितः

प्रदो॰ ॥५९॥ तत्प्रभावाद्धितद्वारंविकपाटमभूत्तदा॥ तद्वारेणप्रविष्टासाभीताब्राह्मण
११ योषिता॥६०॥ अग्रेगतातदाद्राक्षीच्छिवमंदिरमुत्तमं॥ तत्रशिवाशिवश्चोभौक्रीडं-
तौचक्षितःशुभौ॥६१॥ नानामपादौपार्वत्याःशंभोश्चैवमहात्मनः॥ दोरकस्यप्र-
भावेनताभ्यांदत्तोवरःशुभः॥६२॥ किमिछसिक्वगंतासिकात्वंकुतःसमागता
॥ब्रूहिसत्यंमहीयासिसेवकीशुभलक्षणे॥६३॥ तयोक्तंश्रूयतांनाथत्वत्सेका
भत्रासिमागता॥ पुनर्यामिपितुर्गेहंचातेमुक्तिंत्वदंतिकी॥६४॥ भक्तिस्त्वयिसर-
दाभूयाज्जन्मजन्मनिमेशिव॥ एवमस्त्वितिशर्वेणधनुरादायबाणयुक्॥६५॥ ११
बाणोपरिनिवेश्यैनांनिनायपितुरंतिकं॥ शिवबाणस्थितासापिबाणगानाम
तोभवत्॥६६॥ भक्तिंकृत्वामहेशानेवैचांतेशिवपुरंगता॥ सोपिदुष्टोदुराचारोवे-

श्यासंगमलालसः॥६७॥ एकस्मिन्दिवसेवेश्यापादुष्टानेयेंद्दहौरतिं॥ तदाखड्गेन
तांहत्वादग्ध्वागृध्वातन्मंदिरंनिशी॥६८॥ पंचधेनुसमायुक्तंपंचवत्ससमन्वितं॥ सा-
रिकाकीरसंयुक्तंदासीदाससमाकुलं॥६९॥ तद्गेहेज्वलितेरात्रौजज्वालजननगरं
तदा॥ चतुर्वर्णसमायुक्तंचतुराश्रमसंकुलं॥७०॥ तदादैववशाद्दग्ध्वैवायुनासंग-
तिःकृता॥ आयुर्बलाद्धिनिर्यातानगरान्नागराजनाः॥७१॥ सोपितत्रैवदग्धोभूत्त-
त्रांधकारमत्रैवै॥ एवंपापानिराजेंद्रकृतानिपूर्वजन्मनि॥७२॥ पुण्यानिकृतवा-
न्येवतत्फलात्मानुषीतनुः॥ एवमाकर्ण्यराजावैवेपमानःपुनःपुनः॥७३॥ प्र-
पातपादयोस्तस्यगर्गस्यक्षतपातकः॥ पुनःसंपूज्यगर्गंतौदंपतीसुदुर्मान-
सौ॥७४॥ गुरुवर्यंसमास्थायमुदितौरथमाश्रितौ॥ वाराणस्यांगतौगर्गोस्ना-

ब्र.सो. १२ नार्थे देवस्वर्धुनि ॥७५॥ विश्वनाथस्य पूजार्थं माघ्यां चैव विशेषतः ॥ तथ्यां सहस
मायातो वाराणस्यां महामुनिः ॥७६॥ संपूज्य शंकरं तत्र त्रिवारं त्रिपुरांतकं ॥ पु
नः स्वनगरं प्राप्तो गर्गस्तत्रैव संस्थितः ॥७७॥ मथुरायां समायातो दाशार्हो भार्यया स
सह ॥ विवेश भवने राजा प्रकृत्या संस्तुतास्तदा ॥७८॥ ततः स्वभवनं प्राप्य द्विजद्रु
र्नाम यैः ॥ राजा हृष्टं समाश्लिष्य पत्नीं चंदनशीतलां ॥७९॥ संतोषं परमं लेभे मेनिः
स्वः प्राप्य यथा धनं ॥८०॥ अशेषवेदोपनिषत्पुराणशास्त्रा वतं यमधांतका सो० १२
री ॥ पंचाक्षरस्यैव महानुभावो मया समासात्कथितो मुनींद्राः ॥८१॥ पंचाक्षरो हि
शूद्राणां भुक्तिमुक्तिफलप्रदः ॥८२॥ षडक्षरस्तु विप्राणां चतुर्वर्गफलप्रदः ॥ प्रण
वेन विना शूद्रैर्जप्तव्योयं सदा मनुः ॥८३॥ नमः शिवाय इत्येवं द्विजैस्तु प्रणवेन

युक् ॥ अत्यक्षरं हि मंत्रस्य फलं वक्तुं न शक्नुयां ॥८४॥ तथाप्यहं प्रवक्ष्यामि श्रूय
तामादरेण तत् ॥ समुद्रवलयां भूमिं ब्राह्मणाय शुभे स्थले ॥८५॥ वाराणस्यां
विशेषेण ग्रहणे सूर्यचंद्रयोः ॥ ददाति विधिवद्यो वै भावशुद्धेन चेतसा ॥८६॥
सकृदुच्चारमात्रेण मंत्रेणानेन तद्भवेत् ॥८७॥ ॥इति श्रीस्कंदपुराणे बृहत्ब्र
ह्मोत्तरखंडे शिवपंचाक्षरप्रभावनिरूपणो नाम प्रथमोऽध्यायः ॥१॥ ॥ऋषय
ऊचुः ॥ ॥सूत सूत महाभाग शिवपंचाक्षरी शुभा ॥ ईदृक्विध प्रभावा च महा
फलप्रदा नृणां ॥१॥ पूजनं शंकरस्यैव कीदृक्फलविधायकं ॥ तत्समासेन न
स्तु तत्समाख्याहि दयार्द्रधीः ॥२॥ सूत उवाच ॥ श्रूयतामृषयः सर्वे माहात्म्यं त्रिपु
रद्विषः ॥ श्रुतमात्रेण येनाशु छिद्यंते सर्वसंशयाः ॥३॥ अतः परतरं किंचिन्ना

ब्र॰ प्रे॰

स्तिपापविशोधनं॥ सर्वानंदकरं श्रीमत्सर्वकामार्थसाधनं॥४॥ दीर्घायुर्विजयारो
ग्यं भुक्तिमुक्तिफलप्रदं॥ यदाद्यनन्यभावेन महेशाराधनं परं॥५॥ आर्द्राणाम
पि शुष्काणामल्पानां महतामपि॥ एतदेव विनिर्दिष्टं सर्वाघानां विशोधनं॥६॥
महामुनिवरैर्दृष्टैः प्रायश्चित्तैरथोत्तमैः॥ सर्वकालेप्यभेदानामघानां क्षयकार
णं॥७॥ इदमेव परं श्रेयः सर्वशास्त्रविनिश्चितं॥ यद्भक्त्या परमेशस्य पूजनं पर
मोदयं॥८॥ जानताजानता वापि येन केनापि हेतुना॥ यत्किंचिदपि देवाय कृतं
कर्म विमुक्तये॥९॥ माघे कृष्णचतुर्दश्यामुपवासो हि दुर्लभः॥ तत्रापि दुर्लभं
मन्ये रात्रौ जागरणं नृणां॥१०॥ अतीव दुर्लभं तत्र पूजनं परमेष्ठिनः॥ सुदुर्ल
भतरं तत्र शिवलिंगस्य दर्शनं॥११॥ भवकोटिशतोत्पन्नपुण्यराशिविपाकतः

लभ्यते वा पुनस्तत्र बिल्वपत्रार्चनं विभो॥१२॥ वर्षाणामयुतं येन स्नानं गंगा
सरित्कृते॥ सकृद्बिल्वार्चनेनैव तत्फलं लभते नरः॥१३॥ यानि कानि च पापा
नि ज्ञातानीह युगे युगे॥ माघासितचतुर्दश्यां तानि नश्यंति कृत्स्नशः॥१४॥ ए
तामेव प्रशंसंति लोके ब्रह्मादयः सुराः॥ मुनयश्च वसिष्ठाद्या माघासितचतुर्द
शीं॥१५॥ अत्रोपवासः केनापि कृतः क्रतुशतोपमः॥ रात्रौ जागरणं पुण्यंक
ल्पकोटिशताधिकं॥१६॥ एकेन बिल्वपत्रेण शिवलिंगार्चनं कृतं॥ त्रैलोक्ये त
स्य पुण्यस्य को वा साहस्रमिच्छति॥१७॥ अत्रानुवर्ण्यते पुण्या गाथा परमशोभ
ना॥ गोपनीयास्तु कारुण्यात्कौतमेन प्रकाशिताः॥१८॥ इक्ष्वाकुवंशजः श्रीमान्न
राजा परमधार्मिकः॥ आसीन्मित्रसहो नाम श्रेष्ठः सर्वधनुर्भृतां॥१९॥ स राजास

ब्र॰खो॰ कज्ञास्त्रज्ञः शास्त्रज्ञः श्रुतिपारगः॥ धीरोनंतबलोत्साहो नित्यं योगी दयानिधिः॥
१४ ॥२०॥ पुण्यानामिव संघातं तेजसामिव पंजरं॥ आश्चर्याणामिव क्षेत्रं यस्य मूर
र्त्तिर्विराजते॥२१॥ हृदयं च दयाक्रांतं श्रियाक्रांतं च यद्वपुः॥ नीराजितांघ्रिः सा
मंतचूडामणिमरीचिभिः॥२२॥ एकदा मृगयाकेलिलोलुपः स महीपतिः॥ प्र
विवेश गहनं घोरं बलेन महता वृतः॥२३॥ तत्र विव्याध विशिखैः शार्दूला
या न्गवयान्मृगान्॥ रुरून्वाराहमहिषान्मृगेंद्रानपि भूरिशः॥२४॥ स एव
मृगयासक्तो गहने दंशितः स्वरन्॥ कमपि द्विजनाकारं जघानेच निशाचरं॥ १४
२५॥ निहत्तो मृगयायाश्च स्वां पुरीं पुनरायर्यौ॥ रक्षासे पतिते तस्मिन्हते रा
भयानके॥२६॥ तस्यानुजः शुचाविष्टसोतिदुःखेन दुःखितः॥ भ्रातरं निहतं दृ

ष्ट्वा चिंतयामास चेतसा॥२७॥ अहो खल्वेष दुर्धर्षो देवानां रक्षसामपि॥ छद्मेनैव च
जेतव्यो मया राजा न चान्यथा॥२८॥ इति व्यवसितः पापो राक्षसो मानुषाकृतिः॥
आससाद नृपश्रेष्ठमुत्पात इव मूर्त्तिमान्॥२९॥ तं विनिताकृतिं दृष्ट्वा भृत्यतां कर्त्त
मागतं॥ राजसेवापरो नित्यं वक्तव्येन सुखावहः॥३०॥ भोजनं कुरुते राजा तदा
सौ भोजने विधिं॥ कथयत्येवमेवं वा भोजनं हि विधीयतां॥३१॥ पंचग्रासा ओदन
स्य सघृतं च दितः स्मृतं॥ भोज्ये सुकृतिनं ज्ञात्वा राजा मित्रसहस्तदा॥३२॥ चक्रे
महानसाध्यक्षं अजानन्स महीपतिः॥ भोजनं रोचते राज्ञे स्वादु स्वादु वदत्य
सौ॥३३॥ लेह्यं चोष्यं तथा पेयं भोज्यं चैव विशेषतः॥ एवं कृते गते तस्य पक्षा
णां षट्द्वयं यदा॥३४॥ महालयविधिस्तत्र राज्ञः स्नातस्य चागतः॥ कर्त्तव्यं श्राद्ध

यजनमितिज्ञात्वा नरेश्वरः ॥३५॥ चिंतयामास भूपालो दमयंत्या स्त्रिया सह ॥ ए
तस्मिन्नंतरे तस्य वसिष्ठो गुरुरागतः ॥३६॥ शिष्यवर्गसमायुक्तो कृतगंगानिम
ज्जनः ॥ आगतं स्वगुरुं ज्ञात्वा स्वभार्यां धैर्यं विधाय च ॥३७॥ पादौ प्रणम्य चात्मानं कृ
तकृत्यं विभावयन् ॥ दमयंती नलस्येव तथा सा राजभामिनी ॥३८॥ आनीय चास
नं दिव्यं गुरुं संवेशयत्ततः ॥ स्वयं पाककरश्चासीद्राक्षसस्तु सरूपधृक् ॥३९॥
पूर्वयोनौ पुरंद्वेष्टि पूजाभंगं करोति च ॥ वेदवादरतो नित्यं पाखंडैः परिपूजितः
॥४०॥ कस्यचित्तस्य विप्रस्य शिवनिंदापरस्य च ॥ राक्षसो मुशंगृहे बालं हत्वा तन्मां
समाददत् ॥४१॥ आनीय सूदरूपोसौ पेचिवान् संस्कृतं बहु ॥ आगते द्विश्राद्धका
ले भोजनार्थं गुरुं स्थितः ॥४२॥ शाकापिंवपुरः स्थितं यत्ने दृष्ट्वाब्रवीद् द्विभं ॥ ब्रिपि

शितं विप्रपुत्रस्य ज्ञात्वासौ मुनिपुंगवः ॥४३॥ धिक् धिक् नराधिप राजन् त्वयेदं
ह्यकारिणा ॥ ह्युद्येनोपाहृतं मह्यं मतौ रक्षोभविष्यसि ॥४४॥ रक्षः कृतमविज्ञा
य ज्ञात्वैवं स गुरुस्ततः ॥ पुनः संस्मृत्यैश्य तं ज्ञाः पंचकारद्वादशाब्दिकं ॥४५॥ नृमि
भूतां स्त्रियं दृष्ट्वा कोपसंरक्तलोचनः ॥ राजापि कुपितः प्राह यदिदं मम चेष्टि
तं ॥४६॥ न ज्ञातं च वृथा शाप्तो गुरुं प्रतिशापाम्यहं ॥ सूत उवाच ॥ जेतुं मृगो यथा
सिंहं दुर्दुरः पन्नगेश्वरं ॥४७॥ खद्योतो भास्करं देवं यथा कामः सदाशिवं ॥ करूरः
सागरं चैव सर्पए वरवगेश्वरं ॥४८॥ गर्दभो मत्तमातंगं मूर्खं श्चांगिरसः सुतं ॥ वि
षयी ब्रह्मविद्यां च पापिष्ठः श्रीनिकेतनं ॥४९॥ तथा मित्रसहो राजा गुरुं शप्तुं मति
व्यधात् ॥ इत्य पोंजलिमादाय गुरुं स श्प्तुं समुद्यतः ॥५०॥ पतित्वा पादयोस्तस्य दमयं

श्लो· तीन्यवारयत् ॥ दमयंत्युवाच ॥ क्षम्यतां क्षम्यतां राजन्न कर्त्तव्यमिदं त्वया ॥ ५१
१६ ॥ एतद्दैवकृतं ज्ञात्वा मुंच मोहं महीपते ॥ स्वकीया जननी दद्यात् द्विषं विक्रियते सुतं
॥ ५२ ॥ गुरुर्हरति सर्वस्वं तत्र का परिवेदना ॥ गर्भधारणपोषाभ्यां सुतं वर्द्धय
ते तु या ॥ ५३ ॥ तद्बुद्धि विषदाने चेद्विना दैवं न जायते ॥ सुकृतं दुःकृतं राजन्न जन
न्म जन्मनि चार्जितं ॥ ५४ ॥ अवश्यमेव भोक्तव्यं कल्पांतरगतेपि च ॥ आवा
भ्यां च कृतं सम्यक् श्राद्धे ब्राह्मणभोजनं ॥ ५५ ॥ दैवादृष्टेन दुष्टेन सुदरूपेण रक्ष १६
सा ॥ प्रतिकृतिः कृता तेन स्वभ्रातुर्वधसंभवा ॥ ५६ ॥ तस्मात्त्वया न कर्त्तव्यं साह
सं कर्म कुत्रचित् ॥ भोक्तं तद्द्वादशाब्दं च पुनः कल्याणमिच्छसि ॥ ५७ ॥ तद्वाक्याम्र
तपानेन रोषसर्प्पेण दंशितः ॥ राजा स्वचेतनां प्राप्य स्वपदे निक्षिपज्जलं ॥ ५८

पतितं पादयोरंभः पादौ कल्मषतां गतौ ॥ कल्माषांघ्रिरिति ख्यातस्ततः प्रभृति
पार्थिवः ॥ ५९ ॥ गते तस्मिन् गुरुस्थाने शापं दत्वा निजाश्रमे ॥ राजापि राक्षसो जा
तो गुरुशापेन तत्र ह ॥ ६० ॥ जगाम गहनं घोरं दुष्टसत्वनिषेवितं ॥ स बिभ्रद्राक्षसं
रूपं कालांतकसमं महत् ॥ ६१ ॥ चखाद विविधान् जंतून् मानुषादीन्वनेचरान्
॥ स कदाचिद्वने क्वापि विहृष्ट मार्गौ किशोरकौ ॥ ६२ ॥ अपश्यद्दंतकाकारो नवोढौ द्वि
जदंपती ॥ अग्रे द्विजं समायातं किशोरं शुभदर्शनं ॥ ६३ ॥ अग्राम्यसंगमं नार्यरो
धयामास वेगतः ॥ हस्तमुत्क्षिप्य वेगेन संताड्यारुह्य यं स्वयं ॥ ६४ ॥ हास्यहत
महत्तत्र महाभयविधायकं ॥ जग्धुं जग्राह शापात् वृको मृगशिशुं यथा ॥ ६५ ॥
रक्षोगृहीतं भर्त्तारं दृष्ट्वा भीता अथ तत् स्त्रिया ॥ केदं किमिदमित्येवं कोयं कांतं जिहि

श्रे·सा·
८

र्षति॥६६॥केनपापेनजनितमावयोर्भयमीदृशं॥नष्टतःप्रियसंयोगस्तानवे·
श्मनिजज्ञया॥६७॥नीतःकालोमयानूनंपातिव्रतरतयामया॥अस्मिन्नरण्ये
महतीकिंकरिष्येधुनाध्वनि॥६८॥जगामसत्वरंतत्रराक्षसस्यसमीपतः॥कों·
तंगृहीतकंठंचसहमानाबलात्तदा॥६९॥उवाचवचनंबालारुदतीशुभ·
रावेपिता॥भोभोमामावृथापापंकुरुराक्षससत्तम॥७०॥मारवादममभर्त्तारं
प्राणात्प्रियतरंसदा॥जानामित्वांराक्षसेंद्रसूर्यवंशविभूषणं॥७१॥वसिष्टशा
पसंजातरक्षोरूपंसुदारुणं॥दमयंतीपतेराजानमुंचमेमानवर्द्धनं॥७२॥आ· ८
र्त्तानांशरणार्त्तानांत्वमेवहियतेशतिः॥क्षत्रियेसिमहाराजगोस्त्रीब्राह्मणपा
लकः॥७३॥एकाकिनींमांविजनेभर्तृदुःखंनदीयतां॥पापानर्मिमिवसंघातैः

किंमेदुष्टजनासुभिः॥७४॥देहेनचातिभारेणविनाभर्त्रामयात्मना॥कष्टेनोपार्जि·
ताविद्यागुरुगेहेऽमुनाधुना॥७५॥मत्पितृमंदिरंप्राप्तेमांनेतुंनिजवेश्मनी॥र·
जन्मांधोवर्त्ततेराजन्पितास्यजननीतथा॥७६॥मार्गेयुग्मस्यलक्षंतौवैकाप
त्योस्वसयत्नि॥तस्मान्मुंचमहावीरस्वामिनंवेदपारगं॥७७॥पुराणन्यायमी·
मांसाधर्मशास्त्रविशारदं॥अत्रास्यप्राणदानंचजगद्रक्षात्वयाकृता॥७८॥कृ·
पांकुरुमहाराजबालोयंब्राह्मणःपुनः॥अनाथकृपणार्थेषुसघृणाःखलुसा
धवः॥७९॥ ॥सूतउवाच॥ ॥इत्यमभ्यर्थ्यमानोपिपुरुषादःसनिर्घृणः॥अत्य
कृप्रकृतिर्दुष्टोहंतुमारब्धवान्द्विजं॥८०॥बहुधाप्रार्थ्यमानोपियोदुष्टःसच
नोसुहृत्॥कस्तुर्यास्थर्योदलंकृत्वादुग्धशर्करयाचैषितं॥८१॥गंगांभःसुरभीड

श्लो॰ वंपलांडु वा पयेन्नरः॥ अत्यंतोत्कटदुर्गंधं वहत्येव न संशयः॥८०॥ गर्दभो न

१८ भवेदश्वः श्वा सिंहो न कदाचन॥ न काको हंसतां याति न दुष्टः सज्जनो भवेत्॥८

नेर १॥ न कृतं वाक्यमेतस्या सैंदुष्टेन रक्षसा॥ हुंकृत्य सहसा दुष्टश्चखाद द्विजस

त्तमं॥८२॥ शिरस्तत्वस्य दत्त्वा नैश्वर्वैयनन्निर्ययौ वने॥ अथ सा धीरः त्रादीनाना

मतः सुरतप्रिया॥८३॥ प्रियं च कामदेवाख्यं स्मरंती च विलप्य सा॥ तेन त्यक्ता

निचास्थिनी चैकीकृत्य यथातथं॥८४॥ काशार्थं निर्गता सा तु नदीतीरं ददर्श ह

॥ जले स्नात्वा तदस्थीनि संप्रोक्ष्य दीनमानसा॥८५॥ काष्ठान्यादाय बिल्वस्य चि १८

तां कृत्वा यथोचितां॥ भर्तारमनुगच्छंती संविवेश हुताशनं॥८६॥ चितिः परिक्र

म्य कव्यादनामा नवह्निमेव च॥ स्मरंती भर्तृचरणौ बुसंगे स्थाप्य चास्थिनी॥

॥८७॥ राजानं राक्षसाकारं शापास्त्रेण जघान हा॥ रे रे पार्थिव पापात्मन् त्वया मे

भक्षितः पतिः॥८८॥ अतः पतिव्रतायास्त्वं शापं मे दुःसहं विषोल्बणं॥ अद्य प्रभृति

ते मूढ भार्यायास्तव संगमे॥८९॥ संजाते निजगेहेपि तत्क्षणं मृत्युमवाप्स्यसि॥ इ

पं दत्त्वा पतिं ध्यात्वा विवेश ज्वलनं सती॥९०॥ एतयोर्दैवयोगेन दंपत्योर्विंशती

विंदा॥ षष्टं जन्म गतं चासीदतो मुक्तौ च सप्तमे॥९१॥ सोपि राजा गुरोः शापमनु

त्पक्ताविधिं॥ पुनः स्वरूपमादाय स्वगृहं मुदितो ययौ॥९२॥ ज्ञात्वा विप्रसतीर

शापं तत्पत्नी दमयंत्यपि॥ पतिं निवारयामास वैधव्याद्भीतिबिभ्यती॥९३॥

दमयंत्युवाच॥ ॥ मा राजन् सेव मामेवं शापोयं वर्त्तते तव॥ गच्छंत्याः स्वामि

नासार्द्धं वने त्वं सक्षवान्नहि यं॥९४॥ वनं गच्छ महाराज कुरु तीर्थान्यनेक॰

ब्र॰खं॰ १९

रः॥ अहो मा तिष्ठ मा तिष्ठ ब्रह्महत्येयमागता॥९७॥ तीर्थं नानाविधं कृत्वा पुनरा
गच्छ सत्वरं॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं॥९८॥ कृतकर्मक्षयो ना
स्ति कल्पकोटिशतैरपि॥ एवं संचिंत्य राजासौ विलप्य च सुदुःखितः॥९९॥
निर्ययौ नगराद्बहिः प्रकृतिः सा रुरोद ह॥ पुरो राजानुगा हत्या खड्गं च मंथ
रा तदा॥१००॥ सा हि मूर्त्तिमयी घोरा ब्रह्महत्या दुरत्यया॥ यदसौ पापविवशो मु
निपुत्रमभक्षयत्॥१॥ तेनात्मकर्मणा याति ब्रह्महत्या स्वरूपतः॥ दिवेशो विपि १९
नं घोरं घोरया सह हत्यया॥२॥ दमयंत्यपि सा नारी पतिव्रतपरायणा॥ सामं
तराजभिर्दैत्रा पीडितं बहुधा मुहुः॥१०३॥ ब्रह्महत्याभितस्तस्य गतस्य च व
नांतरे॥ वयं राज्यं करिष्याम एवं बलविजृंभिते॥४॥ ततस्तन्वी च गृहीष्या

ष्यामो राज्यमीश्वासु देशजं॥ इति चासुरैवैः श्रुत्वा दमयंत्यतिदुःखिता॥५
रयमास्थाय वेगेन वसिष्ठस्याश्रमं ययौ॥ सर्वं निवेदयामास शत्रुभ्यश्च परा
जयं॥६॥ वसिष्ठः करुणाराशिरुवाचैनां पतिव्रतां॥ स्नानं कुरु महाभागे म
लमूत्रापर्ण्यदेहजं॥७॥ आनयाशु समीपं मे मूर्त्तिं कृत्वा शुभाकृतिं॥ तया नी
तां मलमयीं मंत्रेण जीवयोगतः॥८॥ अयं मालवराजेति नामो कृमर्षिणा
तदा॥ गच्छ देवि सुखं तिष्ठ माचिंतां कुरु शोभने॥९॥ अभिषिच्यासुतं राज्ये
शत्रुभ्यो न भयं तव॥ इति संगृह्य पुत्रं सा पुनरापस्वकं पुरं॥१०॥ तथा च का
रराजानं स्वसुतं सचिवाहूता॥ अथातः संचरन्राजा पीडितो ब्रह्महत्यया॥
१॥ तस्यानिर्वेरमन्विच्छं राजा निर्विर्णमानसः॥ नानाक्षेत्राणि सर्वाणि च

अ॰मा॰ चारबहुवत्सरं॥१२॥पुष्करंनैमिषारण्यंकेदारंकाश्मिरादिकं॥सगरस्यमहाती
२० र्थंउत्तरस्यतथैवच॥१३॥पश्चिमेयानितीर्थानिपूर्वेयानितथैवच॥भ्रममाणे
दिवारात्रंब्रह्महत्यागतानहि॥१४॥यथासर्वेषुतीर्थेषुस्नातवांश्चमुहुर्मुहुः॥
॥अनिवृत्ताब्रह्महत्यामिथिलामाययौनृपः॥१५॥यत्रश्रीराममहिषीजनक
स्यनिकेतनं॥सीतापादांकिताद्दष्टिबहुपुण्यप्रदानृणां॥१६॥सीतायानिर्मि
तंतत्रसीतोद्यानमितिश्रुतं॥पूर्वस्योत्तरदिग्भागेनानापुष्पसमाकुलं॥१७॥
मत्तभ्रमरसंघुष्टंकोकिलारावकूजितं॥चंद्रकांतालवालेषुपरिपूर्णजलंस २०
दा॥१८॥पवित्रंपरमंश्रेष्ठंसीताहस्तविनिर्मितं॥विवेशतत्रनृपतिःमक्षण
मेकंस्थितोयदा॥१९॥ददर्शमुनिमायांतंगौतमंविमलाशयं॥तेजःपुंजस

माक्रांतंविद्युत्कांचनसन्निभं॥२०॥मुण्डबद्धजटाभारंसर्वशास्त्रगुरुंपरं॥
न्यायंन्यायरतंधीरंदर्शनाह्लाददायकं॥२१॥कृपासिंधुंदीनबंधुंकरुणामृत
सागरं॥नैकाकिनंनिरीहंचकरुणार्द्रविलोचनं॥२२॥हुताशनमिवाशेषत
पस्विजनसेवितं॥विवस्वंतमिवोद्यंतंघनदोषतमोनुदं॥२३॥शशांकमिवनि
ःशंकमवदातगुणाकरं॥शांतंशिष्यगणोपेतंतपसामेकभाजनं॥२४॥उप
सृत्यसराजेंद्रःप्रणनाममुहुर्मुहुः॥कंपमानोविनीतात्माजग्राहचरणौमुदा॥२५॥
उद्यानस्यबहिर्भागेब्रह्महत्यातुसंस्थिता॥पवित्रत्वाच्चसीतायाःपादरेणुसम
र्पणात्॥२६॥पादयोःपतितंदृष्ट्वागौतमःकरुणानिधिः॥राजनंसूर्यवंशोत्थंप्राह
गंभीरयागिरा॥२७॥॥गौतमउवाच॥॥किंचित्तेकुशलंराजन्कच्चिदन्याहतंप

ब्र०खं०
२१

दं ॥ कुशलीन्यः प्रजाः सर्वा अवरोधजनेपि च ॥२८॥ किमर्थमिह संप्राप्तो विसृज्य र
सकलां श्रियं ॥ किमितु ध्यायसि श्रांतो दीर्घमुष्णं च निःश्वसन् ॥२९॥ राजोवाच ॥ श
सर्वं कुशलिनो ब्रह्मन्नेवयं त्वदनुकंपया ॥ राज्ञामुत्तमवंशयानां द्विजा यत्नाहि सं
पदः ॥३०॥ बहूनी मे व्यतीतानि दिनानि निर्गतस्य मे ॥ नगराञ्चैव जानामि प्रज
सु कुशलात्मिकं ॥३१॥ इदानीं नाथ भगवन् पूर्वपापानुसारतः ॥ मामेव बाध
ते ह्येषा ब्रह्महत्या सुदारुणा ॥३२॥ प्रैरलक्ष्यरूपा सा भर्त्सयंति पदे पदे ॥ यन्म
यात्र गपदग्धेन कृतमन्यैर्दुरत्ययं ॥३३॥ न शांतिर्जायते तस्य प्रायश्चित्तसहस्र २१
कैः ॥ इष्टाश्च विविधा देवा नदीनदसरस्तटे ॥३४॥ स्थानानि यानि चीर्णानि कंदमू
लफलादिभिः ॥ ब्रह्महत्या तु नगता महत्क्लेशविधायिनी ॥३५॥ अद्य मे जन्म सा

फलं प्राप्तमित्येव लक्ष्यते ॥ सर्वतीर्थप्रसादेन सीतोद्यानप्रसादतः ॥३६॥ त्वदी
यं दर्शनं जातं येन साक्षात्समासाद्भवेत ॥ अन्विच्छन् लभते क्वापि वर्षपूगै मनोरथं
॥३७॥ इत्ययं जनवादोपि संप्राप्तः खल्लु सत्यतां ॥ प्राग्जन्मसंचितानां तु पुण्याना
मुदये सती ॥३८॥ यद्भवान् भवभीतानां त्राता नयनगोचरः ॥ काकतालीयन्या
येन दर्शनं मम सांप्रतं ॥३९॥ आनंदयति मे चेतः प्रेम्णा संभाषणादिना ॥ अ
द्यमेतव पादाब्जशरणप्रस्य हतेनसः ॥४०॥ शांतं कुरु महाभाग रहितं ब्रह्महत्य
या ॥ इति तेनार्थितो राज्ञा गौतमः करुणानिधिः ॥४१॥ समादिदेश घोराया मघा
नां साधुनिष्कृतिं ॥४२॥ ॥ इति श्रीस्कंदपुराणे वृहद्ब्रह्मोत्तरखंडे कल्माषस्य
गौतमदर्शनं नाम द्वितीयोऽध्यायः ॥२॥ ॥ शौनकाद्या ऊचुः ॥ ॥ कथयस्व महाप्रा

ब्र॰ खं॰ त्र कल्माषांघ्रेः कथानकं॥ पुनः किं जातमेतस्य सूत विस्तरशो वद॥१॥ त्वन्मु
२२ खामृतपानेन जीविताः स्म निरंतरं॥ यत्तीर्त्वा कर्णरंध्रेण जीवन्मुक्तो भवे
न्नरः॥२॥ अन्येषामुपकारार्थं शंकरस्य महात्मनः॥ महात्म्यं मुक्तिदं प्रोक्तं मे
तत्त्वं वर्णयाधुना॥३॥ सूत उवाच॥ श्रूयतामृषयः सर्वे यूयं धन्याश्च को॰
विदाः॥ चरितः श्रवणे शंभोः सादराः प्रेमतः पुनः॥४॥ गौतमः प्रत्युवाचाथ
कल्माषांघ्रिस्फुरं वचः॥ ज्ञात्वा चैवं स्थितं तत्र नृपं निर्विण्णमानसं॥५॥ गौ
तम उवाच॥ साधु राजेंद्र धन्योसि पापेभ्यस्त्वं भयं त्यज॥ शिवे त्रातरि भक्ता २२
नां क्व भयं शरणैषिणां॥६॥ शृणु राजन्महाबुद्धे वायुदेशे प्रतिष्ठितं॥ महा
पातकसंहारि गोकर्णाख्यं मनोरमं॥७॥ यत्र स्थितिर्न पापानां महद्भ्योमह

तामपि॥ स्मृत्वैवाशेषपापौघं यच्चो मासहितः शिवः॥८॥ यथा कैलासशिखरे
यथा मंदरमूर्द्धनि॥ यथा वाराणसीक्षेत्रे प्रभासेपि यथा हरः॥९॥ पाताले हा
टकोयद्वत्तथा गोकर्णमंदिरे॥ नाग्निना न च शशांकेन न नतारायहनायकैः॥१०॥
तमो विशीर्यते सम्यक् यथा सवितृदर्शनात्॥ तथैव नेतरैश्चार्थैर्न चक्षेत्रै
र्मनोरमैः॥११॥ सद्यः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात्॥ तत्र पूर्वं म
हात्मानस्तपसा सिद्धिमागताः॥१२॥ इंद्रोपेंद्रविरिंच्याद्यैस्तपसा सिद्धिकां
क्षिभिः॥ तत्रैकेन दिनेनापि यत्कृतं व्रतमुत्तमं॥१३॥ तच्चान्यत्राब्दसाहस्रे वामन४
स्तपो भवति संभृतं॥ यत्रेंद्रब्रह्मविष्ण्वादिदेवानां प्रीतिकाम्यया॥१४॥ महा
बलाभिधानेन देवः सन्निहितः सदा॥ घोरेण तपसा लब्ध्वा रावणाख्येन र

ब्रह्मो· २३

क्षसा॥१५॥ तल्लिंगं स्थापयामास गोकर्णो गणनायकः॥ इंद्रो ब्रह्मा मुकुंदश्च
विश्वेदेवा मरुद्गणाः॥१६॥ आदित्या वसवो देवाः शशांकश्च सतारकः॥ एते
विमानगता ये देवास्ते पार्षदैः सह॥१७॥ पूर्वद्वारे निषेवंते तस्यैव प्रीतिकार
णात्॥ तथैव मुनयः साध्या अजिनावल्कलांबराः॥१८॥ दंडिनो व्रतिनो मुंडाः
स्नातका ब्रह्मचारिणः॥ दक्षिणद्वारमाश्रित्य निषेवंते महाबलं॥१९॥ स
र्वेऽस्थिमात्रावयवास्तपसा दग्धकल्मषाः॥ सर्वे ते परया भक्त्या नागाः पाता
लसंभवाः॥२०॥ तथा देवाः सगंधर्वाः पितरः सिद्धचारणाः॥ विद्याधराः किं २३
नरा गुह्यकादयः॥२१॥ पश्चिमं द्वारमाश्रित्य सेवंते ते महाबलं॥ रक्षः पि
शाचवेताळदैत्याश्च महाबलाः॥२२॥ नानाविभवसंपन्ना नानाभूषण

पुरुषाः किं

वाहनाः॥ शिवभक्तिरताः सर्वे रावणाद्यास्तथा शिवं॥२३॥ सेवंते चोत्तरे द्वारे शि
वायुक्तं सदाशिवं॥ कोणेष्वपि स्थिताश्चान्ये राजानो भक्तितत्पराः॥२४॥ विमाने
ः सूर्यसंकाशैरग्निवर्णैः शशिप्रभैः॥ विद्युत्पुंजनिभैरन्यैः समंतात्परिवारिताः
॥२५॥ प्रस्तुवंति च गायंति पूजयंति प्रणमंति च॥ प्रनृत्यंति प्रहृष्यंति गोकर्णे
पृथिवीपते॥२६॥ गोकर्णसदृशं क्षेत्रं नास्ति जगत्त्रये॥ तत्र घोरं तपस्तप्त
मगस्त्येन महर्षिणा॥२७॥ तथा सनत्कुमारेण प्रियव्रतसुतैरपि॥ अग्निना
देववर्येण कंदर्पेण च पार्थिव॥२८॥ तथा देव्या भद्रकाल्या त्रिशुमारेण
भास्वता॥ दुर्मुखेन फणींद्रेण मणिनागाह्वयेन च॥२९॥ कालावर्तादिभिर्ना
गैर्गरुडेन बलीयसा॥ रक्षसा रावणेनापि कुंभकर्णाह्वयेन च॥३०॥ वि

कापि ५

श्रीगो.
२४

भीषणेनपुण्येनतपस्तप्तंदुरासदं ॥ सूर्यस्यभार्ययातत्रसंज्ञाख्ययाकृतंतपः ॥
३१ ॥ अश्विनीरूपमास्थायसूर्यतापाभिभूतया ॥ एतेचान्येचगीर्वाणाःसिद्धदान
वमानवाः ॥ ३२ ॥ गोकर्णेदेवदेवेशंशिवमाराध्यभक्तितः ॥ प्राप्तास्तेसिद्धिमतुलां
वांछितोप्यधिकांसदा ॥ ३३ ॥ ऋषयऊचुः ॥ सूतसूतमहाबाहोसंशयंछिंधिनः
किल ॥ गोकर्णेश्वरलिंगस्यमहात्म्यंवदविस्तरात् ॥ ३४ ॥ कुतःसमागतंलिंगं
स्थापितंकेनवाततः ॥ रावणस्यकदालब्धंकथंगोकर्णतांगतं ॥ ३५ ॥ अश्वरूपं
समास्थायतप्तंयत्सूर्यभार्यया ॥ आश्चर्यंवर्त्ततेस्माकंवदास्मान्श्रद्धयान्विता २४
न् ॥ ३६ ॥ सूतउवाच ॥ एकदासमयेभूमौरावणोराक्षसेश्वरः ॥ पुनःसंप्राप्य
यामासशंकरंलोकशंकरं ॥ ३७ ॥ प्राप्यराज्यंमहादेवात्तोप्यधिककांक्षया ॥ स

त्तमेपुष्करेद्वीपेचिंतामणिगृहेपुरा ॥ ३८ ॥ रत्नसिंहासनेदिव्येसंस्थितेचोमयासह ॥
पारिजातादिभिर्वृक्षैर्वेष्टितेपरमाद्भुते ॥ ३९ ॥ यत्रगीर्वाणललनाःकोटिशःसंतिसे
वने ॥ पार्वत्याःपद्मनेत्रायाःशंकरस्यविशेषतः ॥ ४० ॥ षोडशास्यमहादास्यःपार्वत्या
ःसेवनेस्थिताः ॥ प्रथमास्नानजलदाद्वितीयावस्त्रधारिणी ॥ ४१ ॥ गंधवाहातृती
याचचतुर्थीपुष्पसंभृतिः ॥ पंचमीकेशधूपाचषष्ठीचित्रविलेखिनी ॥ ४२ ॥ सप्त
मीदत्तनैवेद्याफलदाचाष्टमीस्मृता ॥ नवमीदत्ततांबूलादशमीदर्पणप्रदा ॥ ४
३ ॥ चामरग्राहिणीचैकादशीव्यजनधृक्परा ॥ त्रयोदशीचाक्षहस्ताशय्योपस्कारि
णीपरा ॥ जयापंचदशीप्रोक्ताविजयाषोडशीतथा ॥ सप्तमेपुष्करेद्वीपेलीलावि
ग्रहधारिणौ ॥ ४४ ॥ पार्वतीपरमेशानौस्थितौक्रीडाविनोदतः ॥ मानुषाणांगति

नास्तिविषयासक्तचेतसां ॥४६॥ पुष्करे पुष्करण्ये च तथा पुष्करनादिते ॥ गजपुष्क
रसेकेन पौष्करमुक्तिकांतिद ॥४७॥ भ्रमन्कदाचित्क्षेत्रे रावणो रक्षसां पतिः ॥
रत्नकूटस्य शिखरे संस्थाप्यासनमात्मनः ॥ तपश्चकार दुर्धर्षः फलाहारेण वे
तदा ॥४८॥ एवं वर्षशतं तेन फलाहारैः कृतं तपः ॥ तद्वच्च शुष्कपत्रेण शतव
र्षमिदं पुनः ॥४९॥ शतं च नीरपानेन रावणेन कृतं तपः ॥ त्रैलोक्यं मे भवेद्व
श्यं दास्यतां कुरुते मम ॥५०॥ इति संचित्य मनसा तपश्चक्रे सुदारुणं ॥ ततः
पंचशतेवर्षे वायुभक्षी बभूव ह ॥५१॥ देहस्तु गलितस्तस्य शुष्कमांसाभयस्तु
च ॥ तपोज्वालागता दूरं ब्रह्मलोकादिकं प्रति ॥५२॥ ततः प्रसन्नो भगवान्वरं
ब्रूहीति चाब्रवीत् ॥ न नाम शंकरं साक्षात्पार्वत्या सहितं तदा ॥५३॥ यदपूर्वं तरं

नायतन्मे देहि सदाशिव ॥ यस्य स्पर्शेण मे नित्यं लोहं भवति कांचनं ॥५४॥ कांस्यं वा
यत्तणं वापि ताम्रं सीसं तथा त्रपु ॥ रितिवाथ यदा स्पृष्टं सर्वं जांबूनदं भवेत् ॥५५॥ न
मृत्युर्न जरा यस्य सन्निधानेन जायते ॥ तदेकं वद निश्चित्य येन शत्रुक्षयो भवेत् ॥
५६॥ ॥गौतम उवाच॥ ॥ तदा शंभुः स्वयं साक्षाद्विचार्य च प्रभुः पुनः ॥ स्वभक्ताय नि
जं साध्वीरं चिंतामणिमयं महत् ॥५७॥ लिंगं ददौ प्रसन्नात्मा रावणाख्याय रक्षसे
॥ गृहाणेदं महालिंगमस्माकं प्रियमस्तितत्तु ॥५८॥ स्वदेहे धारयाशु त्वं येन श्रेयः
त्वमाप्स्यसि ॥ स्वर्णस्थं हृदये रक्षो रक्षयत्नेन भूयसा ॥५९॥ मा निधेहि धरायां च
ग्रामान्यामपि चापदि ॥ भोगं तं च यदा लिंगं त्वयोध्यं तु नराः कृते ॥६०॥ बाढमि
त्येव तद्रक्षो लिंगमादाय शांभवं ॥ पुष्कराच्च विनिर्यातो भ्रमन्देशाननेकशः ॥

ब्रह्मो॰ ॥६१॥ वासुदेवो समायातो दक्षिणप्रांतसंभवे ॥ यदा दत्तं शिवेनैव लिंगं शंभवस्त्र
२६ क्षसे ॥६२॥ सर्वे देवाश्च संभ्रांता चेतसो ह्यभवन्मुहुः ॥ तत्र ज्ञात्वा च स्वयं वि
सुरागतो विप्रवेशधृक ॥६३॥ यत्र गच्छति दुष्टात्मा रावणो देवदर्पहा ॥ हरेश्च
श्री मायया तत्र रावणस्याशु वंक्षणा ॥६४॥ तया पीडितमात्मानं मत्वा गात्सरसी
तटे तटे ॥ पानीयं पातुमिच्छामि मि लिंगं हस्तगतं मम ॥६५॥ कस्मै दास्यं प्रद
यास्यु पीत्वा गृह्याम्यपः पुनः ॥ एतस्मिन्नंतरे तत्र विप्ररूपधरो हरी ॥ ददृ
शे राक्षसो दूरादायातं तत्सरः प्रति ॥६६॥ उवाच करुणं वाक्यं ब्राह्मणं मे श्रूयतां व २६
चः ॥ पिपासार्तोस्म्यहं तात भद्रमागमनं तव ॥६७॥ शिवात्मप्रार्थितं लिंगं सर्व
व्रतपकरं परं ॥ एतदर्थं मया नत्नं दारुणं तप आदरात् ॥६८॥ भूमिप्राप्तं भ

वेल्लिंगं लिंगमित्येवं शंभुना ॥ वारितोस्मि तृषाक्रांतः संजातोस्मि करोमि किं ॥६
९॥ दिष्ट्या त्वमत्र दृष्टोसि ब्राह्मणोसि दयापरः ॥ श्रेष्ठोसि सर्वभूतानां वर्णानां
ब्राह्मणो गुरुः ॥७०॥ तस्माद्यावज्जलं तावत्पिबामि त्वं गृहाण वै द्विज ॥ तिष्ठस्व धार
यित्वेदं स्वकरे सरसीतटे ॥७१॥ हरिशर्मोवाच ॥ श्रूयतां राक्षसः श्रेष्ठ स्वार्थं द
क्षोस्मि सर्वदा ॥ तव कार्यं तथान्यस्य भविष्यति न संशयः ॥७२॥ किंचित्कालमं
हं स्थास्ये शीघ्रता वर्तते मम ॥ एकवारं द्विवारं वा त्रिवारं चोच्यते मया ॥७३॥ गृ
ह्ण गृह्णेति गृह्णेति घटिकांतरमात्रतः ॥ ॥ सार्धं मुहूर्तं तव नीरपानेन ततोस्मिं ग
ते दमहं धरायां ॥ निधाय लिंगं प्रणमेत दस्ति चेडे च तं देहि न चेद्गमिष्ये ॥७४॥ इ
त्येवमुक्त्वा विरते द्विजेंद्रे प्रोवाच वाक्यं किल राक्षसेंद्रः ॥ तथेति ब्राह्मणकरमध्य

ब्र॰स्रो॰
२१

रतन्निधाय संतिष्ठ कुरु प्रसादं ॥७५॥ सूत उवाच ॥ एवं संप्रार्थितस्तेन रक्षसा
विप्ररूपधृक् ॥ तस्थौ तत्र सरस्तीरे लिंगमादाय शांभवं ॥७६॥ जलार्थं च गतस्त
त्र रावणो बलदर्पितः ॥ हस्तान् प्रक्षाल्य चाचम्य दत्त्वास्थानि तथैव च ॥७७॥ भु
जानां चैव विंशत्या दत्त्वास्येषु जलांजलीः ॥ आदाय निक्षिपन् शीघ्रं शुक्लं कुर्व
न् सरो यथा ॥७८॥ जलार्थे मुद्यते तस्मिन् रावणे प्रियवारिणा ॥ घटीकां तेन च
तेनोक्तं लिंगं स्वयं गृह्यतामिति ॥७९॥ न जगाम तृषार्तिं रावणो देवमायया
॥ मोहितो नाभिजानाति पणस्य समयं तदा ॥८०॥ पुनः प्रोवाच विप्रोसौ हरिश्च २१
र्मा मुहूर्तके ॥ तदोत्थाय तृषार्तोपि मूत्रत्यागपरोभवत् ॥८१॥ यावत्यां तं जल
तेन तावन्मूत्रविसर्जनं ॥ मूत्रेण प्लुतं लिंगं न त्रात्राकसमाहितुं ॥८२॥

माया बलवती राजन् विष्णोः शंभोस्तथैव च ॥ मोहं प्राप्ता बहुविधा वर्तंते मो
हिता धुना ॥८३॥ मोहमेष्यंति चैवान्ये किमु वै रावणादयः ॥ त्रिवारं च तथैवो
क्तस्तेनैवांतर्द्धये द्विजः ॥८४॥ भूमौ निधाय तल्लिंगं पणकाले गते सति ॥ रावणः
सहसोत्थाय शीघ्रमागत्य सन्निधौ ॥८५॥ लिंगमुत्पाटयामास गतं मूलं रसा
तले ॥ रसातलगतं मूलं यस्य मूलस्य राक्षसा ॥८६॥ उत्पाटितुं समारब्धं तथापि
न च चालतत् ॥ हस्तेनाक्रमितं तत्तु गतं गोकर्णतां बलात् ॥८७॥ मुहुर्निश्वस्य नि
श्वस्य रावणो भीमवीर्यवान् ॥ गतोंतरिक्षे तत्यक्त्वा लिंगं लंकां पुरीं प्रति ॥८८॥
तदा विप्रवपुर्धारी ब्राह्मणः सरसीतटे ॥ बभूव शंकरीतत्र लिंगमहेश्वरितुः ॥८९
इंद्राद्या देवतास्तत्र ब्रह्माद्याश्च प्रजेश्वराः ॥ सनकाद्या ब्रह्मपुत्राश्च नारदाद्याः

ब्रह्मो॰ सुरर्षयः॥१०॥धनदाद्यागुह्यकाश्चसूर्याद्याश्चनवग्रहाः॥अनंताद्याश्चयेनागागा
२८ रुडाद्याश्चपक्षिणः॥११॥सरितःसागराःसप्तसप्तद्वीपावसुंधरा॥ब्रह्मर्षयोव
सिष्ठाद्याःपंचदेवस्यपादपाः॥१२॥ऋग्वेदाद्याश्चतुर्वेदाःसर्वेमूर्त्तिसमन्विताः॥
शैलाहिमवदाद्याश्चपंचदेवस्यपादपाः॥१३॥देवांगनाश्चाप्सरसःपंचाद्याःका
मधेनवः॥सर्वेतत्रसमायातोलिंगदर्शनकारणात्॥१४॥प्रणम्यशिरसाब्रह्मा
तुष्टावशिवध्यानभृत्॥कृतांजलिपुटैःसर्वैरिंद्राद्यैःसर्ववेष्टितः॥१५॥ब्रह्मो
वाच॥॥नमस्तेनमस्तेमहादेवशंभोनिधीनांविधातागुणानांसमुद्रः॥त्वदी २८
यांघ्रिपद्मेमनोभृंगिणीमेनिवासःसदावैकरोतुकृपालो॥१६॥यदासंकटं
जायतेदेवतानांतदापासिशंभोत्वमेतान्स्वभृत्यान्॥त्वदीयाक्षिपक्ष्मप्रदे

शंगतोयोनवैदुःखसंसारचक्रेनपत्रपेत्॥१७॥जयदेवदयासिंधोप्रलयास्थि
तिपालक॥पाह्यस्मान्हिमहाभागप्रसादसुमुखोभव॥१८॥यदास्मबाधते
सर्पकंचुकि दुःखंतदैवतवदर्शनात्॥भवामोदुःखरहिताःविनिर्मोकायथोरगाः॥१९॥
एवंस्तुवतिसर्वेशंब्रह्मणिशिवमव्ययं॥जगुर्गंधर्वपतयोननृतुश्चाप्सरोग
णाः॥२०॥पुष्पाणांवृष्टयःपेतुःसरितोनिर्मलोदकाः॥जगर्जुःसागराःसप्त
सर्वत्रसुखदाघनाः॥२१॥॥गौतमोवाच॥॥एतस्मिन्नंतरेवक्त्रप्रकारोभूत्सदा
शिवः॥उवाचवचनंशंभुर्देवान्विष्णुपुरस्थितान्॥२२॥किमर्थमागतंयूयंव
दुध्वंवरमुत्तमं॥दास्याम्यहंवशीकृतंभवद्भिर्यन्मनोस्तवैः॥२३॥॥देवाऊचुः॥॥
यदितुष्टेमहादेवसर्वात्रस्तस्वभृत्यकान्॥अत्रैवेदमहालिंगंचिरस्थायिभवे

ब्रसो- दितिः॥५॥दीयतांकरुणासिंधोलोकानांहितकाम्यया॥तथेत्युक्तंशिवेनैवब्र
२९ ह्माद्याःसर्वएवते॥६॥गणेशंपुरतःकृत्वालिंगस्थापनकर्मणि॥विश्वकर्माण
माहूयरत्नैःकृत्वाशिवालयं॥७॥ध्वजापताकासंयुक्तंमणिस्तंभसहस्रकं॥चतु
र्द्वारंसुप्रभाकारंसप्तद्वालुविराजितं॥७॥तत्ररत्नकृतांवेदींशिवलिंगाभितस्तदा॥
गणेशंस्थापयामासशिवलिंगमनुत्तमं॥८॥एवंसंस्थाप्यगिरिशंदृष्टंगोकर्णव
त्वतैः॥गोकर्णेश्वरमित्येवंनामचक्रुःसुरेश्वराः॥९॥पंचायतनरूपेणपरितोदे
सूर्य वमंडलं॥ईशान्यादिचतुःकोणेहरीनहरभूःशिवा॥१०॥महाबलेनतेनैवलिंग २९
मुन्मूलितंयदा॥तस्मान्महाबलइतिद्वितीयंनामशंभवं॥११॥तदासर्वैःप्रार्थि
तोसौदेहिशंभोत्वमादरात्॥दर्शनंयेकरिष्यंतिमुच्यंतेसर्वकिल्बिषैः॥१२॥

ब्रह्महत्यासुरापानंगुरुदारारतिस्तथा॥स्वर्णस्तेयंचसंसर्गःपंचमःसोपिपात
की॥१३॥तवदर्शनमात्रेणमुच्यंतेतन्न्वदीयतां॥एवंप्राप्तवराःसर्वेब्रह्मा
द्याःसुरेश्वराः॥१४॥शिवंनत्वाययुःसर्वेहर्षितास्वस्वमालयं॥१५॥ ॥इतिशि
वचरित्रंनरःशृणोतिप्रतिपदंमहाश्वमेधजन्यं॥फलमखिलमिदंभुनक्तिचां
तेशिवपदमेवपरंप्रयातिपापः॥१६॥ ॥इतिश्रीस्कंदपुराणेबृहद्ब्रह्मोत्तरखं
डेगोकर्णेश्वरमहात्म्येगोकर्णस्थापननिरूपणंनामतृतीयोऽध्यायः॥३॥ ॥
गौतमोवाच॥ ॥शृणुकल्मषपादेनतत्पवित्रंपापनाशनं॥गोकर्णसदृशंती
र्थंनास्तीत्रिभुवनेष्वपि॥१॥आदित्यस्यप्रियाभार्यासंज्ञानामेतिविश्रुता॥तया
घोरंतपस्तप्तंतद्द्रष्टुमितवाग्रतः॥२॥विश्वकर्मासुतासंज्ञारविपत्नीबभूवह॥

भ्रसो॰ नराग्राकरवैस्तेजःप्रबलंबाधतेबहु॥३॥एवंगतेकतिपयेकालेसंज्ञामहास
३० ती॥अपत्यद्वयमादित्याल्लेभपुत्रोप्यपुत्रिका॥४॥सावर्णिकोमनुर्नामबभूव
सूर्यसन्निभः॥स्वारोचिषेंतरेपूर्वंसुरथोनामयोभवत्॥५॥देव्याःप्रसादतो
त्रैवसूर्यसूनुर्बभूवह॥तापिनाम्नीनदीचासीत्सूर्यपुत्रीनरर्षभ॥६॥नश
शाकयदासंज्ञासूर्यतेजोबलाधिकं॥तदाप्रतिकृतिंकृत्वा स्वदेहमसंभ
वां॥७॥छायानाम्नींतदासंज्ञाप्रोवाचपुनरेवतां॥शृणुछायेपितुर्गेहेयास्ये
हंतवसंमता॥८॥सूर्यसेवांकुरुष्वाद्ययावदागम्यहंपुनः॥भेदस्त्वयानकर् ३०
र्त्तव्योममापत्यद्वयेतथा॥९॥सावर्णिकस्तथातापीरक्षणीयौप्रयत्नतः॥ए
वमुक्त्वागतासंज्ञाविश्वकर्मापितुर्गृहे॥१०॥पितृभ्यामागताहृष्टासंज्ञाप्रा

णगरीयसी॥उवाचवचनंतत्रविश्वकर्मासुतांप्रति॥११॥विश्वकर्मोवाच॥॥के
नसार्द्धंसमायातासूर्यलोकादनिंदिते॥प्रेषितावास्वयंतेनुज्ञामाचाममभ्रातु
ना॥१२॥कुशलंवर्त्ततेतत्रनाहूताचागतंकथं॥१२॥सुन्दरीमितिमांपुत्रीश्रूय
तांयदिरोचते॥१३॥पित्राहूतापितुर्गेहंगच्छेतकुलजावधूः॥अनाहूतापि
गच्छेतस्वामिवेश्मनितिनान्यथा॥१४॥किमत्रकारणंपुत्रिवक्तव्यंममसन्निधौ
॥॥संज्ञोवाच॥॥सूर्यतेजोमहत्तातदुःसहंममवर्त्तते॥१५॥तेनाहंपीडितार
नित्यंसुखार्थमिहचागता॥दिनैकंवाद्वयंचात्रस्थित्वागंतास्मिवेगतः॥१६॥
एवमुक्त्वास्थितासंज्ञाभुक्त्वासुप्तासुखंनिशि॥पुनर्विचारयामाससंज्ञाचित्ते
विशेषतः॥१७॥पितुर्गेहंपरित्यज्यगमिष्यामितपोवनं॥नप्राप्स्येपितुर्मानं

ब्र.सो. ३१ भर्तुर्गेहेसुखंनहि॥१८॥तस्मादहंगमिष्यामिगोकर्णंप्रतिनिश्चितं॥महत्तपु
करिष्येहंसंकटेस्मिन्समागते॥१९॥अश्वनीरूपमास्थायगतासौतुतपस्यति
॥सूर्याभिमुखमालोक्यचचारदुश्चरंतपः॥२०॥गोकर्णेचमहातीर्थेवडवारू
पधारिणी॥नज्ञातंतत्रकेनापिसंज्ञातपसिसंस्थिता॥२१॥सूर्यगेहेत्वेवंज्ञातं
वैविश्वकर्मणा॥॥कल्माषपादउवाच॥॥पूर्वमुक्तात्वयाछायासंज्ञादेहम
लोद्भवा॥२२॥तयासूर्येणसाकंवैकिंकृतंतद्वदस्वमे॥॥गौतमउवाच॥॥एत
स्मिन्नंतरेतत्रछायासंज्ञाप्रचोदिता॥२३॥चकारसेवनंमानोरपत्यद्वयपाल ३१
नी॥नज्ञातंभानुनातत्रछायासंज्ञाविवेचनं॥२४॥वर्षाणांशतकंतत्रगतंसं
सूर्यसंगतः॥छायायाअपिसंतानत्रयमेवबभूवह॥२५॥एकःशनिश्चरः

पुत्रोद्वितीयोयममेवच॥कालिंदिचतथाकन्याएवंत्रीणिबभूवह॥२६॥सा
वर्णिश्चतथातापिसंज्ञापत्यद्वयंतदा॥अन्योऽन्यंरमतेतत्रनभेदोज्ञायतेयथा
॥२७॥एकस्मिन्दिवसेतत्रछायाभोजनकर्मणि॥सावर्णिकायप्रददौक्षीरंश
निश्चराधिकं॥२८॥शनेर्दृष्टिर्गतातत्रसावर्णिदुग्धभक्षणे॥ज्ञात्वाचद्विकरंत
वरोषसंरक्तलोचनः॥२९॥उवाचमातरंक्रुद्धोभेदःकिंक्रियतेत्वया॥सावर्णि
कायचमहन्मह्यंदत्तंपयोल्पकं॥३०॥एवंमाभाष्यमाणंतांछायांपादेननाभ्यहन
द्यदि॥सापितंकुपिताशापंविससर्जशनिश्चरं॥३१॥पंगुत्वंगच्छमंदस्त्वंयत्पादा
ताडितात्वया॥अन्योन्यसंभवंशापंश्रुत्वाचकश्यपात्मजः॥३२॥शनिर्रुरोदतत्रै
वपितुरग्रेपुनःपुनः॥सांतयित्वासुतंतत्रतांप्रोवाचप्रभाकरः॥३३॥सूर्यउवाच॥

ब्र.सौ. पुत्रः कुपुत्रतां याति माता नैव कदाचन ॥ तस्मान्मम गृहे किं चिद्वर्त्तते विक्रिया
३२ त्मकं ॥ ३४ ॥ सत्यं वद ममाग्रे त्वं न चेद्भ्रष्टा भविष्यसि ॥ ॥ छायोवाच ॥ ॥ श्रूयतां ना
थ भगवान्संज्ञा देहमलोद्भवा ॥ ३५ ॥ मां निधाय गता संज्ञा पितृगेहे भयान्वि ॥ त
छाकर्ण्य गतः शीघ्रं विश्वकर्मनिकेतनं ॥ ३६ ॥ तत्रापि नैव दृष्टा सा ज्ञानदृष्ट्या व
लोकयन् ॥ गोकर्णे च समायाता यत्र सा तपसि स्थिता ॥ ३७ ॥ अश्विनी रूपणी ज्ञा
त्वा ह्यश्वरूपो भवद्रविः ॥ स्वनासिकां च कारासावश्विनी नामकां प्रति ॥ ३८ ॥ द्वयो
श्च नासिकायोगां गर्भौ तु त्रौ च भूवतुः ॥ अश्विनाविति विख्यातौ स्वर्वैद्यावश्विनी ३२
सुतौ ॥ ३९ ॥ तस्मिन्कोटेश्वयं शंभुः साक्षाद्गोकर्ण ईश्वरः ॥ आदिरासीदमेयात्मा पा
र्वत्या सहितः स्वतः ॥ ४० ॥ उवाच मुदितः शंभुर्वरं वरय सुव्रते ॥ सर्वमेव प्रदा

स्यामि यत्ते मनसि वर्त्तते ॥ ४१ ॥ अश्विनी रूपमत्रैव त्यज स्वस्त्व वपुस्तदा ॥ आदित्या
ना परो देवः श्रेष्ठो नास्ति त्रिविष्टपे ॥ ४२ ॥ ॥ संज्ञोवाच ॥ ॥ यदि देव प्रसन्नोसि पार्वत्या
सह शंकर ॥ अस्मिन्मनः स्थितं कार्यं भवद्भ्यां ज्ञायते खिलं ॥ ४३ ॥ परं त्वहं प्रपन्ना
स्मि शरणं वां महौजसौ ॥ न सहामि महातेजः सूर्यस्येति करोति किं ॥ ४४ ॥ सर्वे
षामपि भूतानां दुःसहा हि रवेः प्रभा ॥ तदर्थं क्रियतां यत्नः सूर्यसेवां करोम्यहं ॥
४५ ॥ नारीणां परमो धर्मः यत्स्वकान्तनिसेवनं ॥ तत्तेजन्बहुलं सामर्थ्यात्समीप
नगता स्म्यहं ॥ ४६ ॥ इत्थं निशम्य तद्वाक्यं पार्वती परमेश्वरौ ॥ सर्वान्देवान्स
माहूय ब्रह्मेंद्राद्या पुरोगमान् ॥ ४७ ॥ प्रपच्छ शंकरस्तत्र ब्रह्माणं नागतौ प्रतिः ॥ श्र
सा प्रत्याह तं विष्णुं विष्णुः प्रोवाच शंकरं ॥ ४८ ॥ ॥ विष्णुरुवाच ॥ ॥ नमस्ते देवदे

अ॰सो॰ ३३ शेशकरुणाकर ईश्वर ॥ भालनेत्र नमस्तुभ्यं गंगाधर नमोस्तुते ॥ ४९ ॥ नमस्ते
पार्वतीकांत नमस्ते वृषवाहन ॥ नमस्ते परमेशान नमस्ते विश्वभंजन ॥ ५० ॥
वयं ते भृत्यतां याताः पूताः स्म तव दर्शनात् ॥ यन्मस्तकाच्युता गंगा सर्वलोका
न्पुनाति सा ॥ ५१ ॥ यत्त्वया क्रियते देव तदस्माभिः कृतं खलु ॥ यत्त्वया न कृतं दे
व तदस्माभिः कृतं न हि ॥ ५२ ॥ ततः प्रसन्नो भगवान् शंकरश्चंद्रशेखरः ॥ वि
श्वकर्म्माणमाहूय सूर्यं प्रोवाच शंकरः ॥ ५३ ॥ शाणोद्भ्रामं प्रकर्त्तव्यं सूर्यरूपं ३३
विशेषतः ॥ विश्वकर्मन् कुरुष्व त्वं तेजःक्षीणं भवेद्यथा ॥ ५४ ॥ तथेत्युक्त्वा विश्व
कर्मा शाणोल्लिखं चकार ह ॥ सूर्यरूपं च गोकर्णतीर्थे संवत्सरे भवत् ॥ ५५ ॥
तेगते संवत्सरे तत्र तत्तेजः क्षीणतां गतं ॥ सौम्यरूपोऽभवत्सूर्यः संज्ञा प्रा

हतद्दाहरं ॥ ५६ ॥ संज्ञोवाच ॥ देवदेव जगन्नाथ कृपां कुरु ममोपरि ॥ सूर्य
तेजः परीक्षीणं पितरं वार्यतामिति ॥ ५७ ॥ त्वष्टारं वारयामास ददौ तस्यै व
रं शिवः ॥ शिवोवाच ॥ तव पुत्रद्वयं संज्ञे सर्ववेद्यो भविष्यथः ॥ ५८ ॥ त्वम
पि सर्वनारीणां पुत्रदात्री भविष्यसि ॥ रतेजः सवितुर्यच्च दलितं यत्त्वयाधुना ॥
५९ ॥ रंदलेति च तेनाम्ना रक्षापरा ते भविष्यति ॥ सूर्यरूपं त्वदीयं च कृत्वा वस्त्रमयं
स्त्रियः ॥ ६० ॥ एकाष्टकं पूजयंति तासां पुत्रप्रदा भव ॥ ६१ ॥ वंध्यानां काकवंध्या
नां प्रसीद त्वं सदानघे ॥ एतस्मिन्नंतरे तत्र छायापुत्रः शनैश्चरः ॥ ६२ ॥ महोजया
ह पार्वत्याः पतितो दंडवद्भुवि ॥ प्रसन्ना साभवत्तत्र ददौ तस्मै वरं परं ॥ ६३ ॥ ग्रहा
णामधिपस्त्वं हि भविष्यसि न संशयः ॥ गौतम उवाच ॥ एवं शिवो वरं दत्त्वार्धे

अस्रो·
३४

तर्थ्यानमवापतुः॥६३॥प्रणम्यशंकरंदेवाःसर्वेययुःस्वमालयं॥संज्ञयासहि-
तःसूर्यश्छाययाचसमन्वितः॥६४॥सूर्यलोकंगतःशीघ्रंपुत्रादिभिरलंकृतः॥
संस्थाप्यशिवलिंगानित्रीणितत्रप्रभाकरः॥६५॥यमेनापिकृतंतत्रतपः
परमदारुणं॥६६॥शनिश्चरेणतत्रैवकालिंद्याचतयापुनः॥कालिंदीप्राप
श्रीकृष्णंपतिंपरमपुरुषं॥६७॥एतत्तेकथितंसर्वंसूर्यकांतातपोबलं॥तस्य
तुश्रवणाद्राजन्सर्वपापक्षयोभवेत्॥६८॥अत्रस्थानानिदेवानांसर्वेषांसंति ३४
पार्थिव॥विष्णोश्चदेवदेवस्यब्रह्मणःपरमेष्टिनः॥६९॥कार्त्तिकेयस्यवीरस्य
जगवक्त्रस्यचानघ॥धर्मस्यक्षेत्रपालस्यदुर्गायाश्चमहामते॥७०॥गोकर्णे
शिवलिंगानिविद्यंतेकोटिकोटिशः॥असंख्यातानितीर्थानितिष्टंतिचपदेपदे॥

७०॥बहुनात्रकिमुक्तेनगोकर्णस्थानिपार्थिव॥सर्वाण्युत्तमानिलिंगानितीर्था-
न्यंभांसिसर्वशः॥७१॥गोकर्णेशिवलिंगानितीर्थानामपिभूरिशः॥वर्ण्यंते
चपुराराजन्पुराणेषुमहर्षिभिः॥७२॥सर्वेषांशिवलिंगानांसार्वभौमोम
हाबलः॥कृतेमहाबलःश्वेतस्त्रेतायामतिलोहितः॥७३॥द्वापरेपीतवर्णश्च
कलौश्यामोभविष्यति॥आक्रांतसर्वपातालंकुहरोपिमहाबलः॥७४॥प्राप्ते
कलियुगेराजन्मृतोमुक्तिंप्रयास्यति॥पश्चिमांबुधितीरस्थंगोकर्णंतीर्थ
मुत्तमं॥७५॥दक्षिणेवायुदेशेचप्रत्यक्षफलदायकं॥ब्रह्महत्यादिपापानिहं
तीतिकिमद्भुतं॥७६॥येचात्रपितृहंतारोयेचभ्रातृद्रुहःशठाः॥मातृद्रोहपरायेच
चपरदाररताश्चये॥७७॥येदुर्वृत्तादुराचाराःदुःशीलाःकृपणाश्चये॥लुब्धाःक्रूरा

अ.मा. राःस्वरामूहास्तेनाश्चैवातिकामिनः॥७८॥तेसर्वेप्राप्यगोकर्णंस्नात्वातीर्थजलेशु
३५ चा॥देवंमहाबलंदृष्ट्वाप्रयाताःशांकरंपदं॥७९॥शिवपूजाजपोहोमव्रतचर्याद्वि
जार्चनं॥यत्किंचित्क्रियतेतत्रतदनंतफलंभवेत्॥८०॥व्यतिपातादियोगेषुर
विसंक्रमणेषुच॥महाप्रदोषवेलासुशिवपूजाविमुक्तिदा॥८१॥माघमासे
पा.५ महापुण्यासाकृष्णचतुर्दशी॥शिवलिंगंबिल्वपत्रैर्द्रोणैर्भिंचचतुष्टयं॥८२॥अ
होबलवतीमायायथाशैवेमहातिथिः॥नोपास्यतेजायेगरणेमहामुक्तिप्रदा
जनैः॥८३॥उपवासोजागरणं सन्निधिःपरमेष्ठिनः॥गोकर्णेशिवलोकस्यमुन्द ३५
णांसोपानपद्धतिः॥८४॥शृणुराजन्नहमपिगोकर्णादधुनागतः॥उपास्यैनां
शिवातिथिंविलोक्यचमहोत्सवं॥८५॥अस्यांशिवतिथौसर्वेमहोत्सवदिदृक्ष

वः॥आगताःसर्वदेशेभ्यश्चतुर्वर्णामहाजनाः॥८६॥स्त्रियोवृद्धाश्चबालाश्च
चतुराश्रमवासिनः॥आगत्यदृष्ट्वादेवेशंलेभिरेकृतकृत्यतां॥८७॥तथाहम
पिसंप्राप्याऋषयश्चतथापरे॥राजर्षयश्चराजेंद्रसनकाद्याश्चऋषयः॥
८८॥स्नात्वासर्वेषुतीर्थेषुसमुपास्यमहाबलं॥लब्ध्वाचजन्मसाफल्यंप्रय
ताःसर्वेतोदिवं॥८९॥अधुनाद्यमहेंद्रेणजनकेनयुयुत्सुणा॥निमंत्रिता
हंसंप्राप्तोगोकर्णाच्छिवमंदिरात्॥९०॥प्रत्यागच्छन्नकिमप्यंगदृष्टमाश्चर्यंमम
हंपथि॥जातानंदेनमहताकृतार्थोस्मिमहामते॥९१॥ ॥इतिश्रीस्कंदपुरा
णेब्रह्मोत्तरखंडेगोकर्णवर्णनंनामचतुर्थोऽध्यायः॥४॥ ॥राजोवाच॥ ॥
किंदृष्टंभवताब्रह्मन्नाश्चर्यंपथिकुत्रच॥तन्ममाख्याहियेनाहंकृतकृत्यत्वमा

ब्र॰मो॰
३६

न्मुखं ॥१॥ गौतम उवाच ॥ गोकर्णादहमागच्छन्क्वापि देशे विशां पते ॥ जाते मध्या
ह्नसमये लब्धवान् विमलं सरः ॥२॥ तत्रोपस्पृश्य सलिलं विनीय च परिश्रमं ॥
सुस्निग्धशीतलां छायां न्यग्रोधं समुपाश्रयं ॥३॥ अथाविदूरे चांडालीं वृद्धां म॰
ध्यकृशाकृतिं ॥ शुष्कमुखीं निराहारां बहुरोगनिपीडितां ॥४॥ कुष्ठव्रणपरितांगीं
न्तत्क्रमिकुलाकुलं ॥ पूयशोणितसंमिश्रजरत्पटलसत्कटिं ॥५॥ राजयक्ष्मा
महारोगकं सरोधविद्धलां ॥ विनष्टदंतीमव्यक्तवाणीं मंदविलोचनां ॥६॥ क
रियष्टिधरां दीनां प्रस्खलंतीं पदे पदे ॥ विध्वस्तकेशावयवामपत्यमरणो ३६
न्मुखीं ॥७॥ एवं व्यथायुतां वीक्ष्य कृपयाहं परिप्लुतः ॥७॥ प्रतीक्ष्य कारणं तस्या
क्षणं तत्रैव संस्थितः ॥ अथांतरिक्षे पदवीं सिंचंतमिव रश्मिभिः ॥८॥ दिव्यं विमा

नमायांतमन्वितं शिवकिंकरैः ॥ सूर्यबिंबमिव प्रख्यं किंकिणीजालशोभितं ॥९॥
तस्मिन् स्थिताः शिवगणाश्चत्वारो दिव्यवर्चसः ॥ ते वै त्रिशूलखट्वांगटंकचर्मासि
पाणयः ॥१०॥ किरीटकुंडलभ्राजन्महाहिवलयोज्ज्वलाः ॥ विमानवरगांस्तां॰
स्तु वीक्ष्याहं विस्मयाकुलः ॥११॥ उपसृत्यांतिके वेगाद्दृष्ट्वा गगने स्थितान् ॥ न
तिपूर्वमहं तत्र तुष्टाव शिवरूपिणः ॥१२॥ नमो नमो वस्त्रिदशोत्तमेभ्यस्त्रिलो
चनश्रीचरणानुगेभ्यः ॥ त्रैलोक्यरक्षाकरणोद्युतेभ्य नमोस्तु चर्मासिगदाधरे॰
भ्यः ॥१३॥ विदिता हि मया यूयं हु महेश्वरपदानुगाः ॥ इयं चोलोकरक्षार्थं गतिरेव
न संशय ॥१४॥ अहोस्वित्सर्वलोकानामघौघहरणोत्सुकाः ॥ महाबलप्रसादेन म
महर्षिपथं गताः ॥१५॥ अहो भाग्यमहो भाग्यं मदीयं येन दर्शनं ॥ जातमत्रैव भ॰

श्रो. वतांशिवतत्स्वपुष्पतां॥१६॥इत्युक्तेमयितेतत्रप्रसन्नभवदेक्षणाः॥प्रहस्यप्रोचु
२७ रेवंमानेतुमिवशिवालयं॥१७॥देवगणाऊचुः॥॥शृणुगौतमभद्रंतेशिवरूपेणव
र्त्तसे॥जगत्यांसर्वभूतानामनुकंप्यसितेभवान्॥१८॥मुक्तोसित्वंनसंदेहोत
वचेतस्मिंशंकर॥नित्यंसंस्थितएवास्तिसांबोसौभालेलोचनः॥१९॥पूर्वंत्वमा
गतास्तत्रकैलाशेशिवसन्निधौ॥प्रोक्तंतदाशिवेनैवस्वेच्छतिष्ठतभूतले॥२०॥
भवतापविदग्धानांलोकानांशासनेनते॥मोक्षोपयनिमित्तेनतदस्माभिरुक्तं
पुरा॥२१॥एवंसंतितवेष्टाचेदन्यस्मिन्वरसंयुता॥वरंवरयसौम्यत्वंऽस्मत्तोय २७
द्वांछितंतव॥२२॥॥सूतउवाच॥॥इत्युक्तेषुचदेवेषुगौतमकरुणाकरः॥प्रोवाच
चतुरंवाक्यंपरोपकृतिसंयुतं॥२३॥दृष्ट्वापुरःस्थितांतांतुचांडालींदीनमानसां॥

कृपयापरयाविष्टोहृष्टःशंकरनादितः॥२४॥॥गौतमोवाच॥॥यदिप्रसन्नाःयूयं
मांवरंयच्छथमामिमं॥येनाहंभूतलेनुनंस्वार्थनामभवामिच॥२५॥इमांनि
ष्पथचांडालींविमानस्थांशिवांतिके॥अल्पपुण्यापिरुद्धांतांशिवरात्रिंमुपोषि
णी॥२६॥जीर्णवस्त्रांगताहारांमहारोगैर्वृतांबहु॥॥देवाऊचुः॥॥जन्मजन्मांत
रेड्तमेतस्याःपातकंत्वया॥२७॥ज्ञातमस्तिनवाब्रह्मन्पुण्यंवापुण्ययोषि
तः॥वयंतेतुसमायाताःशिवयात्रापरान्जनान्॥२८॥बद्धंल्यपुण्यपापा
नांविचारपरयावयं॥शिवाज्ञयाप्रेरितत्वाच्छिवस्थानात्समागताः॥२९॥अस्य
पापस्यपापंर्वैवृत्तुंकुंनालंयमोपिस्मिन्॥कथंनेष्यामहेसौम्यपुण्यमस्याश्चव
र्तते॥३०॥त्वमपिज्ञानवान्तोजानानास्यैवाखिलंमुने॥॥गौतमउवाच॥॥

श्लो. किं कृतं पापमनया चांडाल्या पापरूपया ॥ ३१ ॥ पुण्यं च वद यत्नात्वं वा श्रोतुमिच्छामि
३८ सांप्रतं ॥ सूत उवाच ॥ एतस्मिन्नंतरे तत्र तु देवं ब्रुवति सति ॥ ३२ ॥ तस्य पापस
मुद्रो वैकल्यरूपधरस्तदा ॥ द्वित्रिपात्स्य च हस्तश्च सप्तनेत्रो दुरासदः ॥ ३३ ॥ लोल
जिह्वः पिबन्ब्रुवति सति ॥ ३२ ॥ तस्य करालस्यादीर्घश्मश्रूर्जटाधरः ॥ खड्गहस्तो म
हाक्रूरः पूर्वजन्मन्युपार्जितः ॥ ३४ ॥ स एवैनत्स्वरूपेण चांडाल्या दूरतः स्थितः
॥ स्पृष्टं त्राशाकनतदा मंत्रबद्धो यथोरगः ॥ ३५ ॥ तस्य भस्मीगतो देहो मस्तके
न बहिर्हि स्थितः ॥ श्रावितं वचनं दूरात् ब्राह्मणं पुष्करो यथा ॥ ३६ ॥ चांडाली पा ३८
पसंघोसौ प्रोवाच भयविह्वलः ॥ पापसंघ उवाच ॥ शृणुध्वं भो महाभागाः
शंकरप्रीतिवर्द्धनाः ॥ ३७ ॥ धर्माधर्मविचारज्ञाः सारासारविचारणाः ॥ करु

णासिंधवो यूयं शिवलोकात्समागताः ॥ ३८ ॥ रूपं द्रष्टुं न शक्तोस्मि तस्माद्दुर्मि
गतोस्मि वै ॥ प्रयोजनात्समायातः संशयोस्ति महान्मम ॥ ३९ ॥ पुरः स्थयानया
नूनं निर्मितोहं पुरा भवे ॥ चांडाल्या पापरूपिण्या मात्रास्य त्रीपरेछया ॥ ४० ॥ शत
वर्षं तया सार्द्धं संस्थितोस्मि पदे पदे ॥ गोकर्णेश्वरयात्रायां यदा लोका गतास्त
दा ॥ ४१ ॥ तस्मिन्सार्थे च भिक्षार्थं न च बुध्या जगाम सा ॥ भ्रमंती दूरतस्तत्र याच
मानामुहुर्मुहुः ॥ ४२ ॥ न भावो न व्रतं तस्या नोपवासो न पूजनं ॥ उदरस्यैव
पूर्त्यर्थं सापि नित्यं सुदुर्लभा ॥ ४३ ॥ एवं कृत्वागता दुष्टा यात्रया सह लोभतः ॥ ततो
तोयेवितलेचैवतिष्ठत्यंबासमन्वितः॥शंकरःसगणस्तत्रस्वेच्छयाभक्त
पालकः॥१०॥उमयासहभूतात्माक्रीडासक्तमनाःशिवाः॥राजतेभवपाप
घ्नोदैत्यशासनतत्परः॥११॥दंपतीसंगसंजातवीर्यभूतमहानदी॥हाट
कीतिप्रवहतीकार्त्तस्वरमयीचसा॥१२॥वायुनाप्रेरितोवह्निःशिववीर्यं
पिबत्यसौ॥पुनर्वमतियद्वीर्यंयातितेनैवहाटकी॥१३॥हाटकीरसमादा
यबध्वातस्यगुटींशुभां॥महौषधीविभागेनवदैनेधारयंतिये॥१४॥तेषांस्य

त्कामगं रूपं विहारश्च वने ॥ सप्तपातालपर्यंतं गतिरागमनं पुनः ॥ १५ ॥ ग
जलस्थो भवत्येव वदने गुटिका युते ॥ इति कामसमं रूपं विहारार्थं प्रजा
यते ॥ १६ ॥ गंगा भोगवती तत्र सप्तपातालगामिनी ॥ वर्त्तते पाविनी देवी स
हस्रवदना सती ॥ १७ ॥ तत्र ये शिवभक्ता वै तेषां सर्वं प्रजायते ॥ विमुखा शि
वपूजायां तेषां दुःखं पदे पदे ॥ १८ ॥ एवं विविधमायो यं जीव एव न संशयः ॥
यन्मस्तके शशिः सदा प्रकाशयति सर्वतः ॥ १९ ॥ सूर्यस्तु नयने तिष्ठन् स्वेच्छ
यात्नुते दिनं ॥ लोकानां शिवभक्तैव जीवनं वर्त्तते खलु ॥ २० ॥ एवमुक्तव
ती सर्पराजपुत्री इति विस्मितः ॥ पुनः पप्रच्छ फणिनं विनयानतकंधरः ॥ २१ ॥
चित्रांगद उवाच ॥ केन कर्मविपाकेन सप्तपातालगा इमे ॥ त्यक्त्वा भुवं त

याः स्वर्गं निवसंति च तद्वद ॥ २२ ॥ तक्षक उवाच ॥ सत्वं रजस्तम इति प्रकृत्या
जनिता गुणाः ॥ तदधिकालयोगेन मरणावसरे नृप ॥ २३ ॥ सत्वेधिके मृतो
यस्तु स्वर्गगामी भवेच्च सः ॥ रजोधिके मनुष्यत्वं भवत्येव न संशयः ॥ २४ ॥
तमाधिके भवंत्येव सर्वेः पातालवासिनः ॥ सत्वप्रधानतपसा स्वर्गराज्य
मवाप्नुयात् ॥ २५ ॥ रजःप्रधानतपसा राजा भुवि भवेज्जनः ॥ तमःप्रधान
तपसा पातालप्रभुता भवेत् ॥ २६ ॥ सत्वस्थः कुरुते पापं मानवो जायते
भुवि ॥ रजस्थः कुरुते पापं पाताले क्रूरतां व्रजेत् ॥ २७ ॥ तमस्थः कुरुते पा
पं नरो निरयमाप्नुयात् ॥ तमस्थः कुरुते पुण्यं तदा मायुष्यमाप्नुयात् ॥ २८ ॥
रजस्थः कुरुते पुण्यं देवयोनित्वमाप्नुयात् ॥ सत्वस्थः कुरुते पुण्यं मोक्षमा

गानिभवेन्नरः॥२९॥उच्चावचेषुभूतेषुगतिरुच्चावचास्मृता॥कर्मैकंव
न्नैतेन्नृणांगुणैर्बहुविधंभवेत्॥३०॥कर्मणावासनायोगाद्बहुधागतिरि
ष्यते॥शेषोत्रनसमर्थोस्यात्कर्मणांगतिवर्णने॥३१॥तमःप्रधानास्त्वयं
केनचित्पुण्ययोगतः॥राज्यास्यदत्वमापन्नाःपातालतलवासिनः॥३२॥
ममैकोनुग्रहोराजन्नारदेनकृतःपुरा॥शिवपंचाक्षरीविद्यामह्यंदत्ताद
यावता॥३३॥तस्याधारणामात्रेणदग्धान्यपिजनान्बहून्॥निमित्तदोषजनि
ताहत्यामांबाधतेनहि॥३४॥अनयाविद्ययाराजन्करकंकणतांशिवः॥क
रिष्यतिकृपानाथप्रतिज्ञातंशिवेनतत्॥३५॥हाटकेश्वरनाथस्यदर्शना
र्थंमयानृप॥उद्यमश्चकृतःपूर्वंतेनतुष्टोस्तिशंकरः॥३६॥ॐअथत्रती

येभुवनेसुतलाख्येवसन्बलिः॥राज्यंकरोतिधर्मात्मायस्यद्वास्थोस्तिवाम
नः॥३७॥एकदारावणस्तत्रविजयार्थंसमागतः॥वामनेनपदांगुष्ठात्क्षिप्तो
गाद्यौजनंचित्रिंशत्॥३८॥गदापाणिंहरिंतत्रपूजयन्शिवमर्चयन्॥चिंताम
णिमयंतत्रवामनप्रेरितस्थितः॥३९॥ततःसुतलतोधस्तात्तलातलप
तिःस्वयं॥मायाविमयनामासौसंस्थितःप्रणमन्शिवं॥४०॥त्रिपुरासुरसंग्रा
मेत्रिवाह्लब्धवरोमयः॥त्रिपुरेणकृतामायामयेनसंहताखिला॥४१॥प्री
तःप्रभुर्वरंप्रादान्मयायतेनकर्मणा॥गच्छदानवदायादतलातलविभूर्भ
व॥४२॥सुदर्शनभयंतस्यजायतेनकदाचन॥एकदाविष्णुनाहूतोनागतो
मदयोगतः॥४३॥तदासंप्रेरितंचक्रंरक्षितंशंकरेणतत्॥४४॥द्वारराज्येम

ब्र॰लो॰ १२२

तिलिंगानांमूलानीतत्रसंतिहि॥ तत्रासोरवैचनांकृत्वाद्वादशादीपसन्निभाः॥
॥४५॥पूजयत्वन्प्रत्यहंपुष्पैधूपदीपैःफलादिभिः॥सलोकपरयाभक्त्याविश्व
नाथंविशेषतः॥४६॥सप्तपातालमूलानिज्योतिर्लिंगानिसर्वशः॥विस्तारा
यामकंवक्तुंनसमर्थेस्वयंहरिः॥४७॥मयेनरचितास्तत्रमहत्योरत्नरंजिताः॥
नगर्योद्वादशास्थानेःज्योतिर्लिंगसमीपगाः॥४८॥विश्वनाथस्यनिकटेनिर्मितं
मौक्तिकंपुरं॥वैजनाथसमीपेतुसर्वरोगहरंपुरं॥४९॥रामनाथस्यमूलेतुरा १२२
मानंदपुरंमहत्॥केदारमूलसस्यत्र्यैरत्नकृत्रिमसंज्ञिकं॥५०॥त्र्यंबकस्यत
लस्यशंदीर्घदुःखहरंपुरं॥ॐकारमूलतलगंतारकाख्यंपुरंमहत्॥५१॥मल्लि
कार्जुनसान्निध्येपुरंनिलमणिप्रभं॥घुघुश्मस्यमूलतलगंरत्नदीपाख्यमु

त्तमं॥५२॥महांकालसमीपेतुकालकीर्तिहरंशुभं॥भीमाशंकरसंयोगंभी
मभीतिविनाशनं॥५३॥सोमनाथस्यमूलेतुपुरंसावंशुभावहं॥नागनाथ
स्यसंयोगेनागदर्शनमेवच॥५४॥गंगाप्रवाहनिकटेरत्नसोपानपद्धति॥
तीरेतीरेप्रदीपाश्चरचिताहिमयेनच॥५५॥येयेदानवदायादाःशिवपादा
र्चनेरताः॥तेसर्वेमरणांतेचशिवकैलाशवासिनः॥५६॥तमःप्रधानयो
गेनतपस्तप्त्वाहगात्मुनः॥अतस्तलातलेवासस्तेषांराजकुमारक॥५७॥सरां
सितत्ररम्याणिविविधावनवाटिकाः॥बहूनिगिरिमूलानिकूटानिमणय
स्तथा॥५८॥शिवलिंगप्रसादेनतमस्तत्रनविद्यते॥संख्याहीनेकृतंकर्मत रंभा
स्मात्तत्रवर्त्तेतेस्थाप्यस्थितिर्नृणां॥५९॥पक्षिणस्तत्रवर्त्तेतेमप्तस्वरविशारदाः

ब्रसो. तलानानांस्वरूपाणिनतत्तुल्यानिभूतले॥६०॥अतःपरंप्रवक्ष्यामियत्तोधस्ता
१२३ न्महातलं॥इदमेवहितल्लोकमावयोयत्रसंगमः॥६१॥पंचमंभुवनंप्रोक्तंम
हातलमनामयं॥वेष्टितंसर्पवर्गेणराजन्नस्याविधोस्पृहं॥६२॥रमणीयतरा
अत्रप्रसादाःसूर्यवर्चसः॥सरांसिवनवाप्यश्चहंसकारंडवादयः॥६३॥अन्ये
जलचराश्चैवनिवसंतिविशेषतः॥गुहाश्चबहुधासंतिरमणीसुखमुत्तमा
॥६४॥द्विविधंरूपमस्माकंसंयामसुरतादिषु॥केषांचित्तुतदेवास्तिनिर्मितं
विधिनाचयत्॥६५॥किंकिंपश्यसिराजेंद्रनास्माकंसुखमुत्तमं॥यत्रयाःसं १२३
स्थितस्तस्यत्तुद्वंस्वर्गायतेस्थलं॥६६॥यच्चित्तंयत्रसंलग्नंतत्रतत्सुखमाप्यते
॥नलग्नंचेद्यथाचित्तंशुभेवास्यादनर्थकं॥६७॥अतोधस्तात्प्रवक्ष्यामिरसा

तलमनुत्तमं॥षष्ठंभुवनमित्युक्तंदैत्यानांयन्निकेतनं॥६८॥देविसंग्रामतोनष्टा
येदैत्याःशुभवंशजाः॥महिषासुरवंशस्यामौर्यवंशाश्चकेचन॥६९॥कालके
याश्चतत्रैववद्धोहत्याद्यामहासुराः॥वृषपर्वादयःकेचित्तेशुक्रेत्रिविष्टपे॥७०॥
निवातकवचाश्चैवनिवसंतिरसातले॥अर्जुनेनहतायेवैतेषांमध्येस्थिता
श्चये॥७१॥पणयोनामतेप्रोक्तानिवातकवचादयः॥देवशुनीतुसरमाप्रेरितें
द्रेणसायदा॥७२॥संधार्यंदेवदैत्यानांरसातलमवापसा॥निवातकवचास्त
त्रपणाबंधतयास्थिताः॥७३॥गावधंपणयोजुयमित्युक्तातदेधेचसा॥बिभ्य
तीतद्दिनारभ्यपणयोदर्शनात्ततः॥७४॥सरमादर्शनंदृष्ट्वाबिभ्यंतिपणयोनि
शं॥वानराइवसमरात्पलायनपरायणाः॥७५॥तत्रापिपूज्यतेशंभुःसप्तपा

ब्रह्मो.
१२५

तालमूलगः॥ज्योतिर्लिंगस्वरूपोसौभक्तार्थंबहुधागतः॥७६॥ततोधःसप्तमंप्रो
क्तंपातालंमुनयोनृपः॥वासुकीप्रमुखायत्रनागाश्चनिवसंतिहि॥७७॥वासु
किःशंखचूडश्चकर्कोटकधनंजयौ॥श्वेतशंखोगुलिकश्चबलाश्वतरौवच॥
७८॥धृतराष्ट्रोदेवदत्तइत्याद्यानागनायकाः॥केचित्तुसप्तशीर्षाणःपंचत्रिदश
मस्तकाः॥७९॥स्वमणिद्योतितदिशोरविंदुःसमकांतयः॥शिवंभजंतितेसर्वे
कामरूपधराःनृप॥८०॥नागिण्यश्चमहाभागापातिव्रत्यपरायणाः॥रूपेणा १२५
प्रतिमाःसर्वाभूषयंतीविभूषणाः॥८१॥शक्तिपूजारताःकाश्चकाश्चशंभुर
तासदा॥विष्णुसेवारताःकाश्चपूजयंतुसुभक्तितः॥८२॥वायुभक्ष्याःस्वरूपे
णकामरूपायथेच्छया॥शिवहाटकवीर्येणकामरूपाभवंतिते॥८३॥अतोध

स्तात्प्रवक्ष्यामिशेषस्थानकमुत्तमं॥येनेयंधारिताभूमिःसप्तपातालसंयु
ता॥८४॥त्रिंशत्सहस्रसंख्याकयोजनांतरतस्थितः॥सहस्रफणवान्शेषः
सहस्रद्वयजिह्ववान्॥८५॥मध्येनशिरसाभूमिधृतासर्षपसन्निभा॥शिवरू
पस्वयंसाक्षात्स्वकीयातामसीकला॥८६॥संकर्षणमुखोद्भूतंज्वलयाभुवनत्र
यं॥संध्याकालेविधेर्नूनंभस्मभूतंभविष्यति॥८७॥सेवितोनागपत्नीभिर्नाना
गंधविमिश्रितैः॥चंदनैर्धूपदीपैश्चनैवेद्यादिभिरादरात्॥८८॥नाविद्यतेजराय
त्रनरोगोनपराभवः॥कूर्मपृष्ठेस्थितःकेचित्इतिकेचित्इतिकेचित्प्रचक्षते
॥८९॥वाराहेणधृतःकूर्मोवाराहस्तुस्वयंहरिः॥श्वेतहंसोभवद्ब्रह्मावाराहश्च
तथाहरिः॥९०॥द्वावपिहरलिंगाग्रंज्ञातुंयातौकृतोद्यमौ॥अत्रांतरिक्षेचगतौ॥

ब्र॰मो॰ १२५

हंसरूपेणवेगतः॥ ९१॥ विष्णुर्वराहरूपेणासप्तपातालमाविशत्॥ शतवर्षांतरं
गतौ तौ लिंगांतं जग्मतुर्नहि॥ ९२॥ तदाप्रभृतिलोकेस्मिन्श्वेतवाराह उच्यते॥ क
ल्पोयंश्वेतवाराहसंज्ञयाभुविपठ्यते॥ ९३॥ एवंविभूतिरीशस्य वर्त्ततेविविधा
नृप॥ योसौहरोहरीसोयंयोहरिस्सविधिःस्मृतः॥ ९४॥ एकरूपंत्रिधाभिन्नंगु
णयोगेणब्रह्मणः॥ ब्रह्मरूपः शिवः साक्षाद्ब्रह्मरूपोहरिस्स्वयं॥ ९५॥ उभयोरं
तरंनास्तिविष्णोश्चैवहरस्यच॥ इत्येववर्णितंतात्वयापृष्टंमयाधुना॥ ९६॥ त्व
मपिवदकल्याणकर्मकिंतवभूतले॥ कुर्वंतिचनरानार्योयत्कृत्वामोक्षमा १२५
प्नुयात्॥ ९७॥ पृथिव्यानवखंडानिवर्त्ततेतत्रकिंवरं॥ सर्वदेवेषुकोदेवोयु
ष्माभिः पूज्यतेसदा॥ ९८॥ इतिराजसुतज्ञानंज्ञात्वावैतक्षकोब्रवीत्॥ चंद्रांग

दोपिधर्मात्मास्मरन्शिवमथाब्रवीत्॥ ९९॥ राजपुत्रोवाच॥ योदेवः सर्वदेवे
षुमहादेवइतिस्मृतः॥ पूज्यतेसहिविश्वात्माशिवोस्माभिरुमापतिः॥ १००॥ य
स्यतेजोंशजेशस्यरजसाचप्रजापतिः॥ कृतरूपोसृजद्विश्वंसनःपूज्योमहे
श्वरः॥ १॥ यस्यांशंसात्विकंदिव्यंबिभ्रद्विष्णुसनातनः॥ विश्वंबिभर्त्तिविश्वात्मा
सशिवोस्माभिरीज्यते॥ २॥ यस्यांशात्तमसोजातोरुद्रःकालाग्निसन्निभः॥ विश्व
मेतद्हरत्यंतेसपूज्योनः सदाशिवः॥ ३॥ योविधाताविधातुश्चकारणस्यापिका
रणं॥ तेजसांपरमंतेजः सशिवोनःपरागतिः॥ ४॥ योग्नौतिष्ठतिभूमौयोयोवा
यौसलिलेचयः॥ यआकाशेचविश्वात्मासपूज्योनःसदाशिवः॥ ५॥ योंतिकः
स्थोपिदुरस्थोमायोपहतचेतसां॥ अपरिछेद्यधामासौसशिवोनःपरंपदं॥ ६॥

ब्र॰स्रो॰ यःसाक्षिसर्वभूतानांयआत्मस्थोनिरंजनः॥ यस्येछावशगोलोकःसोस्माभिः
१२६ पूज्यतेशिवः॥७॥ यमेकमाद्यंपरमंपुराणंवदंतिभिन्नंगुणवैकृतेन॥ क्षेत्रज्ञ
मेकोथतुरीयमन्येकूटस्थमन्येसशिवोगुरुर्नः॥८॥ यंनस्मरंत्येनमचिंत्यतत्
त्वंदुरंतधान—मतत्त्वरूपं॥ मनोवचोवृत्तयआत्मभाजंसएवपूज्यःपरमःशि
वोनः॥९॥ यस्यप्रसादंप्रतिलभ्यसंतोवांछंतिनेंद्रपदमब्जजंवा॥ निस्तीर्णक
र्मार्गलिकालचक्राश्चरंत्यभीताःसशिवोगतिर्नः॥१०॥ यस्यस्मृतिःसकलपापरु
जांविघातंसद्यःकरोतिभजतांनिजतुल्यरूपं॥ यस्यस्वरूपमखिलंस्मृतिभिर्वि १२६
मृग्यंतस्मैशिवायप्रणताःकरवामपूजां॥११॥ यन्मूर्ध्निलब्धनिलयासुरलोक
सिद्धायस्यांगनाभगवतीजगदंबिकाच॥ यत्कुंडलेविमलतक्षकवासुकियेय

कंठभूषणमिदंगरलंकरालं॥१२॥ यद्भाललोचनमसौज्वलनंप्रचंडसोस्माकमे
वगतिरर्द्धशशांकमौलिः॥ यन्नेत्रतामुपगतौशशिभास्करौचतंदेवदेवमनि
शंहृदिभावयामः॥१३॥ जयतिनिगमचूडाग्रेषुयस्यांघ्रिपद्मंजयतिसदसिनि
त्यंयोगिनांयस्यकीर्त्तिः॥ जयतिसकलतत्वादूर्ध्वगायस्यमूर्त्तिःसवितरसुरत्रातु
पूज्यतेस्मात्गिरिशः॥१४॥ इमंस्तवंयःपरिशुद्धचेताश्रृणोतिनित्यंशिवबोधरूपं
॥ किंत्वस्थिरायुःकिलमुक्तिमन्येभुक्त्वैवभोगान्सनरःप्रयाति॥१५॥ ॥इति
श्रीस्कंदपुराणेवृहद्ब्रह्मोत्तरखंडेसप्तपातालवर्णनोनामाष्टादशोऽध्यायः
॥१८॥ ॥सूतउवाच॥ ॥इत्याकर्ण्यवचस्तस्यतक्षकःप्रीतमानसः॥ जातःप्रीतिम
हादेवेराजपुत्रमभाषत॥१॥ ॥तक्षकउवाच॥ ॥परितुष्टोस्मिभद्रंतेतवराजेंद्र

श्रहो· नंदन॥बालोपियत्परंतत्त्वंवेत्सित्वंपरात्परं॥२॥एषरत्नमयोलोकोहता
१२७ श्चारुदृश्योऽबलाः॥एतेकल्पद्रुमाःसर्वासर्वावाप्योरसांभसाः॥३॥नात्रमृत्यु
र्भयंघोरंनजरारोग्यपीडनं॥यथेष्टंविहरात्रैकोभुंक्ष्वभोगान्यथेप्सितान्॥४॥
इत्युक्तोनागराजेनसचराजकुमारकः॥प्रत्युवाचपरंप्रीत्याकृतांजलिरुदारधीः
॥५॥कृतदारोस्म्यहंकालेसुव्रताग्रहणीमम॥शिवपूजापरानित्यंपितरावेकबा
लकौ॥६॥तेतदामांमृतंज्ञात्वाशोकेनमहतावृता॥प्रायःप्राणैर्वियुज्यंतेदैवा
त्प्राणान्विहंतिवा॥७॥अतोमयाबहुतिथंनात्रस्थेयंकदाचन॥केनचिद्दैवयो १२७
गेननौकाभ्रष्टःसमागतः॥८॥पालितोहंपन्नगाभिर्जलस्तंभनविद्यया॥यद्भा
वितद्भवत्येवनात्रकार्यविचारणा॥९॥त्वयासंभाविताश्चाहंपालितोस्मिचपुत्र

वत्॥गंतुमिच्छामिस्वंगेहंभवतांचेत्कृपाभवेत्॥१०॥सार्थकानभवत्येवनित्यंनि
घ्नमनोरथ॥बलिष्ठंचेद्भवेद्भाग्यंतदाहितमवाप्यते॥११॥नाहंजानामिनागेंद्रमा
र्गंवास्वगृहंप्रति॥त्वमेवबालकृपयामांप्रापयितुमर्हसि॥१२॥अस्मत्पितामहा
हीनात्रारण्याःपन्नगाःखलु॥नलायवरदोदानासीत्कर्कोटकइतिश्रुतं॥१३॥इ
तुदीर्यस्थितोराजातस्मिन्नेवक्षणांतरे॥कर्कोटकस्समायातःसपुत्रस्तक्षकाज
यं॥१४॥तक्षकोदितमाकर्ण्यततःकर्कोटकोब्रवीत्॥नयैनंममपुत्रेणपालितं
स्वगृहंप्रति॥१५॥चित्रांगदस्यदायादैर्बलेनगृहितंपुरं॥बंदीकृतौतत्पितरौतस्मा
च्छीघ्रंविसर्जय॥१६॥सूतउवाच॥॥कर्कोटकःस्वकंपुत्रंमुक्त्वाशीघ्रंजगाममहा
कार्यार्थीवासुकेस्तस्मात्कृत्वाकार्यंचपन्नगः॥१७॥तथैवतक्षकोपिमहानागःप्रस

श्रे॰सो॰
१२८

त्रवदनस्तदा॥भोजयित्वापरान्नेनराजपुत्रंसुवाससा॥१८॥भूषणानिविचित्राः
णिरत्नानिविविधानिच॥शुभंचौषधिवर्गंचप्रीत्यादात्पन्नगेश्वरः॥१९॥पुनश्च
राजपुत्रायतक्षकोश्वंचकामगं॥नानाद्वीपसमुद्रेषुलोकेषुक्षणगामिनं॥२०॥
एकंचराश्वंसंप्रीत्यासेवार्थंबलवत्तरं॥तत्सहायार्थमेकंचककोटककुमार
कं॥२१॥सर्पविषहरांविद्यांददौसन्नृपनंदने॥उत्थायतक्षकःप्रीत्यागच्छराजकु
मारक॥२२॥प्रयाणवेलासमयेनृपस्यपुनर्वभाषेभुजगाधिराजः॥यदायदामां
स्मरसित्वद्येतदातदाविःक्रियतेमयैव॥२३॥अतःपरंवेछ्मिराजपुत्रक्षणेन १२८
पातालतलेपिगंतुं॥विलोकनार्थंशिवपादमूलमस्यस्थितोयाहिपुनःस्वगे
हं॥२४॥श्रीहाटकेशंचविलोक्यराजन्विशेषतस्त्वंवितलस्थितंतं॥मांद्रष्टुका

मोसियदातदात्वमागत्यवास्यंभनविद्ययात्र॥२५॥स्वस्त्यस्तुतेप्रीतिवियोगमा
गाभवत्त्वंशिवपूजकानां॥इत्येवमुक्त्वानिजधामनागोजगामराजातुरगाधिरूढ
॥२६॥इतिचंद्रांगदःसर्वंकृत्वातुक्षतकसहृचः॥क्षणाज्जगामपातालेदृष्ट्वाश्चर्य
मवापह॥२७॥शेषादिसर्वमालोक्यनत्वाशिवपदांबुजं॥हाटकेश्वरमासाद्यज
हौतापंविशेषतः॥२८॥हृष्टःसर्वविशेषेणसंगृह्यविविधंधनं॥अश्वंकामगमा
रुह्यताभ्यांसहविनिर्ययौ॥२९॥तृतीयेवत्सरेराजापुनरेवसमागतः॥सूर्याभा
वतयातत्रनज्ञातंकालक्षणं॥३०॥समुद्र्गेदिवोन्मज्ज्यतस्मादेवनदीजलात्
विजहारतटेरम्येदिव्यमारुह्यवाजिनं॥३१॥अथास्मिन्समयेतत्रतन्वीसाचसी
मंतिनी॥स्नातौसमाययौतत्रसखीभिःपरिवारिता॥३२॥सादद्दर्शनदीतीरेवि

ब्र॰सो॰ १२९

हरंतं नृपात्मजं ॥ रक्षसा नररूपेण नागनागपुत्रेण चान्वितं ॥३२॥ सूर्यकीर्णप्र
तिकाशां दिव्यमाल्यावतंसकं ॥ देहेन दिव्यगंधेन व्याप्तदशयोजनं ॥३३॥ त
मपूर्वाकृतिं वीक्ष्य दिव्यमश्वाधिसंश्रितं ॥ जडोन्मत्तेव भीतेव तस्थौ तन्न्यस्त
लोचना ॥३५॥ तां च राजेंद्रपुत्रोसौ दृष्टपूर्वामिव स्मरन् ॥ विमुक्तकंकणाभरणां
कंठसूत्रादिवर्जितां ॥३६॥ असंयतधम्मिल्लामंगरागविवर्जितां ॥ त्यक्त
नीलांजनापांगीं कृशांगीं शोकदुःखितां ॥३७॥ दृष्ट्वावरुह्य तुरगादुपविश्य स
रिज्जले ॥ तामाहूय वरारोहामुपाविश्येदमब्रवीत् ॥३८॥ कात्वं कस्य कलत्रं
वा कस्यासि तनया सती ॥ किमिह त्वं गता बाल्ये दुर्दर्श्यं शोकलक्षणं ॥३९॥
इति स्नेहेन सा पृष्टा तेनाभूद्दक्षलोचना ॥ लज्जिता स्वयमाख्यातुं तत्स- १२९

खी सर्वमब्रवीत् ॥४०॥ इयं सीमंतिनी नाम्ना स्नुषा निषधभूपतेः ॥ चंद्रांगदस्य
महिषी तनया चित्रवर्मणः ॥४१॥ अस्याः पतिर्दैवयोगान्निमग्नोस्मिन्महाजले
॥ तेनेयं प्राप्तवैधव्या बाला दुःखेन शोषिता ॥४२॥ एवं वर्षत्रयं नीतं शोके
नातिबलीयसा ॥ अद्यैतद्वासरे प्राप्ते स्नातुमत्र समागता ॥४३॥ श्वसुरोस्याः स
राजेंद्रो हृतराज्यश्च शत्रुभिः ॥ बलाद्गृहीतो बद्धश्च सभार्यस्तद्वशे स्थितः ॥४४
॥ तथाप्येषा शुभाचारा सोमवारे महेश्वरं ॥ अंबिकां परया भक्त्या पूजयंत्यम
लाशया ॥४५॥ सूत उवाच ॥ इत्थं सखीमुखेनैव सर्वमावेद्य सुव्रता ॥ त
तः सीमंतिनी प्राह स्वयमेव नृपात्मजं ॥४६॥ कस्त्वं कंदर्पसंकाशः काविमौ त
व पार्श्वगौ ॥ देवो नरो वा सिद्धो वा गंधर्वो वाथ किंनरः ॥४७॥ किमर्थं मम रत्नं

श्रीसो. तंस्नेहवानिवपृच्छति॥ किंमांवेत्सिमहाबाहोदृष्टवान्किमुकुत्रचित्॥४८॥दृ
१३० ष्टपूर्वइवाभासिममत्वंस्वजनोयथा॥ सर्वंकथयतत्वेनमत्प्रसादाद्धिसाधव॥
४९॥एतावदुक्त्वानरदेवपुत्रीसबाष्पकंठंसुचिरंरुरोद॥मुमोहभूमौपतिता
सखीभिर्धृतानकिंचित्कथितुंशशाक॥५०॥श्रुत्वाचचंद्रांगदःसर्वंप्रियायाः
मौने शोककारणं॥मुहूर्त्तमभवत्तूष्णींस्वयंशोकसमाकुलः॥५१॥अथाश्वास्यप्रि
यांसाध्वींविविधैर्वाक्यनैपुणैः॥सिद्धानामवयंदेवांकामगाइतिसोब्रवीत्
॥५२॥कापिलोकेमयादृष्टःस्तवभर्त्तावरानने॥त्वद्भर्त्तास्मरणेनैवनमृतोस्ति १३०
सरिज्जले॥५३॥अपनेष्यतितेशोकंद्वित्रैरेवदिनैर्ध्रुवं॥एतच्छ्रुत्वातुमायातर
स्तवभर्त्तुःसखास्म्यहं॥५४॥अत्रकार्योनसंदेहःशपामिशिवपादयोः॥इदंस

हृदयेस्याप्यनप्रकाश्यंकुतस्त्वया॥५५॥सेतितद्वचनंश्रुत्वासुधाधाराशताधि
कं॥संभ्रमोद्भ्रांतनयनातमेवमुहुरैक्षत॥५६॥प्रेमबंधानुगुणितंवाक्यंचाद्भु
रसायनं॥विभ्रमोदारसहितंमधुरालापवीक्षणं॥५७॥स्वपाणिस्पर्शनोद्भिन्नपु
लकांचितविग्रहं॥पूर्वदृष्टानिचांगेषुलक्षणानिस्वरंतथा॥५८॥वयःप्रमाणंसक
लंपरीक्ष्येत्यमतर्कयत्॥एषएवपतिर्मेस्यात्ध्रुवंनान्योभविष्यति॥५९॥अस्मि
न्नेवप्रसन्नंमेहृदयंप्रेमकातरं॥परलोकादिहायातःकथमेवंस्वरूपधृक्॥६०॥
मृतानांचनृणांनैवदर्शनंभुविजायते॥एवंवदंतिसर्वत्रकिमत्रकारणंभवेत्
॥६१॥दुर्भगायाःकथंमेस्याद्भर्त्तुर्नष्टस्यदर्शनं॥स्वप्नोयंकिमुतंस्वप्नोभ्रमोयं
किमुताभ्रमः॥६२॥एषधूर्त्तोथवाकश्चिद्यक्षोगंधर्वएववा॥मुनिपत्न्यायदुक्तंमे

ब्रह्मो. १३१ परमापकृतापि च ॥६३॥ व्रतमेतत्कुरुष्वेति तस्य वा फलमद्य मे ॥ यो वर्षायुतसौ
भाग्ययोममाहद्विजोत्तमः ॥६४॥ नूनं तस्य वचः सत्यं को विद्यादीश्वरं विना ॥ नि
मित्तानि तु दृश्यंते मंगलानि दिने दिने ॥६५॥ वामांगस्फुरणं प्रातः समुत्पन्नफलं
नु किं ॥ प्रसन्ने पार्वतीकांते किमसाध्यं शरीरिणां ॥६६॥ इत्थं विमृष्य बहुधा स्थिता
नृपसमागमे ॥ निःसंज्ञायार्थ नागेंद्र त्वं शंसेत्यब्रवीद्वचः ॥६७॥ नागः सत्रास
तां बालां शृणु मद्वचनं सती ॥ तवाद्य यं ते भर्त्तास्ति गुप्तोऽसौ त्रिदिनावधि ॥६८॥ १३१
यावद्वंधो विमोक्षेत पितरौ तौ ह्ययं विधिः ॥ शत्रुहस्तगतं राज्यं यावत्स्वाधि
नतां व्रजेत् ॥६९॥ तावत्त्वतीक्ष्य मातस्त्वं गच्छ भद्रे स्वकं गृहं ॥ कस्याप्यग्रे न व
क्तव्यमेकांतेमिदमुच्यते ॥७०॥ षट्कर्णो भिद्यते मंत्रश्चतुःकर्णो न भिद्यते ॥

द्विकर्णस्यापि मंत्रस्य ब्रह्माप्यंतं न गच्छति ॥७१॥ लज्जानम्रमुखी कर्णे नागेनो
क्ते वचस्यथ ॥ चित्रांगदोऽश्वमारूढो जवेनैव जगाम ह ॥७२॥ सखिभिः सहिताः सा
पि जगाम विगतज्वरा ॥ दिनेनैकेन राजासौ स्वराष्ट्रं प्रत्यपद्यत ॥७३॥ स पुरोप
वनाभ्यासे स्थित्वा तं फणिपुत्रकं ॥ विससर्ज्ज त्वदायादाः सिंहासनगतान्
प्रति ॥७४॥ स गत्वोवाच तान् क्षिप्रमिंद्रसेनो विमुच्यतां ॥ चंद्रांगदस्तस्य सुत
प्राप्तोयपन्नगालयात् ॥७५॥ नृपासनं विमुंचंतु भवंतो माविचार्यतां ॥ नो चेच्चं
द्रांगदस्याशु बाणाः प्राणान् हरंति वः ॥७६॥ समग्रोयमुना तोये गत्वा तक्षक
मंदिरं ॥ लब्ध्वा च तस्य साहाय्यं पुनर्लोकमिमं गतः ॥७७॥ न किंचित्तस्य न्यूनं
त्वं सैन्येषु च धनेषु च ॥ क्षणमात्रेण वोजेतास्मात्छाद्य माचिरं ॥७८॥ इत्यु

श्लो॰ १३२ ब्रुवतिनागेंद्रेसर्वेसंभ्रांतचेतसः॥प्रविमुच्यनृपंराज्ञीबंधनादिदमब्रुवन्॥७
९॥राजेंद्ररक्षसित्वंनःसापराधान्स्वकान्यदा॥तदातेविपुलाख्यातिर्भवि-
ष्यतिनसंशयः॥८०॥उपकारिष्वपकारंयः करोतिससाम्यभाक्॥अपका-
रिषुयःसाधुःसश्रेष्ठःसद्भिरुच्यते॥८१॥तस्माद्रक्षमहाराजनोचेत्कुर्मःपला-
यनं॥तवपुत्रभयादस्मादागतात्पन्नगालयात्॥८२॥चंद्रसेनइतिश्रुत्वादीनं
दायादजवचः॥नभेतव्यंममसुतात्स्थेयमत्रपुरेषुच॥८३॥यद्भावितद्भव-
त्येवनारिकेलफलांबुवत्॥गंतव्यंगच्छतीवाशुगजभुक्तकपित्थवत्॥८४॥ १३२
नकोपिदुःखदातावैसुखदोवानकश्चन॥दैवंहिकारणंमन्येसुखदुःखफला-
प्तये॥८५॥अथनागरिकाःसर्वेमंत्रिवृद्धाःपुरोधसः॥प्रत्युगम्यपरिष्वज्यतमानि-

न्युर्नृपांतिकं॥८६॥ततोत्सवेनमहताप्रविष्टोनिजमंदिरं॥राजपुत्रःस्वपितरौव-
वंदेबाष्पमुत्सृजन्॥८७॥तंपादमूलेपतितंस्वपुत्रंविवेदनासौपृथिवीपतिःस्व-
यं॥प्रबोधितौमात्यजनैःकथंचिद्दुःत्वायसक्लिन्नहृदालिलिंग॥८८॥मातुःप्र-
णम्यप्रणयेनपादौचंद्रांगदःप्रेमभराद्रचेताः॥स्त्रवस्तनीपुत्रमुखंनिपीय-
तातेतिप्रीत्योरुगतंचकार॥८९॥क्रमेणसर्वाननभिवंद्यवृद्धान्वद्धापितःपौ-
रजननागरीभिः॥आलिंगितःपौरजनाननशेषात्संभावयामाससराजसूनुः॥
॥९०॥तेषांमध्येसमासीनःस्ववृत्तांतमशेषतः॥पितृभ्यांकथयामासतक्ष-
कस्यचमित्रतां॥९१॥दत्तंभुजंगराजेनरत्नानिधनसंचयं॥दिव्यंतद्रक्षसा-
नीतंपितृभ्यांतन्निवेदयत्॥९२॥राजास्वपुत्रचरितंदृष्ट्वाश्रुत्वाचविह्वलः॥स-

माहूय शुरूं राजा ददौ दानान्यनेकशः ॥९३॥ तदोत्सवो महानासीद्राष्ट्रग्रामपुरादिषु
॥ चित्रवर्मा गृहे दूतं प्रेषयामास सत्वरं ॥९४॥ पुनरुद्वाहविधिना सुतामस्यैन्यवेद
यत् ॥ चंद्रांगदोपि रत्नौघैर्नानीतास्तक्षकालयात् ॥९५॥ नागेंद्रमित्रहस्तेन प्रिया
यै दत्तवानसौ ॥ अंगरागेन दिव्येन ताम्रकांचनशोभिता ॥९६॥ सुशुभ्रे सा सुगंधे
न दत्तायोजनमायता ॥ अम्लानमालया राज्ञी ह्यमकिंजल्कवर्णया ॥९७॥ कल्पद्रुमो
त्थया बाला सुशुभ्रे भूषिता सती ॥ एवं चंद्रांगदो पत्नीमवाप्य समये शुभे ॥९८॥
आमंत्र्य श्वसुरं राजा स्वसुरायमतिं दधत् ॥ नागेंद्रराज्ञसंतां चैव विससर्ज स्वकं १३३
गृहं ॥९९॥ मैत्रेयीपादपूजार्थं जग्मतुर्दंपती स्वयं ॥ सुगंधैः पूजयित्वा तां वासो
लंकरणादिभिः ॥१००॥ मिथुनं प्रणिपत्य पादमूलमृषिपत्न्यास्त्वनंचकारसौ

ण्यं ॥ जै गदं त्वमया कृतं तयोक्तं व्रतमेतस्य फलं समग्रमाप्तं ॥१०१॥ इतिनत्वा
स्थितं युग्मं प्रत्युवाच वचः सती ॥ अष्टपुत्रवती बाले भव कांतानुसेवया ॥१०२॥
यावज्जीवं कुरु व्रतमुद्यापनसमन्वितं ॥ तेन वां सत्फलावाप्तिर्भविष्यति न सं
शयः ॥१०३॥ नाख्येयं नास्तिकायाथ दुष्टायानृतभाषिणे ॥ नीचाचाराय च कदा
न देयमिदमुत्तमं ॥४॥ देयं श्रांताय शुद्धाय शिवसेवारताय च ॥ गुरुशुश्रूषवे दे
यमन्यथा विफलं भवेत् ॥५॥ कल्पवृक्षसमं चैतत्सौभाग्यव्रतमिदं स्मृतं ॥ सोमप्र
सोमायनं वत्से दिष्ट्या प्राप्तं त्वयानघे ॥६॥ पत्यासार्द्धं प्रणम्याशु पार्वतीप
मेश्वरौ ॥ गच्छ गेहं सुखं भुंक्ष्व कुरु पुण्यमनंतकं ॥७॥ सूत उवाच ॥ आशि
षः प्रतिगृह्याथ जग्मतुः स्वनिकेतनं ॥ सैन्येन पारिबर्हेण वेष्टितौ तौ चंद्रं

ब्रह्मो.
१२४

पती॥८॥एवंचित्रांगदोराजासीमंतीन्यासमन्वितः॥शिवव्रतप्रसादेनचक्रेरा
ज्यमकंटकं॥९॥इंद्रसेनोपिराजासौराज्येस्थाप्यस्वमात्मजं॥तपसाशिवमा
राध्यलेभेसक्रमनिगतिं॥१०॥दशवर्षसहस्राणिसीमंतीन्यास्वभार्यया॥सा
र्द्धंचंद्रांगदोराजाबुभुजेविषयान्बहून्॥११॥प्रसूततनयानष्टौकन्यामेक
वराननां॥रेमेसीमंतिनीभर्त्रापूजयन्श्रीमहेश्वरं॥१२॥विचित्रमिदमाख्या
नंमयैतदनुवर्णितं॥सकृत्श्रवणमात्रेणशिवेभक्तिर्हिजायते॥१३॥यःक
रोतितिव्रतंसम्यक्नरोवायोषितांगणः॥सोद्यापनविधानेनतेधन्याना
त्रसंशयः॥१४॥येषांश्रद्धाफलंतेषांश्रद्धाहीनेकुतःफलं॥श्रद्धयासफलं
सर्वंभवत्येवनसंशयः॥१५॥नह्यंमयानितीर्थानिनदेवामृच्छिलामयाः॥ १२४

श्रद्धैवकारणंतत्रसर्वशास्त्रेषुनिश्चितं॥१६॥श्रद्धयाधार्यतेधर्मःश्रद्धयाधार्यते
तपः॥श्रद्धयाप्राप्यतेलक्ष्मीश्रद्धयामोक्षमाप्नुयात्॥१७॥यथासीमंतिनीराज्ञीश्र
द्धयाप्रापसत्पतिं॥अन्यकौतुहलंतस्याःपूजाकालेसमुत्थितं॥१८॥युग्मपूज
नवेलायांनरोनारीत्वमाप्नुयात्॥स्त्रीवेशधारिणंविप्रंमत्वास्त्रीजगदंबि
कां॥१९॥सीमंतिनीराजभार्यापूजयामासवैयदा॥तदाकौतुहलंजातंश्रद्धा
भावेनपूजनात्॥२०॥कथामिमांयःशृणुयात्सदादरान्नरोथवायोषिदपिस्व
भावतः॥धर्मार्थकामंकिलमोक्षसंयुतंलभेच्छिवाराधनधूतकिल्बिषः॥२१॥
२ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेसूतशौनकसंवादेसोमवारप्रदो
षमहिमानिरूपणेएकोनविंशोऽध्यायः॥१९॥ ॥ऋषयऊचुः॥ ॥इदंतुकौतुकं

ब्रसो॰
१३५

सूतत्वयाख्यातंचयच्छ्रुतं ॥ श्रोतॄणांमुक्तिदंनूनंसोमवारव्रतंसदा ॥१॥
कथंकौतुहलंजातंसीमंतीन्याःशिवार्चने ॥ कोयंद्विजवरःसूतकथंस्त्रीवेष
मास्थितः ॥२॥ सकलंसकलार्थज्ञश्रद्धयाकथयस्वनः ॥ धन्याःशिवकथाःसू
तधन्योवक्तात्वमेवच ॥३॥ त्वत्कथामृतपानेनवयंधन्यानसंशयः ॥३॥ सूत
उवाच ॥ ॥ महद्भाग्यंभवेद्यस्यतस्यकर्णेकथामृतं ॥ तस्यचित्तेमहादेवोयो॰
भवेद्व्रतकर्षितः ॥४॥ शंभोःकथापदंश्रुत्वासर्वपापैःप्रमुच्यते ॥ शृणुध्वंकथ॰
क यिष्यामिकौतुहलंथानकं ॥५॥ विदर्भविषयेपूर्वमासीदेवद्विजोत्तमः ॥ वेद॰ १३५
मित्रइतिख्यातोवेदशास्त्रार्थवित्सुधीः ॥६॥ तस्यासीदपरोविप्रःसखासार॰
स्वताह्वयः ॥ तावुभौपरमःप्रीतावेकदेशनिवासिनौ ॥७॥ वेदमित्रस्यपुत्रो

भूत्सुमेधानामसुव्रतः ॥ सारस्वतस्यतनयःसामवानितिविश्रुतः ॥८॥ उभौ
सवयसौबालौसमवेशौसहस्थितौ ॥ समंचकृतसंस्कारौसमविद्यौबभूवतु
॥९॥ सांगवेदमधीयानौतर्कव्याकरणानिच ॥ इतिहासपुराणानिधर्मशास्त्रा॰
णिकृत्स्नशः ॥१०॥ सर्वविद्याकुशलीनौबाल्यएवमनीषिणौ ॥ प्रहर्षमतुलंपि
त्रोर्दधतुःसकलैर्गुणैः ॥११॥ तावेकदास्वतनयौपितरौब्राह्मणोत्तमौ ॥ आहूय
वोचतांप्रीत्याषोडशाब्दौशुभाकृती ॥१२॥ हेपुत्रकौयुवांबालेकृतविद्यौसुवर्च
सौ ॥ विवाहकोयंसमयोवर्ततेयुवयोःसमं ॥१३॥ इमंप्रसाद्यराजानंविदर्भेशंस्व
विद्यया ॥ ततःप्राप्यधनंभूरिकर्तोद्वाहोभविष्यति ॥१४॥ एवमुक्तौसुतौताभ्यांता
वुभौद्विजनंदनौ ॥ विदर्भराजमासाद्यपर्यतोषयतांगुणैः ॥१५॥ विद्ययापरितु

श्लो०
१३६

श्यतस्मैद्विजकुमारकौ॥विवाहार्थंकृतोद्योगौइनहीनावशंसतां॥१६॥तयोर
भिमतंज्ञात्वासविदर्भमहामतिः॥प्रणम्यकिंचिदोवाचलोकतत्वविवत्सया॥
॥१७॥इतोनिषधराजस्यराज्ञीसीमंतिनीसती॥सोमवारेमहादेवंपूजयत्यंबिका
युतं॥१८॥तस्मिन्दिनेसपत्नीकान्द्विजाग्र्यानवेदवित्तमान्॥संपूज्यपरयाभ
क्त्याधनंभूरिददातिच॥१९॥अतोत्रयुवयोरेकोनारीविभ्रमवेषधृक्॥एकस्त्वेवप
तिर्भूत्वाप्राप्यसीमंतिनीगृहं॥२०॥भुक्त्वाभूरिधनंलब्ध्वापुनर्यातममांतिकं॥इ
तिराज्ञासमादिष्टौभीतौद्विजकुमारकौ॥२१॥प्रत्युचतुरिदंकर्मकर्तुंनोजायतेभ १३६
यं॥देवतास्तुगुरूपुत्रौतथाराजकुलेषुच॥२२॥कौटिल्यमाचरन्मोहात्सद्योनश्यत
तिसान्वयः॥कथमात्रीयहंराज्ञोछद्मनाप्रविशेत्सुमान्॥२३॥गोपमानोपियःकोश

स्वित्कदाचिद्व्यातिभिष्यते॥येगुणाःसाधिताःपूर्वैर्विद्याचारगुणान्विताः॥२४॥सद्य
स्तेनाशमायांतिकौटिल्यपथगामिनां॥पापंहानिर्भयंवैरंचत्वार्येतानिदेहिनां
॥२५॥छद्ममार्गप्रपन्नानांतिष्ठंतेवहिसर्वदा॥अत्रआवांस्तुभाचारौजातौजा
तौचशुचिनांकुले॥२६॥हत्तंधूर्त्तजनैःसाध्यंनाश्रयावःकदाचन॥तथापिरा
जात्वमसियोग्यत्वंयद्वदस्वतत्॥२७॥॥राजोवाच॥॥देवतानांचगुरूणांपित्रोःम
स्यपृथिवीपतेः॥शासनस्याविलंबत्वात्प्रसादेशोनकर्हिचित्॥२८॥एतैर्य
च्चसमादिष्टंशुभंवायदिवाशुभं॥कर्त्तव्यंनियतंभीतैरप्रमत्तैर्बुभूषितैः॥
२९॥अतोवयंहिराजानःप्रजायूयंहिसंगताः॥राजाज्ञयाप्रवृत्तानांश्रेयःश्र
स्यादन्यथाभयं॥३०॥अतोमच्छासनंकार्यंभवद्भ्यामवलंबितं॥इत्युक्तौन

ब्र.सो. रदेवेनतौतथेत्युक्तचतुर्वेजात्॥३१॥सारस्वतस्यतनयंसामवंतंनराधिपः॥स्त्री
१३९ रूपधारिणंचक्रेवस्त्राकल्पांजनादिभिः॥३२॥सकृत्रिमःसंयतकेशबंधःप्र
त्युप्तकरणाभरणांजनाढ्यः॥शुभांगरागःस्पृहणीयरूपोबभूवसद्यःप्रमदो
त्तमांगः॥३३॥तावुभौदंपतीभूत्वाद्विजपुत्रौनृपाज्ञया॥जग्मतुर्निषधेंद्रेशं
चंद्रांगदविराजितं॥३४॥उपेत्यराजसदनंसोमवारेसहद्विजैः॥सपत्नीकैः
कृतातिथ्यौधौतपादौबभूवतुः॥३५॥साराज्ञीब्राह्मणान्सर्वान्प्रविशान्त
राननानान्॥प्रत्येकमर्चयांचक्रेसपत्नीकान्॥३६॥तौचविप्रसुतौदृष्ट्वाप्रा १३९
प्तौकृत्रिमदंपती॥ज्ञात्वाकिंचिद्विहस्याथमेनेगौरीमहेश्वरौ॥३७॥आवाह्य
द्विजमुख्येषुदेवदेवंसदाशिवं॥पत्नीष्वावाहयामाससदेवींचजगदंबिकां॥३८॥

गंधैर्माल्यैस्तुसुरभिर्धूपैर्नीराजनैरपि॥अर्चयित्वाद्विजश्रेष्ठान्नमश्चक्रेसमाहि
ता॥३९॥हिरण्मयेषुपात्रेषुपायसंघृतसंयुतं॥शार्करामधुसंयुक्तंशाकैर्युक्तंमनो
रमैः॥४०॥गंधशाल्योदनैरम्यैर्मेदकापूपरादिभिः॥शाककुलीभिश्चसंयावैर्लड्डुकै
र्मखपक्वकैः॥४१॥अथान्यैरप्यसंख्याकैर्भक्ष्यैर्भोज्यैर्महारसैः॥सुगंधैःस्वादुभि
र्धूपैःपानीयैरपिशीतलैः॥४२॥विप्रभोजनवेलायांवायुर्व्यंजनतत्परा॥धन्या
स्मिकृतार्थास्मियथेष्टंस्वादुभुज्यतां॥४३॥भवद्भिर्दूरतस्त्याज्यंयन्नरुचिकरंभवेत
॥भुक्तवत्सुद्विजाग्र्येषुदत्वाचांतेषुनृपांगना॥४४॥प्रणम्यदत्वातांबूलंदक्षिणांचय
थार्हतः॥सकल्पविधियुक्तंचब्राह्मणेभ्योददौसती॥४५॥धेनूर्हिरण्यवासांसिर
त्नस्त्रग्भूषणानिच॥दत्वाभूयोनमस्कृत्यविससर्जद्विजोत्तमान्॥४६॥तयोर्द्वयोय

ब्र॰लो॰ १३८ तद्द्विजवर्यपुत्रयोरेकस्तथाहैमवतीद्वियार्चितः॥एकोमहादेवद्वियाभिपूजितः
कृतप्रणामौयजतुस्तदालयात॥४७॥अवाप्तगिरिजाबुध्यायस्तयापूजितःपरं
॥ससामवान्द्विजसुतोवाभ्रवप्रमदोत्तमा॥४८॥सातुविस्मृतपुंभावांतस्मिन्नेव
द्विजोत्तमे॥जातस्पृहामदाविष्टाकंदर्पविवशाब्रवीत॥४९॥अयिनाथविशालाक्ष
सर्वावयवसुंदर॥तिष्ठतिष्ठक्कयासीतिमयागंतुंनशक्यते॥५०॥इदमग्रेवनंर
म्यंसपुष्पितलताद्रुमं॥अस्मिन्विहर्तुमिच्छामित्वयासहयथासुखं॥५१॥इत्यंत १३८
योक्तमाकर्ण्यपुरोगच्छन्द्विजात्मजः॥विचिंत्यपरिहासोक्तिंगच्छतिचयथासुखं॥
५२॥पुनरप्याहसातिष्ठतिष्ठक्कयास्यसि॥अकृतसंगस्मरावेशांपरिभूतामुपेक्ष्यमां
॥५३॥परिभ्रज्यस्वमांकांतपायययस्वाधरामृतं॥कोकिलानांस्वरोमेवैकामबाणा

यतेहृदि॥५४॥अशोकलिंगितांपश्यलतांकांतमिवांगना॥त्वरसंकिंनजानासि
दंपतीसंगमोद्भवं॥५५॥पश्येमांभ्रमरींकांतपंकजस्यद्विरेफकं॥एतयोर्गुं
जितंनाथस्मरबाणायतेमम॥५६॥नाहंगंतुंसमर्थास्मिस्मरबाणनिपीडि
ता॥इतीरितैनैवगंतव्यंशापथाःशतशास्तव॥५७॥इत्थमश्रुतपूर्वंतंनिशम्य
परिशंकितः॥आयंतीदृष्टतोवीक्ष्यसहसाविस्मयंगतः॥५८॥कासापद्मवि
शालाक्षीपीनोन्नतपयोधरा॥कृशोदरीबृहच्छ्रोणिनवपल्लवकोमला॥५९॥स
एवमेखलाकिन्नुजातएववरांगना॥दृष्ट्वाम्येवततःसर्वमितिसंचिंत्यसो
ब्रवीत॥६०॥किमपूर्वमिवाभासिसखेशास्त्रगुणान्वित॥अपूर्वंभाषसेवाक्यं
कामिनीवमदाकुला॥६१॥यत्वंवेदपुराणज्ञोब्रह्मचारिजितेंद्रियः॥सारः

ब्र॰लो॰ १३९ स्वतात्मजः शांतः कथमेवं प्रभाषसे ॥६२॥ इत्युक्ते सा पुनः प्राह नाहमस्मि पु-
मान्द्विभो ॥ नाम्ना सामवती बाला तवास्मि रतिदायिनी ॥६३॥ यदि ते संशयः कां-
तस मांगानि विलोकय ॥ इत्युक्तः सहसा मार्गे रहस्येनां व्यलोकयत् ॥६४॥ ता-
मक्रस्तिमध्यमिज्ञां जघनस्तनशोभिनीं ॥ सुरूपीं वीक्ष्य कामेन किंचिद्व्याकु-
लतामियात् ॥६५॥ पुनः संस्तभ्य यत्नेन चेतसो विकृतिं बुधः ॥ मूहत्त्रे वि-
स्मयाविष्टेन किंचित्प्रत्यभाषत ॥६६॥ तस्य दर्शनतो बाला पुनः संजातवे-
पथुः ॥ प्रोवाच वचनं चारु स्मरबाणनिपीडिता ॥६७॥ गतस्ते संशयः कांत १३९
श्चेत्तदागच्छ मां भज ॥ पश्येदं विपिनं रम्यं सुभ्रू स्त्रीरमणोचितं ॥६८॥ नि-
र्भाग्यानामिदं कर्म यदि प्रेमरसान्विता ॥ अंकागतां न भजते मानिनी स्म-

रपीडितां ॥६९॥ सुमेधोवाच ॥ मैवं कथय मर्यादां माहासीन्मदमत्तवत् ॥ आ-
वां विज्ञातशास्त्रार्थौ मामेवं भाषसे कथं ॥७०॥ अधीतस्य च शास्त्रस्य विवेक-
स्य कुलस्य च ॥ किमेषो सदृशो धर्मो यदि वामार्गसंगमः ॥७१॥ न त्वं स्त्री पुरु-
षो धीमान्जानीह्यात्मानमात्मना ॥ अयं स्वयं कृतोनर्थ आवाभ्यामेव निर्मि-
तः ॥७२॥ वंचयित्वात्मपितरौ धूर्तेराज्ञानुशासनात् ॥ कृतं चानुचितं कर्मेन-
पांश्रेयो विनाशनं ॥७३॥ स्त्रीवेषधारणं चादौ निषिद्धं विप्रजन्मनः ॥ सकंचुकं
द्विजं दृष्ट्वा नस्त्रियं गतकंचुकी ॥७४॥ अंतरिक्षे राकं दृष्ट्वा सवासा जलमाविशे-
त् ॥ इत्यादि वचनान्यावां विस्मृतौ दैवयोगतः ॥७५॥ यत्त्वं विप्रात्मजो विद्वान्-
प्राप्तः स्त्रीत्वं विगर्हितं ॥ एवं ते दंशिता जिह्वा कस्मै क्रोधो विधीयते ॥७६॥ मी-

अस्रो॰ मार्गंत्यक्त्वागतारण्येनरोविध्येतकंटकैः॥आत्मबुद्धिर्हितायायगुरुबुद्धि
१५० र्विशेषतः॥परबुद्धिर्विनाशायसागतानुभवायवा॥विनाशकालआपन्ने
त्यजतेहिनरोधियं॥७८॥बलाद्धिंसेतवाहिंस्रैरुन्मार्गेयोभिगच्छति॥एवंवि
वेकमाश्रित्यतूष्णीमेहिस्वकंगृहं॥७९॥देवद्विजप्रसादेनस्त्रीत्वंतवविनश्य
ति॥अथवादैवयोगेनस्त्रीत्वमेवभवेन्नवा॥८०॥पित्रादत्तामयासाकंरम्यसेव
रवर्णिनी॥अहोचित्रमहोदुःखमहोमायाबलंमहत्॥८१॥अहोराज्ञःप्रभावो
यंशिवाराधनसंभृतः॥इत्युक्त्वाप्यसकृत्तेनसावधूःस्मरविह्वला॥८२॥बलेन १५०
तंसमालिंग्यचचुंबाधरपल्लवं॥धर्षितोपितयाधीरोमेधावीनूतनस्त्रियं॥८३॥
॥यत्नादानीयसदनंकृत्वासर्वंन्यवेदयत्॥तदाकर्ण्यागतौविप्रौकुपितौशो

कविह्वलौ॥८४॥ताभ्यांसहकुमाराभ्यांविदर्भांतिकमाययुः॥ततःसारस्वतः
प्राहराजानंधूर्त्तचेष्टितं॥८५॥राजन्ममात्मजंपश्यतवशासनयंत्रितं॥एतौ
त्वदाज्ञावशगौचक्रतुःकर्मगर्हितं॥८६॥नष्टंकिंत्वद्धनंसर्वमन्यत्राप्रेषिता
विमौ॥अद्यमेसंततिर्नष्टानिराशाःपितरोद्यमे॥८७॥नापुत्रस्यहिलोकोस्तिपु
त्रपिंडादिसत्कृतेः॥शिखोपवीतमजिनंमौंजीदंडकमंडलुं॥८८॥ब्रह्मच
र्योचितंचिह्नंविहायेमांदशांगतः॥ब्रह्मसूत्रंचसावित्रींस्नानसंध्याजपा
र्चनं॥८९॥विसृज्यस्त्रीत्वमाप्तस्यकागतिर्वदपार्थिव॥त्वत्तोमेसंततिर्न
ष्टावेदविद्याचसर्वशः॥९०॥एकात्मजस्यमेराजन्कागतिर्वदसांप्रतं
॥शापंददामिवेतुभ्यंक्रोधावेशातयानृप॥९१॥तपःक्षयोभवेन्नूनंसंत

ब्र.सो.
१४१

तिश्चगतास्तिमे॥ एवमाभाष्यविप्रोसौस्त्रीरूपंवीक्ष्यचात्मजं॥ ९२॥ हत्वाक
रकरकपालेरुरुसुक्तकंठोरुरोदह॥ राजापिदुःखितोत्यंतंविनिश्वस्यपुनःपुनः
॥ ९३॥ सीमंतिन्याःप्रभावेनविस्मयंपरमंगतः॥ अथसर्वान्समाहूयब्रा
ह्मणानमितद्युतीन्॥ ९४॥ प्रसाद्यप्रार्थयामासतस्यपुंस्त्वंमहीपतिः॥ भोभो
द्विजवराःसर्वेशापानुग्रहेतत्पराः॥ ९५॥ दुरात्मनामयाकर्मकृतंदुष्टेन
साहसं॥ यदापुंस्त्वंद्विजस्यास्यभविष्यतिद्विजाज्ञया॥ ९६॥ तदामेजीवितं
धन्यंनोचेत्प्राणान्नधारयेत्॥ यदाद्विजेमहद्दुःखंतदाकिंवपुषाधनैः॥ ९७ १४१
तेब्रुवन्नथपार्वत्याःशिवस्यचमहाहितं॥ तद्भक्तानांचसंकल्पंकोन्यथा
कर्तुमीश्वरः॥ ९८॥ अथराजाभरद्वाजमाहायमुनिपुंगवं॥ ताभ्यांसहद्वि

जात्यांचतत्सुताभ्यांसमाहितः॥ ९९॥ अंबिकाभवनंप्राप्यभरद्वाजोपदेशत
ः॥ तांदेवींनियमैस्तिस्त्रोरूपास्तेस्ममहानिशि॥ १००॥ एवंत्रिरात्रैरविसृष्टभो
जनोजपार्चनध्याननरतोमहीपतिः॥ सम्यक्प्रणामैर्विविधैश्चसंस्तवैर्गौ
रींप्रपन्नार्तिहरामतोषयत्॥ १॥ ततःप्रसन्नासादेवीभक्तस्यपृथिवीपतेः॥
स्वरूपंदर्शयामासचंद्रकोटिसमप्रभं॥ २॥ अथाहगौरीराजानंकिंतेब्रूहिस
माहितं॥ सोप्याहदेविपुंस्त्वंत्वत्कृपयादीयतामिति॥ ३॥ भूयोप्याहमहादेवी
मद्भक्तैःकर्मयत्कृतं॥ शक्यतेनान्यथाकर्तुंवर्षायुतशतैरपि॥ ४॥ ॥ राजोवा
च॥ ॥ एकात्मजोद्विजेंद्रोयंकर्मणानष्टसंततिः॥ कदासुखंप्रपद्येतविनापुत्रे
णतादृशः॥ ५॥ देव्युवाच॥ ॥ तस्यान्योमत्प्रसादेनभविष्यतिसुतोत्तमः॥ वि

ब्रसो· १५२

या विनयसंपन्नो दीर्घायुर्विपुलोदयः॥६॥ एषा सामवती नाम सुता वा द्विजजन्म
नः॥ भूत्वा सुमेधसः पत्नी कामभोगेन युज्यतां॥७॥ इत्युक्तांतर्हिता देवी ते च राजा
पुरोगमाः॥ गत्वा स्वं स्वं गृहं सर्वे चक्रुस्तद्भाषितेन स्थितिं॥८॥ ततः सारस्वतो वि
प्रः पुत्रं पूर्वसुतोत्तमं॥ लेभे देव्याः प्रसादेन ह्यचिरादेव कालतः॥९॥ तां च सा
मवतां कन्यां ददौ तस्मै सुमेधसे॥ तौ दंपती चिरं कालं बुभुजाते परं सुखं॥१०॥
॥इत्येतत्शिवभक्तायाः सीमंतिन्यान् नृपः स्त्रियः॥ प्रभावः कथितः शंभोः महा १५२
त्म्यमपि वर्णितं॥११॥ भूयोपि शिवभक्तानां प्रभावं विस्मयावहं॥ समासाद्व
र्णयिष्यामि श्रोत्रेणां मंगलायनं॥१२॥ ॥इति श्रीस्कंदपुराणे वृहद्ब्रह्मोत्तरखं
डे सोमव्रतमहात्म्यवर्णनो नाम विंशतितमोऽध्यायः॥२०॥ ॥ऋषय ऊचुः॥॥

ब्रसो· १५३

सूत सूत पुराणज्ञ सर्वज्ञायं च्छिंधि नोऽनघ॥ केन कर्मविपाकेन नरः स्त्रीत्वमवा
प्यते॥१॥ सर्वज्ञ शास्त्रवता तेन द्विजेन लोमहर्षणा॥ अत्र किं कारणं ब्रूहि स्त्रीत्वं
प्राप्तं कथं किल॥२॥ ॥सूत उवाच॥ ॥श्रूयतामृषयो नूनं वदामि तत्र कारणं॥
मन एव मनुष्याणां कारणं बंधमोक्षयोः॥३॥ यत्र सक्तिर्भवेद्बुद्धेः मरणे त
द्भवेद्ध्रुवः॥ वासनायाबलं तत्र विशेषेण निरूपितं॥४॥ सर्वे वेदांतिनः प्रा
हुरेते यत्र विशारदा स्वधीः॥ तदाकृतिर्भवेद्देव नात्र कार्या विचारणा॥५॥ जन्मं
न्मतो यच्च सेवेत शुभं वाप्यशुभं नरः॥ फलीभूतं भवेद्दं तेन देवप्रकृतेर्व
शात्॥६॥ निर्वासनं यदा चित्तं तदा मुक्तिर्हि जायते॥ सवासने लेशमात्रेत
मोक्षं न्मुक्तो मैतमश्नुते॥७॥ कर्मणां विविधा दृष्टा गतयश्च नृणामिह॥ प्रारब्धं वश्य

ब्रस्रो·
१४३

गालोकाः प्रवर्त्तंते स्वकर्मसु ॥ ८ ॥ अथातः संप्रवक्ष्यामि ब्राह्मणस्य विचेष्टितं
॥ स्त्रीरूपं येन चापन्नो महादुःखस्य भाजनं ॥ ९ ॥ पित्राधीना हि बालत्वे पत्याधी
ना हि यौवने ॥ पुत्राधिना च वार्द्धक्ये स्वातंत्र्यं न क्वचित्स्त्रियः ॥ १० ॥ अतः साम
वृता प्राप्ता स्त्रीत्वं तत्तद्वदाम्यहं ॥ चैत्रे मासे च संप्राप्ते रेवातीरे विशेषतः ॥ ११ ॥
मूलभेदस्य यात्रायां सार्थश्चैकः समागतः ॥ तत्रैका विप्रवर्यस्य कंन्यका पं
चहायना ॥ १२ ॥ मृतस्वमातृजनकाः स्वभ्रात्रा सार्द्धमागता ॥ यात्राकार्यार्थिनो
लोकास्तीर्थालोकनलालसाः ॥ १३ ॥ तीर्थे भ्रमंति सा कन्या रेवातटमुपागता १४३
॥ जंबूवृक्षं समारूढा सवृक्षा न्यपतज्जले ॥ १४ ॥ नर्मदाजलतरंगमध्यगा·
कन्यका समधिरूढवृक्षका ॥ सिंहवाहनविराजिता यथा सागरे हि जगदंबि·

काययौ ॥ १५ ॥ गते भानावस्तं पतितनगपक्कात्सुफलवत् बलात् बाला कंन्या
जलरयवशाद्दूरमगमत् ॥ भृगोः क्षांते याते सकलशुभवर्णैकनिलया मही
ष्मत्याख्यासीन्नगरजनपूर्णा शुभतरा ॥ १६ ॥ तस्यां निरतो द्विजवर्य एकः स्नाने
रतोऽस्मरितिब्राह्म्यमूहूर्त्तकाले ॥ रेवाजलं समधिगम्य जले प्रविष्टः स्नानं चर
कार विधिना विगतो मलश्च ॥ १७ ॥ कन्यापि तत्र समये शुभवृक्षसंस्था दृष्ट्वा द्विजं
स्मरितिमज्जनकर्मयुक्तं ॥ हस्तौ प्रसार्य जनकं शिशुराशु यद्वत् कंगावलंबनम·
सैहि तथा चकार ॥ १८ ॥ भ्रांतो द्विजास्तां परिगृह्य दोर्भ्यां जलाद्बहिः स्तां च बभा
ण वाणीं ॥ कात्वं सुते कस्य जले कुतोसि प्रवाहमध्ये विजनप्रदेशे ॥ १९ ॥ प्रजावि
हीनं किल नर्मदा सो ज्ञात्वैव मां तुभ्यमदात् कथं वा ॥ यां त्वा मदीया बहुकाल

श्लो. जन्यापूर्णगतामेतद्वलाभतः किं॥२०॥नोक्तंतयाकन्यकयावचोवैतदाद्वि
१४४ जःस्वसदनंमुदाऽऽ॥कन्यांगृहीत्वाशुभकालयोगादाहूयबंधूंश्चजगादवा
क्यं॥२१॥दत्ताहिमेनर्मदयासुकन्याप्राप्तेमुहूर्तेस्वजलात्सुरम्या॥विलोक्य
सर्वैर्निजबंधुवर्गैःसानर्मदाभूरितिनामदत्ता॥२२॥पश्यत्सुताविप्रगणैः
सुमंत्रैःकृताभिषेकांसुपवित्रदेहां॥हर्षान्वितःस्वगृहिणीसमेतःसुभो
जयामासबहून्द्विजेंद्रान्॥२३॥विप्राश्चकन्याकरदत्तमन्नंभुक्त्वाचतांवृ
त्सुखाःसहर्षं॥लब्ध्वाहिरण्यादिकमस्यगेहाद्दत्वाशिषोजग्मुरथस्वधाम॥२४॥ १४४
सात्स्नानशीलस्यचमंदिरस्थावृद्धिंययौचोडुमसीकलेव॥विचारयामासव
रंवरेण्योवरेणमस्याःस्वकुलानुरूपं॥२५॥माहिष्मतीविप्रगणाश्चसर्वेतां॥

त्वाभिलेषुर्ज्जलप्राप्तिहेतोः॥परापवादंकिललेशमात्रमसोढुकामाःकुलर
क्षणार्थं॥२६॥सस्नानशीलोबहुवेदपाठीविद्यावतंसीकृतचारुगात्रः॥तस्यान्त
येछात्रधियाविदूरात्स्वजातिरासीद्द्विजसूनुरेकः॥२७॥समाप्तविद्योहियदाबभूव
संप्रार्थितस्तेनगुरुःसएव॥मयागुरोदापयितुंसमर्थांतांदक्षिणांप्रार्थयदातुमी
हे॥२८॥विद्यानवद्यागुरुदक्षिणातोभवेच्चनित्यंसुफलप्रसूतिः॥श्रुतंमयैतद्वच
नंततोहंत्वांप्रार्थयेसत्यतयावदस्व॥२९॥सूतउवाच॥एवमुक्तस्थितेछा
त्रेगुरुराहूययोषितं॥प्राहकांतेयमधुनाछात्रोक्तंतच्छृणुप्रिये॥३०॥विद्याप्रा
प्तेहिछात्रेणगच्छतिस्वनिकेतनं॥गुरवेदक्षिणांदातुमीहतेतत्करोतिकिं॥३१॥
मच्चित्तेवर्त्ततेकांतेद्विजोयंरूपसुंदरः॥सदाचारोस्तिसुधर्मात्माविद्यान्वितो

ब्रयो.
१४५

जितेंद्रियः॥३१॥गुरुसेवारतोनित्यंकुलवान्यौवनोद्धतः॥निरोगीवेषवान्दक्ष
अस्मैकन्याप्रदीयते॥३२॥अनयोर्योगतःकांतेगार्हस्थ्यंभविताशुभं॥मन्म
थेनसमभ्रष्टारोरतिरूपातवात्मजा॥३३॥अत्रत्यानामिवांछतिजलप्राप्तिं
तयाप्रिये॥सोवर्णीतवपुत्र्यस्तिरत्नश्रेष्ठोयमुत्तमः॥३४॥मणिनावलयंभा
तिवलयेनमणिस्तथा॥करोवलययुक्तेनभात्येवमणिनाबहु॥३५॥कमः
लेनपयःकांतेभात्यब्जंपयसायथा॥भात्यब्जयुक्तपयसासरसीविमलापुनः
॥३६॥सुगुप्तपुंसातथानारीशुभनायतिथानरः॥नात्रियाचमहज्ञातिगार्हस् १४५
थ्यंसर्वजंतुषु॥३७॥करोविभातिदानेननमुखंभातिसुविद्यया॥लक्ष्मीवविन
योभातिहृदयंशांभवैर्गुणैः॥३८॥यत्नदत्तेतिश्रेष्ठोयंनमेदातुस्तवात्मजा॥

हस्तमेलापकंसम्यक्नवैरंनषडाष्टकं॥३९॥अतोवदाम्यहंकांतेकंन्याम
स्मैहिदीयतां॥अन्यद्वदामिसुश्रोणिभविष्यंनैवचिंतयेत्॥४०॥दैवीगतिर्वि
चित्रास्तिदृष्टाशास्त्रेष्वनेकशः॥शुभंविचार्यक्रियतेतद्दैवेनशुभंभवेत्॥४१॥
यथाकथंचिद्दृष्टादौपश्चात्सौख्यंप्रजायते॥नयोगस्यबलंतत्रनबलंचंद्र
सूर्ययोः॥४२॥अहंदैवबलंमन्येयथारामोथरामोथजानकी॥लग्नदृष्टावसि
ष्ठस्तुरामेणसह्रतःपतिः॥४३॥सीतयानसुखंप्राप्तंदैवाधीनतयाप्रिये॥सू
क्ष्मागतिर्हिलग्नस्यक्षणमात्राद्विदोषतः॥४४॥लग्नंसाधयितुंकांतेनकोपि
बलवान्भूत्॥साधारणतयाकांतेविचार्यैवविधीयते॥४५॥स्नानचालेन
नविप्रेणयोविदुक्ताप्तुनश्चसा॥बाढइत्येवमुक्त्वैवपरंहर्षमवापसा॥४६॥पु

श्रेष्ठो॰ १५६ पुनर्जगाम छात्रोंते प्राह वाणीं विशेषधीः॥ गुरवे दक्षिणां साधो ददामि चेत्पणं
कुरु॥४७॥ यदहं प्रार्थये त्वत्तस्तद्दास्य विकल्पतः॥ इत्यर्थे पादयोस्त्वं च क
रं देहि यदिच्छसि॥४८॥ सानुकूलां वदिष्यामि यत्त्वया साध्यते द्रुतं॥ नात्रास्ति
च्छलना छात्र वित्र मुनेरिव॥४९॥ ततः प्रसन्नचित्तेन छात्रेणोक्ते वचस्तथा॥
गुरुः प्राह शुभामेतामंगीकुरु ममात्मजां॥५०॥ द्वितीयाश्रमयंच्यार्थं क्रिया
स्यसि महामते॥ इयमेव मतं मया प्राप्नोत्वयाद्दत्ताद्धि दक्षिणा॥५१॥ तथेति प्र
तिजग्राह छात्र कंन्यां तदात्मजां॥ तदाज्ञयामकरोद्विप्रः पाणिग्राहं तदाज्ञया १५६
॥५२॥ षण्मासावधि तत्रैव स्थित्वा सो द्विजनंदनः॥ यज्ञदत्तो जगामाशु स्वदेशे
वारणावतं॥५३॥ माता नष्टा पिता नष्टो न भ्राता न सुहृत्तमः॥ सरेमे कांतया

सार्द्धं स्वपुरे वारणावते॥५४॥ एकस्मिन्दिवसे तेन भोजनार्थे स्थितेन च॥ वस्त्र
पट्टवहीनं स्वपत्न्या दृष्टं तदोदरं॥५५॥ कुष्टाकृतिसमं तत्र बिंदुत्रयमनाम
यं॥ विलोक्य मस्तकं धून्वन्करयास्यः स्थितो जगौ॥५६॥ अहो किमिदमाश्चर्यं
सर्वत्र जगतीतले॥ यदीया रमणीरामा मम कुष्टेन दूषिता॥५७॥ सर्वसोपद्र
वं रत्नं पूर्णचंद्रोपि लांछितः॥ सागरः क्षारयुक्तो सौ सर्वरत्नसमन्वितः॥५८॥
पंकजं कंटकैः रुद्धं जरया यौवनं स्त्रियः॥ दारिद्र्येण यथा विद्वान्तथा त्वं कुष्ट
रोगतः॥५९॥ कुष्टेश्च नश्यते रूपं द्विजस्तु शूद्रसेवया॥ दुष्टा स्त्री योगतो नू
नं नश्यत्येव कुलं स्त्रियः॥६०॥ विद्या नश्यति लोभेन धनं दानविवर्जितं॥ रा
जा दुर्मंत्रिणा नश्येत्संगा नश्यति वै यतिः॥६१॥ पुत्रस्तु लालनात्तु नं कुपुत्रेण

ब्र.मो.
१४७

कुलंतथा॥खलोपासनयाशीलंदानंचैवकुपात्रतः॥६२॥बहुक्षारतया॰
ग्राकंक्षीरंतक्रसमागमात्॥पत्यौचप्रोषितेबालानन्नृपत्येवनसंशयः॥
६३॥नृपतीश्रीस्तथान्यायाद्धर्मोनश्यतिनिंद्या॥सर्वनृपतिगर्वेणक्षा॰
त्रेयुद्धपलायनात्॥६४॥शालिग्रामस्यपूजातोवैश्यशूद्रोविनश्यतः॥
ज्ञानंनृपतिमोहेनविनाविद्यांचवाडवः॥६५॥नष्टंरूपंतथाकांतेतव
कुष्टेनसंशयः॥अतोहंभोजनंकर्त्तुनेछामितवहस्ततः॥६६॥नर्मदाभ॰
रथोवासस्वकांतंचिनयान्विता॥संदेहोनात्रकर्त्तव्यःकुष्टंप्रतिलयावि॰ १४७
भो॥६७॥नष्टंनास्तीतिनास्तितिभुज्यतांसुखमेवहि॥पुनस्तांप्राहविप्रो॰
सौवत्रत्वंवदकारणं॥६८॥याथातथ्येनसुश्रोणियेनसौख्यंलभाम्यहं॥

सत्यंप्रियेहिसर्वेषांतस्माद्वदसुखेनतत्॥६९॥नोचेद्गच्छामित्यक्त्वैवभोज
नंशीघ्रमेवहि॥हगदुक्तंयदातेनतदाप्रोवाचकामिनी॥७०॥शृणु
कांतप्रवक्ष्यामिकुष्टस्यकारणंचयत्॥नर्मदाजलतोलब्धापित्राहंचय
दाप्रिय॥७१॥तदावृक्षस्थिताहंचस्थिताहंचस्थितारात्रौसरिज्जले॥मत्से
नदंशितास्मीतिजलस्पर्शतयापुनः॥७२॥कुष्टाकृतिव्रणंजातंसाक्षात्कु
ष्टेनमेप्रिय॥सूतउवाच॥एवमुक्तंतयावाक्यंश्रुत्वाप्रोवाचवैद्विजः॥
७३॥लब्धास्तित्वंनजातासिम्बसुरस्यशरीरतः॥धिक्धिक्जन्मवृथाजा
तंदूषितंदुष्टयात्वया॥७४॥इत्युक्त्वासपदिविप्रोनिर्जगामाशुहिवनं॥वनेवने॰
भ्रमन्विप्रोतीर्थान्यासुत्पकानिचित्॥७५॥काश्मीरंगतवांस्तत्रकाश्मीराधी

पतिंहरिं॥संप्राप्याशीर्वचोदत्वाराज्ञाकृतनमस्क्रियः॥७६॥एवंद्वान्वयेवि
प्रायदत्ताह्वयःकिल॥विद्याधूर्यमितिज्ञात्वास्वपुरेस्थापितस्तदा॥७७॥स्वपु
त्राध्यापनधियारक्षितोसौनृपेणच॥पुत्राःसुपाठितास्तेनयज्ञदत्तेनसाद
रं॥७८॥तस्यैकातनयाराज्ञोलीलावतीमपाठयत्॥यदुक्तंतत्क्षणेनैवपपा
ठनृपपुत्रिका॥७९॥रसालंकारतत्वज्ञासाबभूवनृपात्मजा॥आसनानिच
सर्वाणिशिक्षितानितयाततः॥८०॥लीलावतीशिक्षितापिविस्मिताभ्रमरा
सनं॥सानुभवंकथंमेस्यादितिप्रोवाचतंद्विजं॥८१॥तदोपवनमासाद्ययु
ज्ञदत्तस्तयासह॥विजनेवाटिकामध्येतांविलोक्यमदालसां॥८२॥शय्यांवि
धायविमलांबहुपुष्पजातैर्गंधादिभिश्चसहितांचवितानवंतीं॥प्रीत्यापर

स्परविलासनिदर्शनार्थमग्नौरसाब्धिजलवीचिषुतत्रकाले॥८३॥एतस्मिन्नस
मतेयेतस्यास्तातोहरिरितिस्मृतः॥तत्रवाद्यांमहादेवपूजनार्थंसमागत
ः॥८४॥पंचप्रधानसंयुक्तोवाटिकांप्रविवेशह॥शिवार्थंतत्रपुष्पाणिगृह
णार्थंसमागतः॥८५॥आसनादरवेलायांयुग्मंदृष्ट्वानृपोत्तमः॥८५॥क्षणं
विचारयामासकेयंकोयमितिध्रुवं॥दृष्ट्वास्वतनयांतत्ररममाणतयात
था॥८६॥द्विजंचदृष्टवान्राजाविद्यावंतंचकामिनं॥राज्ञःक्रोधःसमुत्पन्नः
दृष्ट्वाशय्यांसुपल्लवां॥८७॥प्रोवाचवचनंराजाकिमर्थमागतौयुवां॥मत्
तिष्ठानाशकरौकामुकाविवसंस्थितौ॥८८॥एवमध्ययनंप्रोक्तंनास्तीति
भुवनत्रये॥नूतनाध्ययनंविप्ररचितंरतिलोलुपः॥८९॥मदीयादूषिता

श्रसा.
१५९

कन्यालोकेकीर्त्तिमतिस्त्वया॥शुद्धं चाप्यथवाशुद्धं लोकेवैरुच्यकारकं॥९०॥
नकर्त्तव्यंनरैःशिष्टैस्तुनंकल्याणमीप्सुभिः॥कराप्याप्युष्परचिताकृवा
शांतरतोद्विजः॥९१॥आईष्टंतंभवत्येववह्नियोगेहिमालये॥नतेवंशोम
याज्ञातोनदेशोनकुलादिकं॥९२॥शुद्धवंशयाहिवैविप्राचरस्त्रीसंगलाल
साः॥नभवंतिकदाकालेत्वंयथामत्सुतारतः॥९३॥धिग्विद्याधिकृतपस्ते
वेद्विशिमाममकन्यकां॥यैःकीर्त्तिःसुखदात्रीमेविहताकामकर्मणा॥९४॥त्वां १५९
हन्मिचेद्ब्रह्महत्याबाधतेमांदुरत्यया॥एतस्यावधतोमेस्यात्स्त्रीहत्यातुदुर
त्यया॥अविचारतयाकर्मनकर्त्तव्यंकदाचन॥इतिशास्त्रवचोभग्नंयुवाभ्यां
कामसेवनात्॥९६॥राजपुत्रीविशेषेणतवस्याद्विसुतोपमा॥पातितत्वा

विप्रबंधोत्वयाभुक्तानुसायतः॥९७॥शास्ताहंभूतलेनृणांस्वर्गेशास्ताचवास
वः॥दुःकर्मणांयमःशास्तातस्मात्त्वांकिंकरोम्यहं॥९८॥इत्युक्तासनृपःशिघ्रंपु
ष्पाण्यादायसत्वरं॥जगामशिवपूजार्थंपूजांतेवाक्यमब्रवीत्॥९९॥शृणुधं
भोद्विजश्रेष्ठाशिवपूजनतत्पराः॥केनचिद्दैवयोगेनस्मरणंमेबभूवह॥१॥
यज्ञदत्तोगुरुःसोयंयत्सुतानांचपाठकः॥तस्यभार्यानवद्यांगीनर्मदाभू
रितिस्मृताः॥२॥विनापराधंतथात्यक्तायज्ञदत्तेनकोपतः॥ऋतुस्नातांतुयो
भार्यांसन्निधिंनोपगच्छति॥३॥भ्रूणहत्याभवेत्तस्यनरकंचाधिगच्छति॥इति
सर्वपुराणेषुप्रोच्यतेमुनिपुंगवैः॥४॥सापराधात्यजेत्कांतांकुलटांव्यभि
चारिणीं॥अन्यवीर्येणसगर्भामितिशास्ताःतपोब्रवीत्॥५॥एवंतयातुनक

ब्र॰खं॰ तंकदापिनर्मदाभुवा॥कस्मात्त्वंहिहिपरित्यज्ययज्ञदत्तःसमादत्तःसमागतः॥५
१५० ॥आदावियंद्विजसुतापतितानर्मदाजले॥विध्वस्तमात्रजनकालब्धाविप्रे
णकेनचित्॥६॥स्वजात्याशुद्धतांनीतापश्चाद्दोषोनविद्यते॥व्यर्थंत्यक्ताद्वि
जेनैवयज्ञदत्तेनसूरिणा॥७॥अन्यच्चदुष्करंकर्मयज्ञदत्तेनवैकृतं॥मयापं
चप्रधानैश्चदृष्टंनेत्राबुजैर्ध्रुवं॥८॥लीलावतींममसुतामानीयविषयात्म
ना॥भ्रमरासनयोगेनवाटिकायांदुरात्मना॥९॥कृतंसंगादिकंकर्मदूषि
तातनयाममा॥अस्याश्चैवत्स्वामिनाज्ञातंपरित्यागंकरिष्यति॥१०॥स्त्री १५०
णामासनविद्यासुपतिनाशिक्षिताभवेत्॥योगाभ्यासोभवेद्यत्रतत्रैवे
कारणंगुरोः॥११॥संगंविनासनंनस्यात्संगात्कामोभिजायते॥कामात्क्रो

धोभवत्याशुतस्मान्मोहःप्रवर्त्तते॥१२॥मोहात्स्मृतेर्विनाशःस्यात्स्मृतिनाशात्स्व
यंहतः॥विनाकामंनकर्मेदंमत्सुताद्विजयोरिति॥१३॥सर्वेब्राह्मणाऊचुः॥
राजन्शिवपरोसित्वंशिवध्यानपरायणः॥केनचिद्दैवयोगेनदुहित्राच
रितंत्विदं॥१४॥स्वचातुर्यस्यलोभेनकृतमेवनसंशयः॥वयंएच्छामतं
गत्वाकामाद्वासनलोभतः॥१५॥यस्यकामोनचित्तेस्तितत्रदोषोनविद्य
ते॥गुरुबुध्याकृतंकर्मतत्रदोषोनकिंचन॥१६॥कृच्छ्रचांद्रायणंकृत्वाशु
द्धासाहिभविष्यति॥मानसंमैथुनंराजन्वाचिकंचतथापरं॥१७॥कायि
कंबलवन्नैवताभ्यांयुक्तंमहाबलं॥निरुध्यमनसासर्वमिंद्रियाणांक
दंबकं॥१८॥यत्किंचित्क्रियतेराजन्दोषस्तत्रभवेन्नहि॥मनएवपरंतत्र

ब्र॰ली॰ १५१ कारणं च जगुर्बुधाः ॥२०॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ येनैवा
लिंगिता कांता तेनैवालिंगिता सुता ॥२१॥ तस्मान्मनः प्रधानं हि सर्वकर्मप्र
वर्त्तते ॥ बंधाय विषयासक्तं मोक्षाय निर्विषयं जितं ॥२२॥ एवं शास्त्रस्थिता रा
जन् वर्त्तते ते वदाम वै ॥ सूत उवाच ॥ एवं विवदतां तत्र वाटिकायां शिवा
लये ॥२३॥ पलायनपरौ जातौ राजपुत्री तथा द्विजः ॥ राजभीतिमहाक्रूरा दु
र्वारा प्राणघातिनी ॥२४॥ अज्ञातु च स्वयं राज्ञा केनापि नो निषिद्धितौ ॥ गतौ व
नं महासत्वं यत्र वै गंधमादनः ॥२५॥ तत्र सरो महारम्यं हेमपंकजराजितं ॥ १५१
नीलोत्पलवनं चारु स्वच्छोदकमनामयं ॥२६॥ हंसकारंडवाकीर्णं कोकि
लारावसंयुतं ॥ तत्राशोकवनं नाम महावृक्षैः समाकुलं ॥२७॥ देवक्रीडास

माकांतं लतावल्लिविराजितं ॥ लीलावती यज्ञदत्तौ क्रीडतोस्तत्र नित्यशः ॥
२८॥ आसनानि विचित्राणि चक्रतुः स्वेच्छया मुदा ॥ निरंकौकुशौ रसपराड्द्वामस्व
रदीपितौ ॥२९॥ एकस्मिन् समये तत्र सरसी पंकजव्रजे ॥ सुखपंकजसाम्या
र्थं प्रविष्टौ केलितत्परौ ॥३०॥ पश्य कांते सुमुखं चारु पंकजेन समं न वा ॥ ते
नोक्तं मन्मुखं पश्य नलिनेन समं ना॰ वि॰ ॥३१॥ परस्परमुखांभोजावलोक
नपरायणौ ॥ तस्याश्चित्तं गतं तस्मिन् तस्यास्तच्चित्तमाश्रितं ॥३२॥ एतस्मिन्ने
व समये ग्राहयुग्मं समागतं ॥ युगपज्जलितौ चोभौ वन्यौऽन्यालोकतत्परौ
॥३३॥ तयश्चित्तौ विशेषेण हृतं प्राप तु स्त्रलक्षणात् ॥ लीलावती समजनि वे
श्मित्र गृहे किल ॥३४॥ सुमेधा नररूपेण हृतेयासा गतिर्भवेत् ॥ यो बुद्धिर्म

ब्रह्मो· रणंतेस्यात्तेरूपंप्राप्यतेरिवलै॥३५॥सारस्वतस्यतनयोयज्ञदत्तोभवद्द्विज
१५२ ॥सामवानितिविख्यातोयोसौसामवतीगतेः॥३६॥विनापापंतुयोभार्यांसु
शीलांयत्परित्यजेत्॥सप्तजन्मनिनारित्वंप्राप्यतेविधवापदं॥३७॥इतित्वा
मिथ्या४ स्त्रंमृषानास्तिसत्यंसत्यंब्रवीम्यहं॥अन्यैकंकौतुकंजातंशृणुध्वंभोद्विजो
त्तमाः॥३८॥यदाग्राहमुखंप्राप्तावेककालंचदंपती॥तत्रसरसिसंमग्नं
शिवलिंगद्वयंशुभं॥३९॥तयोःप्राणैःस्थितैःकिंचित्धृतपंकजहस्तयोः॥
सपंकजंकरयुग्मंपतितंशिवमूर्द्धनि॥४०॥तदाशिवोयमितिकिंत्वावयो ॥२
भविष्यति॥इतिताभ्यांक्षणंचित्तेधारितंमरणांतिके॥४१॥तेनपुण्यप्रभावे
नजातौब्राह्मणबालकौ॥दंपतीत्वंव्यत्ययेनभुक्त्वाशिवपदंगतौ॥४२॥शि

वसेवारतौनित्यंगिरिजासेवनेरतौ॥पुत्रद्वयंसमासाद्यशिवसायुज्यमापतुः
॥४३॥हरिर्नृपोयंपुनरेवजातःसंप्रेषितौयेनचविप्रपुत्रौ॥सीमंतिनीभ
क्तितयाविरूपंप्रापितोयंकिलसामवांश्च॥४४॥पूर्वजन्मार्जितंकर्मपुन
र्भूत्वाद्विजात्मजा॥नर्मदाभूर्गतास्वर्गंशिवंसंपूज्ययत्नतः॥४५॥यावज्जीवंस्थि
तागेहेपतिंत्यक्त्वानिजाश्रमे॥कर्मणामनसावाचापतिमन्यंनचास्मरात्॥४६॥
मलमासेशिवंध्यात्वाकृत्वापूजांचदीपकं॥बिल्वदलैःसमभ्यर्च्यसाप्यैवंशिव
तांगता॥४७॥सपत्नीपीडितात्वंतुपूर्वजन्मनिनित्यशः॥नदत्तःस्वामिसंयोगो
ययाभुंक्तेस्वयंपतिः॥४८॥तेनपापेनसंजातापतित्यक्तात्रजन्मनि॥अवश्यमे
वभोक्तव्यंशुभंवाप्यशुभंकृतं॥४९॥इत्येवंवर्णितंभव्यंयत्पृष्टोहंमुनीश्वरैः॥

ब्रह्मो॰ भवद्भिर्भव्यरूपैश्च किमन्यच्छ्रोतुमिच्छथ॥५०॥इदमाख्यानमतुलंयःशृणोतिनि
१५२ रंतरं॥तस्यशंभुःस्वयंप्राप्यमुक्तिदोहिनृणांभवेत्॥५१॥वियोगोनभवेत्त
स्मनाशिशापोभवेत्क्वचित्॥नस्त्रीत्वंननारीचमुक्तिंप्राप्यचसद्गतिं॥५२॥ ॥इ
तिश्रीस्कंदपुराणेवृहत्ब्रह्मोत्तरखंडेसामवतीपुनर्जन्मनिरूपणंनामैकविं
शतिमोऽध्यायः॥२१॥ ॥ऋषयऊचुः॥ ॥वयंधन्यतमालोकेयत्त्वंवक्तासिमान
द॥एवंकःसंशयच्छेत्ताविनापौराणिकात्प्रभो॥१॥पुराणंनश्रुतंयेनशिवप्रे
मरसाकुलं॥भारभूताहितेज्ञेयाभूमेरेवनसंशयः॥२॥पुराणस्यकथादिव्या १५२
सर्वसंशयनाशिनी॥तस्माल्लब्ध्वापुनःसाधोभाग्यंभव्यंभवेद्यदि॥३॥क्वासौकलि
वरौघोरःक्वकथाशांभवीनृणां॥एतयोश्चैवसंयोगोह्यंतरंमहदंतरं॥४॥विनापु

ण्येनजायेतशिवपूजायेतशिवपूजारतिःक्वचित्॥पुराणश्रवणात्सर्वंनरणामेवहि
जायते॥५॥ज्ञानंधनंदयांकीर्तिंलोकहानितथैवच॥क्षमार्जवंतथायुश्चस्वर्गसौ
ख्यंमहद्भुवाः॥६॥कामक्रोधमहाज्ञानहानिपुण्यंचसंततिं॥एतत्सर्वंदिव्यपत्येवपु
राणंकर्णसंस्कृतं॥७॥तस्मात्कथयनःसारंशिवसेवकपूजनात्॥किंफलंप्राप्यतेस
म्यियदिमेसास्तितद्वद॥८॥उभयोःप्रीतियोगेनपुराणंहिप्रवर्त्तते॥द्वयोरेकतराभ
ावेप्रीतिर्नैवोपजायते॥९॥श्रोतृजाड्यंतदाज्ञेयंयदानश्रूयतेमुदा॥वक्तुरेवहित
ज्जाड्यंश्रुतेश्रोतानुबुध्यते॥१०॥सामरस्यतयासर्वंपुराणंश्रूयतेयदा॥तदाफलंच
सर्वेषांभवत्येवनसंशयः॥११॥यदापरिक्षितासर्वंश्रीमद्भागवतंमुदा॥श्रुत्वा
सप्ताहमात्रेणमुक्तोनैवात्रसंशयः॥१२॥परीक्षित्चगतोधामतत्रान्येश्रोत्रतत्पराः॥

ब्र॰सो॰ सामराज्ञाकथंमुक्तिंनगताःश्रवणात्तसा॥१३॥तस्मात्कथयधर्मात्मन्कलौघोरेस
१५४ ह्युपस्थिते॥शरणंशरणार्त्तानांपुराणंपरिकीर्त्तितं॥१४॥पुराणकल्पवृक्षोयंधर
मार्थकाममोक्षदः॥सेव्यएकधियापुंसायदिपुण्यंपुरातनं॥१५॥ ॥सूतउवाच॥
सत्यंप्रोक्तंभवद्भिश्चपुराणरसस्वादुभिः॥एतदेवमहल्लभ्यंयोयदिश्रोताशिवेरता
॥१६॥तत्कंकरोतिवचनंपुराणश्रवतुयः॥सदामुक्तिसुपात्रस्याद्भक्त्यापरम
यामुदा॥१७॥पुराणोत्तंपरंसंपूर्यंसेवितारोनसंशयः॥यस्मात्क्षणंनविरताशिव १५४
श्रवणतोनघा॥१८॥अतोहंकथयिष्यामिपुराज्ञातस्समुद्भवं॥शिवभक्तस्यसे
वायाफलंप्रेमरसाकुलं॥१९॥विचित्रंशिवकर्मास्तिविचित्रंशिवचेष्टितं॥विचि
त्रंशिवमाहात्म्यंविचित्रंशिवभाषितं॥२०॥विचित्रंशिवभक्तानांचरितंपापना

शनं॥स्वर्गापवर्गयोःसद्यःसाधनंजगतीतले॥२१॥अवंतिविषयेकश्चिद्ब्राह्मणोमं
दराह्वयः॥बभूवविषयारामःस्त्रीजितोधनसंग्रही॥२२॥संध्यास्नानपरीत्यक्तो
गंधमाल्यांबरप्रियः॥वेश्यासक्तःकुमार्गस्थोयथापूर्वमजामिलः॥२३॥सवेश्यां
पिंगलांनामरममाणोदिवानिशं॥तस्याएवगृहेनित्यंतिष्टत्यविजितेंद्रियः॥२४
॥कदाचित्सदनेतस्यास्तस्मिन्निवसतिद्विजे॥ऋषभोनामधर्मात्माशिवयोगीसमा
ययौ॥२५॥तमागतमभिप्रेक्ष्यस्वपुण्यमिवमूर्त्तिमत्॥सावेश्यासचविप्रस्तुप
र्यपूजयतांशुभौ॥२६॥तमारोप्यमहीपीठेकंबलांबरसंवृते॥प्रक्षाल्यचरणौभ
क्त्यातज्जलंदधतांशिरः॥२७॥स्वागतार्घनमस्कारैर्गंधपुष्पाक्षतादिभिः॥उप
चारैःसमभ्यर्च्ययोजयामासतुर्मुदा॥२८॥तंभुक्तवंतमाचांतंपर्यंकसुखसंस्त

उप

ब्रह्मो॰ रे॥ उपवेश्य प्रेमयुक्तौ तां तांबूलं प्रत्यगच्छतां॥२९॥ पादसंवाहनं भक्त्या कुर्वंतौ दे
१५५ वनोदितौ॥ कल्पयित्वा तु शुश्रूषां प्रणयामासतुश्चिरं॥३०॥ पापं निवेदयंतौ तौ के
नचित्कर्मयोगतः॥ आवाभ्यां न कृतं पुण्यं तत्क्षमस्व दयानिधे॥३१॥ एवं संप्रा
र्थितस्ताभ्यां शिवयोगी महामते॥ अतिवाह्य निशामेकां ययौ प्रातस्तदा ततः॥३२॥
एवं काले गते दीर्घे स विप्रो निधनं गतः॥ सापि वेश्या ययौ काले निजां कर्मार्जितां
गतिं॥३३॥ स विप्रः कर्मणा नीतो दशार्णधरणीतले॥ वज्रबाहोः कुटुंबिन्यां सु
मत्यां गर्भमाश्रितः॥३४॥ सापि वेश्या मृता चैव सीमंतिन्यामजायत॥ चंद्रां १५५
गदात्महाबाहो पातालाद्यः समागतः॥३५॥ वर्द्धते सापि तत्रैव साक्षादिव क
लेंदवी॥ अथ वज्रबाहुदेवी सगर्भा निश्चिता यदा॥३६॥ तस्याः सपत्निवर्गोसौ रव

दं प्राप महत्तरं प्राप महत्तरं॥ तस्या गर्भः कथं जातो नास्माकं करवाम किं॥३७॥
इति संचिंत्य तस्सर्वाभिस्त्रीभिः सापत्न्यवैरतः॥ एकस्मिन् दिवसे राज्ञो वाटिकायां
महोत्सवः॥३८॥ संप्रवृत्तः शिवपूजायास्तत्र सर्वाः समागताः॥ अवेक्ष्य गरलं तस्यै
सपत्न्यस्तु तदा ददुः॥३९॥ भुक्त्वा काले समावृत्ते पुत्रमेवमजीजनत्॥ क्लेशेन
महता साध्वी पीडिता वरवर्णिनी॥४०॥ पुत्रोपि गरयोगेन महाक्लेशमवाप ह
॥ न मृतो दैवयोगेन मृता च न मृता सती॥४१॥ स बालकश्च माता च सर्वांगव्र
णसंभृतौ॥ बभूवतुः परिक्लिष्टौ गरयोगप्रभावतः॥४२॥ तौ च राज्ञा प्रतिज्ञातौ
वैद्यैश्च कृतभेषजौ॥ आस्वास्थ्यमापतुर्योगैरनेकैरौषधानकैः॥४३॥ न रात्रौ
लभते निद्रां सा राज्ञी विपुलव्यथा॥ स्वपुत्रस्य च दुःखेन दुःखिता नितरां क

श्लो·
१५६

रा॥४४॥ नीत्वैवं कतिचिन्मासान्स राजा मातृबालकौ॥ जीवंतौ च मृतप्रायौ र
विलोक्याथ व्यचिंतयत्॥४५॥ नूनं मे गृहपौ पुत्रौ निरयाग्र गतौ विह॥ अत्रां
तरो गाक्रंदतौ निद्राभंगविधायिनौ॥४६॥ मृत्युं वा जीवितुं वापि न क्षमौ पापभो
गिनौ॥ अत्रोपायं करिष्यामि पापयोः शीघ्रमेतयोः॥४७॥ इत्थं विनिश्चित्य स मा
मिपालः सत्रः सपत्नीषु परासु तासु॥ आहूय सूतं निजदारपुत्रौ निर्वापयां
मास रथेन दूरं॥४८॥ सूतेन तौ परित्यक्तौ कुत्रचिन्निर्जने वने॥ अवापतुः परां
पीडां क्षुत्तृष्णाभ्रमविक्लवौ॥४९॥ राजा दुःखं न जानाति रजोगुणतया तथा॥ नि १५६
जाभार्याः स्वकं सूनुं तत्याज सुखलिप्सया॥५०॥ राजा मित्रं न कस्यापि प्रियया सर्पं
स्तथा नृपः॥ स्वकीयपरकीयश्च नो राज्ञां विद्यते जनः॥५१॥ नीतिशास्त्रे हि कुरा

जाः केचिद्रूपा भवंति च॥ केचिद्दयापराः संति निर्दयास्तु पुरे पुरे॥५२॥ विद्यावंत
स्तु विरला लोलाः कृतज्ञाश्च तथा नृपाः॥ कलौ घोरतरे प्राप्ते त एव दस्युरूपिणः
॥५३॥ परदारान् हरिष्यंति धनं च तथा महीं॥ मास्तु जन्म कलौ घोरे नृणां चैव दय
वतां॥५४॥ सोद्वहंती निजं पुत्रं निपतंती पदे पदे॥ निःश्वसंती निजं कर्म नि
दंती च क्रूरा भृशं॥५५॥ क्वचित्कंटकभिन्नांगी मुक्तकेशा भयातुरा॥ क्वचि स्
व्याघ्रस्वनैर्भीता क्वचिद्व्यालैश्च धर्षिता॥५६॥ भर्त्स्यमाना पिशाचैश्च क्वचिद्भीता
ब्रह्मराक्षसैः॥ महागुल्मेषु धावंती भिन्नपादा कुशादिभिः॥५७॥ तस्याः करे मु
द्रिकैका शिवनामाभिलेखिता॥ तस्याः प्रभावयोगेन न भीता राक्षसादिभिः
॥५८॥ एवं घोरे महारण्ये भ्रमंती नृपगेहिनी॥ दैवात्प्राप वणिग्मार्गं गोवाजि

श्लो॰ नरसेवितं॥५९॥ तस्यगोप्रामहावैश्योनगरस्यमहाधनः॥आस्तेपद्माकरोनामरा
१५७ जराजइवापरः॥६०॥ तस्यवैश्यपतेःकाचित्गृहदासीवरांगना॥आयातींदूरतो
दृष्ट्वातदंतिकमुपाययौ॥६१॥ सादासीनृपतेःकांतांसपुत्रांभूयपीडितां॥स्वयंवि
दितवृत्तांतास्वामिनेप्रत्यवेदयत्॥६२॥ सतांदृष्ट्वादिशांनाथोरुजार्तांक्लिष्टपुत्र
कां॥नीत्वारहसिवृत्तांतंप्रस्फुटंपर्यपृच्छत॥६३॥ तस्यानिवेदिताशेषवृत्तांतोसौ
वणिक्पतिः॥अहोकथमितिध्यात्वासनिश्वासंमुहुर्मुहुः॥६४॥ तामंतिकेस्वगे
हस्यसन्निवेश्यरहोगृहे॥वासोन्नपानशयनैर्मातृसाम्यमपूजयत्॥६५॥ त १५७
स्मिन्गेहेनृपवधूर्निवसंतीसुरक्षिता॥व्रणयक्ष्मादिरोगाणांनश्यंतिप्रत्यपद्य
त॥६६॥ ततोदिनैःकतिपयैःसबालोव्रणपीडितः॥विलंघितभिषक्सद्योमम

स्चविधेर्बलात्॥६७॥ मृतेस्वतनयेराज्ञीशोकेनमहतावृता॥मूर्छितान्यप
तद्भूमौगजभग्नेववल्लरी॥६८॥ दैवात्संज्ञामवाप्याथबाष्पक्लिन्नपयोधरा॥सां
त्विताचवणिक्स्त्रीभिर्विललापसुदुःखिता॥६९॥ हाताततपुत्रहातातहामम
प्राणरक्षक॥हाराजकुलपूर्णेंदुहामममानंदवर्द्धन॥७०॥ इमामनाथांकृपणां
त्वत्प्राणांत्यक्तबांधवां॥मातरंत्वंपरित्यज्यक्वगतोसिनृपोत्तम॥७१॥ इत्यादि
भिर्दीनवाक्यैर्महाशोकविवर्द्धनैः॥विलपंतीमृतापत्यांकोनुसांत्वयितुंक्ष
मः॥७२॥ एतस्मिन्समयेतस्यादुःखशोकचिकित्सिकः॥ऋषभःपूर्वमाख्या
तःशिवयोगीसमाययौ॥७३॥ सयोगीवैश्यनाथेनसार्द्धंहस्तेनपूजितः॥तस्या
ःसकाशमागत्यशोचत्याइदमब्रवीत्॥७४॥ ऋषभउवाच॥ अकस्मात्किमहो

अस्तो.
१५८

वत्सेरोरवीषिविमूढधीः॥ कोजातः प्रथमंलोकेकोमृतोवदसांप्रतं॥७५॥ अ
मीदेहादयोभावाः केनबुद्बुदसन्निभाः॥ कचिद्यांतिकचिज्ञांतिकचिद्धंतिवा
पुनः॥७६॥ अतोस्मिन्फेनसदृशेदेहेपंचत्वमागते॥ शोकस्यानवकाशत्वान्न
खिद्यंतेविपश्चितः॥७७॥ गुणैर्भूतानिसृज्यंतेपाल्यंतेनिजकर्मभिः॥ कालेना
थविकृष्यंतेवासनायांचशेरते॥७८॥ माययोत्पन्निमायंतिगुणाः सत्वादयस्त्र
यः॥ तैरेवदेहाजायंतेततस्तल्लक्षणाश्रयाः॥७९॥ देवत्वंयातिसत्वेनरज
साचमनुष्यतां॥ तिर्यक्त्वंतमसाजंतुः वासनानुगतोवशः॥८०॥ संसारे
वर्त्तमानेस्मिन्जंतुः कर्मानुबंधनात्॥ दुर्विभाव्यगतिसुखदुःखमयंमु
हुः॥८१॥ अपिकल्पायुषोवत्सदेवानामपिकल्पितं॥ तत्रदुःखंहिदेवानां १५८

काकथानष्टदेहिनां॥८२॥ केचिद्वदंतिदेहस्यकालएवहिकारणं॥ कर्मकेचि
द्देहः साधारणोह्ययं॥८३॥ कालकर्मगुणाधीनंदेहंपंचात्मकंविदुः॥ जातंदृष्ट्वा
नहर्षंतिनशोचंतिमृतंबुधाः॥८४॥ अव्यक्ताज्जायतेजंतुरव्यक्तेचप्रलीयते॥
मध्येव्यक्तंवदाभातिजलबुद्बुदसन्निभः॥८५॥ यदागर्भगतोदेहिविनाशक
ल्पितस्तदा॥ दैवाज्जीवतिवाजातोम्रीयतेसहसैवहि॥८६॥ गर्भस्थाएवनश्यं
तिजातमात्रास्तथापरे॥ केचिद्युवानोनश्यंतिम्रीयतेकेपिवार्द्धके॥८७॥ या
दृशंप्राक्कृतंकर्मतादृशंविंदतेवपुः॥ भुंक्तेतदनुरूपाणिसुखदुःखानिदेह्य
सौ॥८८॥ मायानुभावेरतयापित्रोः सुरतसंगमात्॥ देहादुत्पद्यतेकोपिपुंयो
षितक्लीबलक्षणः॥८९॥ आयुः सुखंचदुःखंचपुण्यपापंस्कृतंधनं॥ ललाटे

ब्रह्मो॰
१५९

सिद्धितं धात्रा वहन् जंतुः प्रजायते ॥९०॥ कर्मणामपि लंघ्यत्वात्कालस्याप्यतिस
त्वतः ॥ अनित्यत्वाच्च भावानां न शोकं कर्त्तुमर्हसि ॥९१॥ कः स्वप्नो नियतस्थै
र्यमिंद्रजालेषु सत्यता ॥ का नित्यता शरीरस्य कुत्र शाश्वत्यं कलेवरे ॥९२॥ तव
जन्मान्यतीतानि शतशोथ सहस्रशः ॥ अजानंत्याः परं तत्त्वं संप्राप्तोयं महा
भ्रमः ॥९३॥ कस्य कस्यासि तनया जननी कस्य कस्य च ॥ कस्य कस्यासि ललना
भवकोटी प्रवर्त्तिनी ॥९४॥ पंचभूतात्मको देहस्त्वगसृङ्मांसबंधनः ॥ मेदोमज्जा
स्थिरचितो विण्मूत्रश्लेष्मभाजनं ॥९५॥ शरीरांतरमप्येतन्निजदेहोद्भवं बलं ॥ १५९
मत्वा स्वतनयां मूढे मा शोकं कर्त्तुमर्हसि ॥९६॥ यद्दिनाम नरः कश्चिन्मृत्युं तरति
यत्नतः ॥ कथं न प्रतरंतीद पूर्वे पूर्वे विपश्चितः ॥९७॥ तपसा विद्यया बुद्ध्या मं

त्रौषधिरसायनैः ॥ अतियाति परं मृत्युं न कश्चिदपि पंडितः ॥९८॥ न मृतिर्नाघ
वा जन्म परस्यो वा वरानने ॥ तस्मादनित्यावयवेन त्वं शोचितुमर्हसि ॥९९॥ नि
त्यं सन्निहितो मृत्युः किं सुखं देहिनां वरं ॥ व्याघ्रपुरःस्थितो ग्रामः पशुनामिवरो
चते ॥१००॥ न स्वकीयो हि न परः कस्यचिद्वर्त्तते न घे ॥ स्वात्मौपम्येन वैराग्निं न त्वं
शोचितुमर्हसि ॥१॥ अतो जन्ममृती जेतुं यदीच्छसि वरानने ॥ शरणं व्रज सर्वेशं
मृत्युंजयमुमापतिं ॥२॥ तावन्मृत्युभयं घोरं तावद्रोगजराभयं ॥ यावन्नोपैः
ति शरणं देहि शिवपदांबुजं ॥३॥ अनुभूयेह भूतानि संसारे भृशदारुणे ॥ मनो
यदा विरज्येत तदा ध्यायेन्महेश्वरं ॥४॥ मनसापि बतः पुंसः शिवध्यानरसामृतं
॥ भूयः स्पृहा न जायेत संसारविषयासवे ॥५॥ विमुक्तं सर्वसंगाच्च मनो वै

ब्र०खं० रागयंत्रितं ॥ यदा शिवपदे मग्नं तदा न स्यात्पुनर्भवः ॥ ६ ॥ तस्मादिदं मनो भद्रे म
१६० शिवध्यानैकसाधनं ॥ शोकमोहसमाविष्टं माकुरुष्व शिवं भज ॥ ७ ॥ सूत उवा
च ॥ इत्थं सोऽनुनयन्साध्वीं बोधिता शिवयोगिना ॥ प्रत्युवाच गुरोस्तस्य प्रणम्य
चरणांबुजं ॥ ८ ॥ राज्ञ्युवाच ॥ भगवन्मृतपुत्रायास्त्यक्तायाः प्रियबांधवै
ः ॥ महारोगातुरायामे का गतिर्मरणं विना ॥ ९ ॥ अहोहं मृत्युमिच्छामि सहै
व शिशुनामुना ॥ कृतास्मि यद्दिनाद्यत्वां मां पश्यं मरणोन्मुखी ॥ १० ॥ स्वस्थे
चित्ते हि सर्वं स्यात्त्वदुक्तं सकलं गुरो ॥ आदावार्त्तिमयो देहस्ततोपि चंचलं १६०
मनः ॥ ११ ॥ तत्रापि पुत्रमरणं कथं शोको निवर्त्तते ॥ योगिनामपि सर्वेषां स्व
स्थे सर्वं भवेद्धि भो ॥ १२ ॥ कमाद्दृशानां जंतूनां समाधिस्थं मनो ध्रुवं ॥ तस्मा

न्मयैव मरणं वरमेव न संशयः ॥ १३ ॥ अतस्त्वं सर्वमंतःस्थं जानासि भयनाशन ॥
केनचित्पुण्ययोगेन त्वं मे दृष्टिपथं गतः ॥ १४ ॥ इति तस्या वचः श्रुत्वा शिवयोगी द
यान्वितः ॥ पूर्वोपकारसंस्मर्त्तापत्यं जीवयितुं क्षमः ॥ १५ ॥ स तदा भस्म संगृह्य शि
वमंत्राभिमंत्रितं ॥ विदीर्णे तन्मुखे क्षिप्त्वा मृतं प्राणैर्हि योजयत् ॥ १६ ॥ स बालः संग
तः प्राणः शनैरुन्मील्य लोचने ॥ प्राप्तसर्वेंद्रियो बालो रुरोद स्तन्यकांक्षया ॥ १७ ॥ मृ
तस्य पुनरुत्थानं वीक्ष्य बालस्य विस्मिताः ॥ जना मुमुदिरे सर्वे नगरेंद्रपुरोग
माः ॥ १८ ॥ अथानंदवशा राज्ञी विह्वलोन्मत्तविभ्रमा ॥ जग्राह तनयं शीघ्रं बाष्पव्या
कुललोचना ॥ १९ ॥ उपगुह्य तदा तन्वी परमानंदनिर्वृता ॥ न वेदात्मानमन्यं
च सुतमेव परिश्रमात् ॥ २० ॥ पुनश्च ऋषभो योगी तयोर्मातृकुमारयोः ॥ विषघ्न

ब्रह्मो.
१६१

णाव्रतं देहं भस्मनैव परामृशत् ॥२१॥ नीतं तदा भस्मना स्पृष्टैः प्राप्तादिव्यकलेवरे ॥
देवानामप्यदृश्यं रूपं दधतुः कांतिभूषितं ॥२२॥ संप्राप्ते त्रिदशैश्वर्ये यत्सुखं पुण्यक
र्मिणां ॥ तस्मात् द्विगुणं प्राप सा राज्ञी सुखमुत्तमं ॥२३॥ पादयोः प्रणनामाथ सुम
तीऋषभस्य सा ॥ पादयोः पतितां दृष्ट्वा ऋषभः प्रेमसंप्लुतः ॥ उत्थाप्याश्वास
यामास दुःखैर्विमुक्तामुवाच ह ॥२४॥ अयि वत्से महाराज्ञि जीववत्वं शाश्वतीः समाः ॥
यावज्जीवसि लोकेस्मिन्न तावत्त्वाप्स्यते जरा ॥२५॥ एष ते तनयः साध्वी भद्रा
युरिति नामतः ॥ ख्यातिं यास्यति लोकेस्मिन् निजराज्यमवाप्स्यति ॥२६॥ अस्य १६१
वैश्यस्य नगरे तावत्तिष्ठ शुचिस्मिते ॥ यावदेष कुमारोसौ प्राप्तविद्योभविष्यति
॥२७॥ तावत्तिष्ठ सुखेनैव वैश्यवर्य्याभिरक्षिता ॥२८॥ इति तामृषभो योगी तं च

राजकुमारकं ॥ संजीव्य तस्य वीर्येण ययौ देशान्यथेप्सितान् ॥२९॥ इदं यः शृणु
यान्मर्त्यः सर्वपापप्रणाशनं ॥ चरितं शिववक्तृत्सौम्यं तस्य तुष्यति शंकरः ॥३०॥ न
रोगो न च हानिश्च न विषं नैव बंधनं ॥ एतस्य श्रवणान्नूनं नृणां नैवोपजायते ॥३
१॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवसेवकफलमाहात्म्ये द्वाविंशतिमो
ऽध्यायः ॥२२॥ ॥ ऋषय ऊचुः ॥ ॥ कथयस्व प्रसादेन कथां शैवीं विशेषतः ॥ मंदरा
ख्यविप्रस्य कृतं सर्वं मुखात्तव ॥१॥ अधुना पिंगलायाश्च चरितं कथयस्व तः ॥
विचित्रां कर्मणां रीतिं श्रोतुमिच्छामहे वयं ॥२॥ ॥ सूत उवाच ॥ ॥ पिंगला वामया ।
वेश्या मया पूर्वमुदाहृता ॥ शिवभक्तार्चनात्पुण्यात्त्यक्त्वा पूर्वकलेवरं ॥३॥ चंद्रांग
दस्य सा पत्न्यः सीमंतिन्याम जायत ॥ रूपौदार्यगुणोपेता नाम्ना वै कीर्तिमालिनी

ब्रह्मो॰
१६२

॥४॥भद्रायुरपितत्रैवराजपुत्रोवणिक्पतेः॥ववृद्धेनगरेतस्यवैश्यस्यापिम
हात्मनः॥५॥तस्यापिवैश्यनाथस्यशिवयोगीप्रसादतः॥पुत्रोबभूवविमलोरू
पौदार्यगुणान्वितः॥६॥वीर्यवान्निपुणःसाधुःकुमारोतीवचोत्तमः॥सनाम्ना॰
सुनयःप्रोक्तोराजसूनोस्सखाभवत्॥७॥तावुभौपरमस्निग्धौराजवैश्यकुमार॰
कौ॥विक्रीडतुरुदारांगौरत्नाभरणमंडितौ॥८॥तस्यराजकुमारस्यब्राह्मणै
ःसवणिक्पतिः॥संस्कारान्कारयामासस्वपुत्रस्यातिविस्तरात्॥९॥काले॰ १६२
कृतोपनयनौगुरुशुश्रूषणेरतौ॥चक्रतुःसर्वविद्यानांसंग्रहौविनयान्वितौ
॥१०॥अथराजकुमारस्यप्राप्तेषोडषहायने॥सहर्षोऋषभोयोगीतस्यवेश्मस
मायर्यो॥११॥साराज्ञीसकुमारश्चशिवयोगीनमागतं॥मुहुर्मुहुःप्रणम्याभ्यपू

जयामासतुर्मुदा॥१२॥ताभ्यांसंपूजितश्चाथयोगीशोहृष्टमानसः॥तंराजपुत्र
मुद्दिश्यबभाषेकरुणार्द्रधीः॥१३॥॥शिवयोग्युवाच॥॥कच्चित्तेकुशलंतातत्व
न्मातुश्चाप्यनामयं॥कच्चित्त्वंसर्वविद्यानामकार्षीःपरिसंग्रहं॥१४॥कच्चिद्गु॰
रूणांसततंसुश्रूषणपरोभवन्॥कच्चित्स्मरसिमांताततवप्राणप्रदंगुरुं॥१५॥
॥एवंवदतियोगीशेसाराज्ञीविनयान्विता॥तंपुत्रंपादयोस्तस्यनिःपात्यदम
भाषत॥१६॥एषवत्सस्तवगुरोस्त्वमस्यप्राणदःपिता॥एषशिष्यस्त्वयाग्राह्यो
भवताकरुणात्मना॥१७॥एवंबंधुभिरुत्सृष्टमनाथंपरिपालय॥अस्मैस॰
म्यक्सतांमार्गमुपदेष्टुंत्वमर्हसि॥१८॥इतिप्रासादितोराज्ञाशिवयोगीरुदा॰
रधीः॥तस्मैराजकुमारायसन्मार्गमुपदिष्टवान्॥१९॥॥ऋषभउवाच॥॥

श्लो॰ श्रुतिस्मृतिपुराणेषु प्रोक्तो धर्मः सनातनः॥ वर्णाश्रमानुरूपेण निःसेव्यः स
१६३ र्वदा जनैः॥२०॥ भज सत्वं सतां मार्गं तिदेव चरितं चर॥ न देवादीन् विकत्थेथा॥
माकर्षीर्दैवहेलनं॥२१॥ गोदेवगुरुविप्रेषु भक्तिमान् भव सर्वदा॥ चांडालमपि
संप्राप्तं सदा संभावयातिथिं॥२२॥ सत्यं न त्याज्यं सर्वत्र प्राप्तेपि प्राणसंकटे॥
गोब्राह्मणानां रक्षार्थमसत्यं वा वदक्वचित्॥२३॥ परस्वेषु परस्त्रीषु देवब्राह्मण
वस्तुषु॥ चिंतां त्यज्य महाबाहो दुष्टभेष्वपि वस्तुषु॥२४॥ सत्कथायां सदा॥
चारे सद्व्रतेषु सदागमे॥ धर्मादिसंग्रहे तृष्णां नित्यं कुरु महामते॥२५॥ स्नाने॥ १६३
जपे च होमे च स्वाध्याये पितृतर्पणे॥ गोविप्रानन्नपूजासु निरालस्यो भवानघ॥
२६॥ क्रोधं रोषं तथा मोहं पैशून्यमसदाग्रहं॥ कौटिल्यमल्पधर्मेषु द्वेगं पल्वेन॥

परिवर्ज्जय॥२७॥ मृगयाद्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च॥ अत्यासक्तिं च माका॥
र्षीत्तथा दुर्विनयेषु च॥२८॥ क्षत्रधर्मे रतो नित्यं वृथा हिंसां परित्यजः॥ शुष्कवा
दं तथालापं परिनिंदां च वर्जय॥२९॥ मैत्रीं कुरु सुखाढ्येषु दुःखितेषु दयां कुरु॥
पुण्यकृत्सु च संतोषमौदासीन्यं कुबुद्धिषु॥३०॥ अत्याहारमतिश्रद्धामतिपुण्य
मतिद्विषं॥ अत्याहारमतिक्रोधमतिनिंदामतिश्रमं॥३१॥ अत्यालापमति
क्रीडां सर्वदा परिवर्जय॥३१॥ सुविद्यासु मतिश्रद्धामतिपुण्यमतिक्रियां॥
अत्युत्साहमतीख्यातिमतिधैर्यं च साधय॥३२॥ सकामो निजदारेषु सक्रोधो
निजशत्रुषु॥ अलोभः पुण्यनिचये सत्यस्पृहोहि धर्मिषु॥३३॥ सद्वेषो भव पा॥
खंडे सरागः सज्जनेषु च॥ दुष्टपरोभवदुर्मित्रे बधिरः पिशुने भव॥३४॥ धूर्त्तेषु

श्लो· १६४

हंशठंक्रूरंकितवंचपलंखलं॥ पतितंनास्तिकंजल्पंदूरतःपरिवर्जयेत्॥३५॥
आत्मप्रशंसामाकर्षीरात्मनिंदांतथैवच॥ सतांगुरोश्च वचनेविश्वासंकुरु
सर्वदा॥३६॥ आत्मरक्षापरोनित्यमप्रमत्तोदृढव्रतः॥ विश्वासंनैवकुर्वीयाःस्व
भृत्येष्वपिकुत्रचित्॥३७॥ विश्वासमावहेःक्वापिसन्मित्रेबांधवेजने॥ उपाये
षुनशंकेथाःसत्यान्नचलितोभव॥३८॥ अपिशत्रुंवधार्हंवामावधीःशरणा
गतं॥ अप्यपात्रंवानीचंवापिमहोत्तमः॥३९॥ योवाकोवापियाचेततस्मैदे
हिशिरोपिवा॥ अपियत्नेनमहताकीर्तिमेवसदार्जय॥४१॥ राज्ञाचविदुषा
चैवकीर्तिमेवहिभूषणं॥ सत्कीर्तिप्रभवालक्ष्मीःपुण्यंसत्कीर्तिसंभवं॥४२॥ स
कीर्त्याराजतेलोकेचंद्रश्चंद्रिकयायथा॥ गजाश्वहेमनिचयरत्नरुक्मरथादि १६४

कं॥४३॥ कीर्त्यापहतंसर्वंतृणवन्मुंचसत्वरं॥ मातुःकोपंपितुःकोपंगुरुकोपं
धनक्षयं॥४४॥ गुरूणामपराधंचक्षमस्वनृपबालक॥ यथाद्विजाःप्रसीदेयु
स्तथातेषांहितंकुरु॥४५॥ राजानंसंकटेमृत्युमुद्धरेयुर्द्विजोत्तमः॥ तस्मात्स
र्वप्रयत्नेनद्विजसेवापरोभव॥४६॥ आयुर्यशोबलंसौख्यंधनंपुण्यंप्रजो
न्नतिः॥ कर्मणायेनजायेततत्सेव्यंसर्वदात्वया॥४७॥ देशंकालंचशक्तिंच
कार्यंचाकार्यमेवच॥ सम्यक्चिविचार्यकार्याणियत्नेनकुरुसर्वदा॥४८॥
नकुर्यात्कस्यचिद्बाधांपरबाधांनिवारय॥ चारंदुष्टंचशत्रुंचवधेथाःशक्ति
मत्तया॥४९॥ स्नानेजपेचहोमेचदैवेपित्र्येचकर्मणि॥ असत्वरोभवन्निद्रा
यांभोजनेभवसत्वरः॥५०॥ दाक्षिण्यमशाठत्वंचभजसर्वात्मनासदा॥ असी

श्लो॰ ष्टमधुरं चैव सत्यं जनमनोहरं ॥ ५१ ॥ अल्पाक्षरमनेकार्थं वाक्यं ब्रूहि रसान्वितं ॥
१६५ अलीतोभव सर्वत्र विक्षेपेषु विपत्सु च ॥ ५२ ॥ प्रीतो भव ब्रह्मकुलैः न पापे गुरु
रगामने ॥ ज्ञातिबंधुषु मित्रेषु भार्यायां च तथैव च ॥ ५३ ॥ सर्वभावेन वर्तेथास्त्व
थासज्जनपंक्तिषु ॥ सतां हितोपदेशेषु तथा पुण्यकथासु च ॥ ५४ ॥ विद्यागो
ष्ठिषु धर्म्यासु कश्चिन्माभूः पराङ्मुखः ॥ शुचौ पुण्यजनस्थाने प्रख्याते ब्रह्मसं
कुले ॥ ५५ ॥ महादेवे शिवमयो निवासं कुरु सर्वदा ॥ कुलटा योषितां यत्र यत्र ति
ष्ठंति कामुकाः ॥ ५६ ॥ दुर्दर्शनी च संबाधे कदाचिदपि मा विश ॥ आदौ गणपतेः पू १६५
जां कुरु त्वं सर्वकर्मणि ॥ ५७ ॥ एकमेवाश्रितोपि त्वं शिवं त्रिभुवनेश्वरं ॥ सर्वदेवानु
पासीथाः स्वदिनानि च मानय ॥ ५८ ॥ सदा शुचिः सदा दक्षः सदामान्यः सदोदयः ॥

कामक्रोधस्तथा लोभमदो मात्सर्यमेव च ॥ मोहश्चेत्यरिषड्वर्गः इति शिवगीतायां ॥ ५१

सहा विजितषड्वर्गः सदैवाद्यो भवानघ ॥ ५९ ॥ विप्रान्वेदविदः शांतान्नयनीश्च नि
यमोज्वलान् ॥ ब्रह्मचर्यरतान्पुण्यान् वानप्रस्थांश्च पूजय ॥ ६० ॥ पुण्यवृक्षास्तथा पु
ण्यतीर्थं पुण्यमहत्सरः ॥ धेनुं च वृषभं रत्नं युवतीश्च पतिव्रताः ॥ ६१ ॥ आत्मनोय
हदेवानिसह सैव नमस्कुरु ॥ मातृसेवापरो नित्यं पितृसेवापरो भव ॥ ६२ ॥ उत्था
य समये ब्राह्मे स्वाचांतो विमलाशया ॥ नमस्कृत्यात्मगुरवे ध्यायेद्देवमुमापतिं
॥ ६३ ॥ नारायणीं च लक्ष्मीं च ब्रह्माणं च विनायकं ॥ स्कंदं कात्यायनीं चैव महाल
क्ष्मीं सरस्वतीं ॥ ६४ ॥ इंद्रादीन् अथ लोकेशान् पुन्यश्लोकान्मुनीनपि ॥ चिंतयित्वा
यमाप्तेडं मुदितं प्रणमेत्सदा ॥ ६५ ॥ गंधपुष्पं च तांबूलं शाकं पक्वफलादिकं ॥ शि
वाय दत्वा भक्षेस्व यत्पूर्वं प्रियं तव ॥ ६६ ॥ यद्धुतं यत्कृतं तत्तं यस्मात्तं यद्धुतं तस्म

ब्रसो. तं॥ यज्जतप्तं तपः सर्वं तत्शिवाय समर्पय॥६६॥ भुंजानः पर्यटन्नतिष्ठन्शयानो
१६६ विहरन्नपि॥ अश्नन्शृण्वन्वदन्गृह्णन्शिवमेव सदा स्मर॥६७॥ रुद्राक्षकंकण
लसत्करदंडयुग्मो भालांतरालधृतभस्मत्रिपुंड्रकंच॥ पंचाक्षरं परिपठन्वरमं
त्रराजन्ध्यायन्मुदा पशुपतेश्चरणारविंदं॥६८॥ इति संक्षेपतो वत्स कथितो ध
र्मसंग्रहः॥ अन्येषु च पुराणेषु विस्तरेण प्रकीर्तितः॥६९॥ सूत उवाच॥ एवमु
क्तः स्थितो योगी तदोवाच नृपांगना॥ देहस्मिन्शिवमंत्रं त्वं तथा वर्म शिवात्मकं॥७०
॥ माता त्वं नः पिता त्वं नः सर्वं त्वं नः सदा गुरो॥ अथ हीनं कुरु त्वेनं बालकं मां च १६६
सन्मते॥७१॥ ततः श्रावेत्रपतं बालं कर्णे मंत्रं न्यवेदयत्॥ सप्तसर्पाश्च तद्देहान्नि
र्गताः षट्फणान्विताः॥७२॥ पापाः सप्तैव निर्याताः सर्परूपेण देहतः॥ तान्प्रोवा

च महायोगी केयूयं देहमाश्रिताः॥७३॥ भीताः सर्पाः प्रदग्धाश्च शिवमंत्रप्रवे
शतः॥ मंत्रो गरुडरूपेण बाधतो विनिर्निर्गताः॥७४॥ सप्त सर्पाः पुत्रपापात्पू
र्वजन्मकृताद्द्विषो॥ वैश्यपासंगात्समुद्भूताः शिवमंत्राद्विनिर्गताः॥७५॥ त्वमस्या
मृतरूपेण जीवनार्थं समागतः॥ नोचेद्वयं न गच्छामो जन्मजन्मांतरैरपि॥७६
॥ मांसाशी द्यूती च जारी च मृषाभाषी च निर्दया॥ मद्यपानी ह्यनाचारी सप्तैते हि
वयं स्मृताः॥७७॥ शिवमंत्रगरुडेन द्राविता भयविह्वलाः॥ अस्य देहे वयं स्था
तुं न शक्ताः सप्त पन्नगाः॥७८॥ अस्माद्देहे पि वर्तंते राजपत्न्याश्च पन्नगाः॥ सप्तै
व संस्थिता ब्रह्मन्नस्माकं प्रियबांधवाः॥७९॥ तैः सार्द्धं गमनोत्कंठा वर्त्तते नो द
यानिधे॥ एवमुक्तेषु सर्पेषु शिवयोगी तदा स्मरन्॥८०॥ राजपत्न्याश्च वम्मि

ब्रलो॰
१६९ शिवमंत्रमथाक्षिपत्॥ मंत्रतार्क्ष्यप्रवेशेण सर्वेते पन्नगा द्रुतं॥८२॥ योगीनःपर
तःस्थातुंनशक्ताभस्मतांगताः॥ पापरूपामहाक्रूराषट्फणावंतएवच॥८
३॥ नृपस्यबालाचतथैववपुश्चोद्वयंविशुद्धिकृतसर्वगात्रं॥ पात्रंकृतंशांभव
सद्गुणानांयोगीश्वरेणैवमनुपदेशात्॥८४॥ तेसप्तसर्पानृपबालकस्यांगच्चा
र्यपापंविलयंगताश्च॥ एवंप्रभावोशिवमंत्रजन्योधन्योनरःप्राप्यसुखंल
भेत॥८५॥ योगीपुनस्तांनयनाभिरामांराजस्त्रियंवाक्यमुवाचचारु॥ रंभोरुपु १६९
त्रस्यददामिसारंवर्मेशिवंदिव्यमनंतमाद्यं॥८६॥ अतःपरंसर्वपुराणगुह्यं
निःशेषपापौघहरंपवित्रं॥ जयप्रदंसर्वविपद्विमोचनंवक्ष्यामिशैवंकव
चंहितायते॥८७॥ यःशृणोतिनरोभक्त्यातस्यपापंविनश्यति॥ रोगादिमुच्य

तेसोपिपरत्रेहचशर्मभाक्॥८८॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभद्रायुश्च
रितेत्रयोविंशतिमोऽध्यायः॥२३॥ ॥ऋषभउवाच॥ ॥नमस्कृत्यमहादेवंसर्व
व्यापीनमीश्वरं॥ वक्ष्येशिवमयंवर्मसर्वरक्षाकरंनृणां॥१॥ शुचौदेशेसमा॰
सीनोयथावत्कल्पितासनः॥ जितेंद्रियोजितप्राणश्चिंतयेच्छिवमव्ययं॥२॥ ॥
ॐअस्यश्रीशिवकवचस्तोत्रस्यऋषभोऋषिरनुष्टुभादिछंदांसि॥ श्रीमहाशिवो
देवताह्रूंबीजंह्रींशक्तिःह्रूःकीलकं॥ ममचतुर्विधपुरुषार्थसिध्यर्थेजपेवि॰
नियोगः॥ ॥ॐह्रौंह्रींमहाशिवायअंगुष्ठाभ्यांनमः॥ ह्रींगंगाधरायतर्जनीभ्यांन
मः॥ ॐमृत्युंजयायमध्य॰॥ ॐह्रैंशूलपाणयेअनामी॰॥ ॐह्रौंअंबिकापतयेक
निष्ठि॰॥ ॐह्रःउमापतयेकरतल॰॥ एवंन्यासादिविधायशिवंध्यात्वाकवचं

अ.सो.
१६८ नमः॥३॥ ॥इतिध्यानं॥ ॥अथवाशिवषडक्षरमंत्रेणकरांगन्यासंकुर्यात्॥ॐ

पठेत्॥हेतवेजगतामेवसंसारार्णवसेतवे॥प्रभवेसर्वविद्यानांशंभवेगुरवे
नमः॥३॥ ॥इतिध्यानं॥ ॥अथवाशिवषडक्षरमंत्रेणकरांगन्यासंकुर्यात्॥ॐ
अंगु०॥शिं त०॥वां म०॥यअ०॥नक०॥मंकर०॥ ॥हृत्पुंडरीकांतरसंनिविष्टंस्वतेज
साव्याप्तनभोवकाशं॥अतींद्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं॥
४॥ध्यानावधूताखिलकर्मबंधश्चिरंचिदानंदनिमग्नचेताः॥षडक्षरन्याससम
माहितात्माशैवेनकुर्यात्कवचेनरक्षां॥५॥मांपातुदेवोऽखिलदेवतात्मासं
सारकूपेपतितंगभीरे॥तन्नामदिव्यंवरमंत्रमूलंधुनोतुमेसर्वमघंहृदि १६९
स्थं॥६॥सर्वत्रमांरक्षतुविश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥अणोरणी
यानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात्॥७॥योभूमिरूपेणबिभर्त्ति

विश्वंपायात्सभूमेर्गिरिशोऽष्टमूर्त्तिः॥योपांस्वरूपेणनृणांकरोतिसंजीवनंसो
वतुमांजलेभ्यः॥८॥कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्यतिपूर्णली
लः॥सकालरुद्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात्॥९॥प्रदीप्त
विद्युत्कनकावभासोविद्यावराभीतिकुठारपाणी॥चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः
प्राच्यांस्थितोरक्षतुमामजस्रं॥१०॥कुठारवेदांकुशपाशशूलकपालढक्काक्षगु
णंदधानः॥चतुर्मुखोनीलरुचिस्त्रिनेत्रःपायादघोरोदिशिदक्षिणस्यां॥११॥कुं
देंदुशंखस्फुटिकावभासोवेदाक्षमालावरदाभयांकः॥अक्षश्चतुर्वक्त्रउरुप्र
भावःसद्योधिजातोवतुमांप्रतीच्यां॥१२॥वराक्षमालावरटंकहस्तःसरोजकिं
जल्कसमानवर्णः॥त्रिलोचनश्चारुचतुर्मुखोमांपायादुदीच्यांदिशिवामदे

ब्र.स्तो. व॥१३॥वेदाभयाद्यंकुशपाशटंककपालढक्काक्षकशूलपाणिः॥सितद्युतिः
१६९ पंचमुखोवतान्मामीशानमूर्द्धापरमप्रकाशः॥१४॥मूर्द्धानमव्यान्ममचंद्रमौ
लिर्भालंममाव्यादथभालनेत्रः॥नेत्रेममाव्याद्भगनेत्रहारीनासांसदारक्षतु
विश्वनाथः॥१५॥पायाच्छ्रुतीमेश्रुतिगीतकीर्त्तिः कपोलमव्यात्सकपालमाली॥
वक्त्रंसदारक्षतुपंचवक्त्रोजिह्वांहरोरक्षतुविश्वजिह्वः॥१६॥कंठंगिरीशोवतुनी
लकंठः पाणिद्वयंपातुपिनाकपाणि॥दोर्मूलमव्यान्ममधर्मबाहोवक्षस्थलंदक्ष
मखांतकारी॥१७॥ममोदरंपातुगिरीन्द्रधन्वामध्यंममाव्यान्मदनांतकारी॥हेरंब १६९
तातोममपातुनाभिंपायात्कटिंधूर्जटिरीश्वरोमे॥१८॥ऊरुद्वयंपातुकुबेरमित्रो
जंघाद्वयंपुंगवकेतुरव्यात्॥जानुद्वयंमेजगदीश्वरोव्यात्पादौममाव्यात्सुरवंद्य

पादः॥१९॥महेश्वरःपातुदिनादियामेमांमध्ययामेवतुवामदेवः॥त्र्यम्बकः
पातुतृतीययामेवृषध्वजःपातुदिनांतयामे॥२०॥पायान्निशादौशशिशेखरो
मांगंगाधरोरक्षतुमांनिशीथे॥गौरीपतिःपातुनिशावसानेमृत्युंजयोरक्षतुमा
मजस्रं॥२१॥अंतःस्थितंरक्षतुशंकरोमांस्थाणुःसदापातुबहिःस्थितंमां॥तदं
तरेपातुपतिःपशूनांसदाशिवोरक्षतुमांसमंतात्॥२२॥तिष्ठंतमव्याद्भुवनै
धिनाथःपायाद्व्रजंतंगगनाधिनाथः॥वेदांतवेद्योवतुमांनिषण्णमामव्ययः
पातुसदाशयानं॥२३॥मार्गेषुमांरक्षतुनीलकंठःशैलादिदुर्गेषुपुरत्रयारिः॥
अरण्यवासादिमहाप्रवासेपायान्मृगव्याधउदारशक्तिः॥२४॥कल्पांतकाटो
पपटुप्रकोपःस्फुटाट्टहासोच्चलितांडकोशः॥घोरादिसेनार्णवदुर्निवार॰न॰

श्रा.सो. महाभयादक्षतु वीरभद्रः॥२५॥ पत्यक्षमातंगघटावरूथसहस्र[illegible]लक्षायु
१७० तकोटिभीषणं॥ अक्षौहिणीनांशतमाततायिनां भिंद्यान्महाघोरकुगारधारया
॥२६॥ निहंतु शत्रून्प्रलयानलार्चिर्ज्वलन्त्रिशूलंत्रिपुरांतकस्य॥ दुर्लंघ्य
सिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुःपिनाकः॥२७॥ दुःस्वप्नदुःशकुन
नदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पातविशात्सकलभी
तिमहाग्रहार्त्तिव्याधींश्चनाशयतुमेजगतामधीशः॥२८॥ ॐनमोभगवतेस
दाशिवायसकलतत्वात्मकायसकलतत्वविदुराय॥ सकललोकैककर्त्रेसक १७०
ललोकैकहर्त्रेसकललोकैकगुरवेसकललोकैकसाक्षिणे॥ सकललोक
निगमगुह्यायसकललोकवरप्रदायसकलदुःखार्त्तिभंजनाय॥ सकलजग

दभयंकरायसकललोकैकशंकरायशशांकशेखरायशाश्वतनिजावासाय
निःसंगायनिर्मलाय॥ निरूपमनिवासायनिराधारायनित्यशुद्धपरिपूर्णस
च्चिदानंदाद्वयाय॥ परमशांतप्रकाशतेजोरूपाय॥ जयजयमहारुद्रमहारौद्रदुः
खदावानलविदारणमहाभैरवकालभैरवकल्पांतभैरवकपालमालाधरख
ट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंदिपालतोमर
मुशलमुद्गरप्रासपरशुपरिघभुशुंडिशतघ्नीचक्रायुधभीषणकरसहस्र
मुखदंष्ट्राकरालनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविरूपाक्षवि
श्वेश्वरवृषभवाहनविभूषभूषणविश्वतोमुखसर्वतोरक्षरक्षमांपालय
पालय॥ मृत्युभयंनाशयनाशयसर्वरोगभयमुत्सादय२विषसर्पभयंश

ब्र.सों. मय २॥ चोरान्मारय मारय ॥ मम शत्रून्घातय २॥ त्रिशूलेन विदारय २॥ कुठारेण भिं
१२१ दि २॥ कुठारेण भिंदि २॥ खड्गेन छिंधि २॥ खट्वांगेन विपोथय २॥ मुशलेन निष्पेष
य २॥ बाणैः संताडय २॥ रक्षांसि भीषय २॥ भूतानि विद्रावय २॥ कूष्मांडान् संत्रा
सय २॥ वेतालान् भर्त्सय २॥ मारिगणं त्रासय २॥ ब्रह्मराक्षसान् संत्रासय २॥
मिऽभयं कुरु २॥ वित्रस्तं मामाश्वासय २॥ नरकभयान्मामुद्धरोद्धर ॥ मां सं
जीवय २॥ क्षुत्तृड्भ्यां माप्यायय २॥ दुःखातुरं समानय शिवकैः वचेन मामाछादय
त्र्यंबक नमस्ते ॥३॥ ऋषभ उवाच ॥ इत्येतत्कवचं दिव्यं यन्मया व्याहृतं त ७१
व ॥ सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनां ॥२८॥ यः सदा धारयेन्मर्त्यः शैवं क
वचमुत्तमं ॥ भयं न जायते क्वापि तस्य शंभोरनुग्रहात् ॥२९॥ क्षीणायुः प्रा
मामनंदयानंदय ॥ शिवकवचेन मामा●छादयाछादय ॥

प्तमृत्युर्वा महारोगहतोऽपि वा ॥ सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदते ॥३०॥ सर्वद
रिद्रशमनं सौमांगल्यविवर्द्धनं ॥ यो धत्ते कवचं दिव्यं स देवैरपि पूज्यते ॥३१॥ महा
पातकसंघातैर्मुच्यते चोपपातकैः ॥ देहांते मुक्तिमाप्नोति शिववर्मानुभावतः ॥३२
॥ त्वमपि श्रद्धया वत्स कवचं शैवमुत्तमं ॥ धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्य
सि ॥३३॥ इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ॥ ददौ शंखं महानादं खड्गं
चारिनिषूदनं ॥३४॥ पुनश्च भस्म संमंत्र्य तदंगं परितस्पृशत् ॥ गजानां षट्सह
स्रस्य द्विगुणस्य बलं ददौ ॥३५॥ भस्मप्रसादात्संप्राप्य बलैश्वर्यधृतिस्मृतिः ॥ स
राजपुत्रः शुशुभे शरदर्क इव श्रिया ॥३६॥ तमाह प्रांजलिं भूयः स योगी नृपनंदनं
॥ एष खड्गो मया दत्तः शिवमंत्रानुभावितः ॥३७॥ शितधारमिमं खड्गं यस्मै दर्शय

ब्र.खं. सिस्फुटं॥ससद्योम्रीयतेशत्रुः साक्षान्मृत्युहतः स्वयं॥३८॥अस्यशंखस्यनिर्ह्रादंये
१७२ शृण्वंतितवाहिताः॥तेमूर्छिताः पतिष्यंतिन्यस्तशस्त्राविवाससः॥३९॥शंखख
ड्गाविमौदिव्यौपरसैन्यैर्विघातिनौ॥आत्मसैन्यस्वपक्षाणांशौर्यतेजोविधायिनौ
॥४०॥एतयोश्चप्रभावेनशैवेनकवचेनच॥द्विषट्सहस्रनागानांबलेनम
हतापिवा॥४१॥अस्यधारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि॥प्राप्यसिंहासनंपै
त्र्यंगोप्तासिपृथिवीमिमां॥४२॥इतिभद्रायुषंसम्यगनुशास्यसमात्रकं॥ता
भ्यांसंपूजितः सोथययौस्वरगतिंमुनिः॥४३॥ ॥इतिश्रीस्कंदपुराणेब्रह्म १७२
ोत्तरखंडेशिववर्मानुकथनंनामचतुर्विंशोऽध्यायः॥२४॥ ॥सूतउवाच॥ ॥
दशार्णाधिपतेस्तस्यवज्रबाहोर्महौजसः॥बभूवशत्रुर्बलवान्राजामागध

वंशजः॥१॥सवैहेमरथोनामबाहुशालीरथोद्धतः॥बलेनहैमहतायुक्तोदशा
र्णान्यरुधद्बली॥२॥चमूपास्तस्यदुर्धर्षाः प्राप्यदेशंदशार्णकं॥व्यपयन्वसु
रत्नानिगृहाणिदद्दुहुर्बजात्॥३॥केचिद्धेमानिजगृहुः केचिद्धान्यांस्तथापरे॥गो
धनान्यपरेजह्रुः केचिद्धान्यपरिच्छदान्॥४॥केचिदारामसस्यानिगृहोद्यानान्य
नाशयत्॥एवंविनाशयतद्राज्यंगोधनादिजिघृक्षवः॥५॥आवव्रुस्तस्यनग
रंवज्रबाहोश्चमागधाः॥एवंपर्याकुलंवीक्ष्यराज्यंनगरमेवच॥६॥युद्धायन
निर्जगामाशुवज्रबाहुः ससैनिकः॥वज्रबाहोश्चभूपाश्चतथामंत्रिपुरस्स
राः॥७॥युयुधुर्मुहुर्जघ्नुरुरुद्धुर्दुर्बुबद्धहान्॥वज्रबाहोर्मदांधोसौदंशितोरथ
मास्थितः॥८॥विकिरन्बाणवर्षंचचकारकदनंमहत्॥दशार्णराजंयुध्यंतंद

श्रेलो॰ ७२
ष्ट्वायुद्धेसुदुःसहं॥९॥तमेवतरसावव्रुःसर्वेमागधसैनिकाः॥कृत्वातुसचिरंयु
द्धंमागधाद्दृढविक्रमाः॥१०॥तत्सैन्यंनाशयामासुर्लेभिरेचजयश्रियं॥केचित्त्र
स्यरथंजघ्नुःकेचिद्धनुरथाछिनरत्॥११॥सूतंतस्यजघानेकस्त्वपरःखड्गमाछि
नत्॥सच्छिन्नखड्गधन्वानंविरथंहतसारथिं॥१२॥बलाद्गृहीत्वाबजतोवबंधुर्वा
जिनोरुषा॥तस्यमंत्रिगणंसर्वंतस्यसैन्यंविजित्यते॥१३॥मागधास्तस्यनगरं
विविशुर्जयकांक्षिणं॥अश्वान्गजान्रथानुष्ट्रान्पशुधान्यधनानिच॥१४॥जर
गृहुर्यवतीःसर्वाश्चावंशीरपिकन्यकाः॥राज्ञोवरोधमहिषीदासीश्चैवसहस्र
शः॥१५॥कोशंचरत्नसंपूर्णंजगृहुस्तातताधिन॥एवंविनाशयन्नगरंभृत्यस्त्रीगो
धनादिकं॥१६॥वज्रबाहुबलाद्धृत्वारथेस्थाप्यविनिर्ययुः॥एवंकोलाहलेजातेरा ७२

ष्ट्रनाशेसुदारुणे॥१७॥राजपुत्रोथभद्रायुस्तद्दृष्ट्वान्याश्रणोद्बली॥पितरंशत्रुभि
र्बद्धंपितृपत्नीस्तथाहृताः॥१८॥नष्टदेशार्णराष्ट्रंचश्रुत्वाचुक्रोशसिंहवत्॥स
शंखरखड्गवादायवैश्यपुत्रसहायवान्॥१९॥कुमारोहयमारूढोदंशितोवि
जिगीषया॥जवेनागत्यतंदेशंमागधेराहवंतदा॥२०॥भज्यमानंक्रंदमानं
हस्तिस्त्रीधनगोधनं॥दृष्ट्वाराष्ट्रजनंसर्वंराजसूनुर्भयावहं॥२१॥क्रोधाध्मात
मनास्तूर्णंप्रविश्यरिपुवाहिनीं॥आकर्णकृष्टकोदंडववर्षशरसंततिं॥२२॥
तेहन्यमानारिपवोराजपुत्रेणसायकैः॥तमभिद्रुत्यवेगेनशरैर्विव्यधुरुल्ब
णैः॥२३॥हन्यमानोस्त्रवेगेनरिपुभिर्युद्धदुर्मदैः॥नचचालरणेधीरःशिववर
र्मभिरक्षितः॥२४॥सोप्यस्त्रंप्रतिगृह्याशुप्रविश्यगजलीलया॥जघानाश्वा

ब्रस्तो. ७४ न्रथान्नागान्पदातीनपिकोटिशः॥२५॥तत्रैवन्रपतिंहत्वाससूतंनृपनं
दन॥तमेवहयमास्थायवैन्रयनंदनसारथिः॥२६॥विचचाररणेधीरःसिंहोमृ
गकुलेयथा॥अथसर्वस्तुसंरब्धाःशरैःपोद्धृंडकार्मुकाः॥२७॥असिसस्तुस्तमेवै
कंचमुपाःक्रोधमूर्छिता॥तेषामापततामग्रेखड्गमुद्यम्यदारुणं॥२८॥अभ्युद्य
योमहावीरोदर्शयन्निवपौरुषं॥कल्पांतकविजिह्वाभंतस्यखड्गंमहोज्वलं॥२९॥
दृष्ट्वैवसहसासर्वेश्चमुपास्तत्रभावतः॥येयेपश्यंतितत्खड्गंप्रस्फुरंतंरणांग ७४
णे॥३०॥तेसर्वेनिधनंजग्मुर्वह्निंप्राप्येवकीटकाः॥अथासौसर्वसैन्यानांविनाश
यमहाभुजः॥३१॥शंखंदध्मौमहारावंपूरयन्निवरोदसी॥तेनशंखनिनादेनवि
पद्येनैवभूयसा॥३२॥क्षतमात्रेणरिपवोमूर्छितान्यपतन्भुवि॥येस्वरथेरथेये

चयेचदंतिषुसंस्थिताः॥३३॥तेविसंज्ञाःक्षणात्येतुःशंखनादहतौजसः॥तान्
हमौपतितान्सर्वान्नष्टसंज्ञान्निरायुधान्॥३४॥विगणय्यन्रपप्राणान्नावधी
धर्मशास्त्रवित्॥आत्मनःपितरंबद्धंमोचयित्वारणेजितं॥३५॥तत्पत्नीःशत्रुबद्धा
श्चसर्वाःसद्योविमोचयत्॥पत्नीश्चमंत्रिमुख्यानांतथान्येषांपुरौकसां॥३४॥स्त्रि
योबालाश्चकन्याश्चगोधनान्यनेकशः॥मोचयित्वारिपुभयात्समाश्वास्यभया
तुरान्॥३५॥स्यंदनानिविचित्राणिदासीश्चरुचिराननाः॥सर्वमाहृत्यवेगेनगृ
हीत्वाचधनादिकं॥३६॥तेषांसर्वाणिवस्त्राणिभूषणान्यायुधानिच॥सर्वस्वं
भृत्यसात्कृत्वाराजांतिकमुपागमत्॥३७॥मागधेशंहेमरथंस्वखड्गेणपराजि
तं॥तन्मंत्रिणश्चभूपांश्चतत्रमुख्यांश्चतान्नृपः॥३८॥गृहीत्वातरसाबध्वापु

रीप्रावेशयद्द्रुतं॥पूर्वैर्येसमरेभग्नाःसचिवाःसर्वतोदिशं॥३९॥येमंत्रिमुख्याआ
यस्तानायकाश्चसमाययुः॥कुमारविक्रमंदृष्ट्वासर्वेविस्मितचेतसः॥४०॥तंमे
निरेसुरश्रेष्ठंकारणादागतंभुवि॥अहोनःसुमहद्भाग्यमहोनःसुमहत्फलं॥४१
केनाप्यनेनवीरेणमृताःसंजीविताःपुनः॥एषकिंयोगसिद्धोवायोगीवासु
रपः॥किमु॥४२॥अमानुषमिदंकर्मयदनेनकृतंमहत्॥नूनमस्यभवेन्माता
गौरीसचशिवःपिता॥४३॥अक्षौहिणीनांनवकंजघानातीववल्किधृक्॥इत्या
श्चर्ययुतैर्हृष्टैःप्रश्नंसद्भिःपरस्परं॥४४॥पृष्टोमहाजनेनासौनात्मानंप्राहतत्त्वः
तः॥योभ्यागत्यस्वपितरंविस्मयाह्लादविह्वलं॥४५॥मुंचंतमानंदजलंववंदेप्रे
मविह्वलः॥सराजानिजपुत्रेणप्रणयादभिवादितः॥४६॥आश्लिष्यगाढंतरसाब

भाषेप्रेमनिर्भरः॥कस्त्वंदेवोमनुष्योवागंधर्वोवामहीपतिः॥४७॥कामाताजनकः
कोवाकोदेशस्तवनामकिं॥कस्मान्नःशत्रुभिर्बद्धान्मृतानीवमहौजसा॥४८॥का
रुण्यादिहसंप्राप्यसपत्नीकान्व्यमोचयत्॥कुतोलब्धमिदंशौर्यंवीर्यंतेजो
बलोन्नतिं॥४९॥जिगिषुरिवलोकांस्त्रीन्सर्वाभिर्दारबांधवैः॥इमान्पुत्रानिमाः
पत्नीरिदंराज्यमिदंपुरं॥५०॥सर्वंविहायमच्चित्तंत्वय्येवप्रेमबंधनं॥सर्वंकथय
मेतातमत्प्राणपरिरक्षकं॥५१॥एतासांममपत्नीनांत्वदधीनंहिजीवितं॥सू
तउवाच॥इतिपृष्टस्तुभद्रायुस्सपित्रातमभाषत॥५२॥एषवैश्यसुतोराजन्
सुनयोनाममत्सखः॥अहमस्यगृहेरम्येवसामीसहमातृकः॥५३॥भद्रायुर्नाम
मधृतंपश्चाद्विज्ञापयामिते॥पुरंप्रविश्यभद्रंतेसदारस्तुसुहृज्जनः॥५४॥त्वय

ब्र.मो. कृत्वाभयमरातीभ्योविहरस्वयथासुखं॥नैतान्मुंचरिपुंस्तावद्यावदागमनंमम
१७६ ॥५५॥अहमद्यगमिष्यामिद्रष्टुंमातुर्निवेशनं॥इत्युक्त्वानृपमामंत्र्यभद्रायुर्नृप
नंदनः॥५६॥जगामभवनंमातुस्तत्रसर्वंन्यवेदयत्॥सापिदृष्ट्वास्वतनयंपरि
रेभेश्रुलोचना॥५७॥सचवैश्यपतिप्रेम्णासमाश्लिष्याभ्यपूजयत्॥वज्रबा
हुश्चराजेंद्रःप्रविष्टोनिजमंदिरं॥५८॥स्त्रीपुत्रामात्यसहितःप्रहर्षमतुलंय
यौ॥तस्यांनिशायांव्युष्टायांऋषभोयोगिनांवरः॥५९॥चंद्रांगदंसमागम्यसी १७६
मंतिन्याःपतिंनृपं॥भद्रायुषःसमुत्पत्तिंतस्यकर्माप्यमानुषं॥६०॥आवेद्यरह
सिप्रेम्णातत्सुतांकीर्तिमालिनीं॥भद्रायुषेप्रयच्छेतिबोधयित्वासनैषधं॥६१॥
ऋषभोनिर्जगामाशुदेशकालार्थतत्त्ववित्॥अथचंद्रांगदोराजामुहूर्तेमंग

लान्विते॥६२॥भद्रायुषंसमाहूयप्रायच्छत्कीर्तिमालिनीं॥कृतोद्वाहःसराजेंद्रः
कुमारःसहभार्यया॥६३॥हेमासनस्थःसुशुभेरोहिण्येवनिशाकरः॥वज्रबाहुंतत
पितरंसमाहूयसनैषधः॥६४॥पुरंप्रावेश्यसामात्यंप्रत्युद्गम्याभ्यपूजयत्॥त
त्रापत्रपत्कृतोद्वाहंभद्रायुषमरिंदमं॥६५॥पादयोःपतितंप्रेम्णाहर्षाश्रुपरिस
स्वजे॥एषमेप्राणदोविप्रएषशत्रुनिबर्हणः॥६६॥अयाप्यज्ञातवंशोयमथा
नंतपराक्रमः॥एषतेनृपजामाताचंद्रांगदमहाबलः॥६७॥अस्यवंशमथोत
त्तिंश्रोतुमिच्छामिसांप्रतं॥इत्थंदशार्णराज्ञावैप्रार्थितोनिषधाधिपः॥६८॥वि
वक्तुउपसंगम्यप्रहसन्निदमब्रवीत्॥एषतेतनयोराजन्शैशवेरोगपी
डितः॥६९॥त्वयावनेपरित्यक्तःसहमात्रारुजार्त्तया॥परिभ्रमंतिविजनेस

ब्रह्मो. रीशिशुनासह॥७०॥दैवाद्वैरग्रहंप्राप्तातेनवैरेणनरक्षिता॥अथासौबहुरोगा
११ र्तोमृतस्तवकुमारकः॥७१॥केनापियोगिनाराजन्मृतसंजीवितःपुनः॥त्र।
षत्वाख्यस्यतस्यैवप्रभावाद्धियोगिनः॥७२॥रूपंचदेवसदृशंप्राप्तौमातृ
कुमारकौ॥तेनदत्तेनखड्गेनशंखेनरिपुघातिना॥७३॥जिगायसमरेशत्रूनग्नि
ववर्माभिरक्षितः॥द्विषट्सहस्रनागानांबलमेकोबिभर्त्यसौ॥७४॥सर्वविद्या
सुनिष्णातोममजामातृतांपुनः॥अतएनंसमादायमातरंचास्यसुव्रतां॥७५॥ ११
गत्वात्मनगरंराजन्प्राप्स्यसिश्रेयमुत्तमं॥इतिचंद्रांगदःसर्वमाख्यायांतगृ
हेस्थितं॥७६॥तस्याग्रपत्नीमाहूयदर्शयामासभूषितां॥इत्यादिसर्वमाकर्ण्य
दृष्ट्वासचमहीपतिः॥७७॥व्रीडितोनितरांमोहात्स्वकृतंकर्मगर्हयन्॥प्राप्तस्वप

रमानंदंतयोर्दर्शनकौतुकात्॥७८॥पुलकांकितसर्वांगस्तावुभौपरिसस्वजे॥
एवंनिषधराज्ञाचपूजयित्वाभिवंदितः॥७९॥संभोजयित्वातंसम्यक्सवृंदंसह
मंत्रिभिः॥तामात्मनोप्यग्रजायांतुपुत्रंतामपिस्नुषां॥८०॥आदायसपरीवारोव
त्रबाहुःपुरींययौ॥ससंभ्रमेणमहताभद्रायुःपितृमंदिरं॥८१॥संप्राप्यपर
मादंनंदंचक्रेसर्वदिवौकसां॥कालेनदिवमारूढेपितरीप्राप्तयौवनः॥८२॥
भद्रायुःपृथिवींसर्वांशशासाद्भुतविक्रमः॥मागधेशंहेमरथंमोचयामास
बंधनात्॥८३॥संधायपरमांमैत्रींमहर्षीणांचसन्निधौ॥८४॥इत्थंत्रिलोकमह
तीशिवयोगीपूजांकृत्वापुरातनभवेपिसराजसूनुः॥निस्तीर्यदुःस्तरविपज्ज
र्णमाप्रराज्यंचंद्रांगदस्यतनयासहसाधुरेमे॥८५॥इदंमनुष्याःशृणुयाच्चनि

ब्रह्मो॰ तंभावेननरोभवपदाब्जविनिविष्टचेताः॥ तस्मिंडदेवैभवसमानसुखंनलोकेभूया
१२८ स्तुनर्मरणमाप्यशिवंप्रयाति॥८८॥ आयुष्यंतस्यविपुलंभवतिप्रसिद्धिःसर्वत्रत
स्यखलुस्याच्चसुतादिकीर्त्तिः॥ संसारसौख्यमनिशंबहुवंशमध्येसंप्राप्ययातिम
रणावसरेसधाम॥८९॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवभक्तपूज
ननिरूपणोनामपंचविंशतिमोऽध्यायः॥२५॥ ॥सूतउवाच॥ ॥प्राग्रसिंहासनो
वीरोभद्रायुःसमहीपतिः॥ प्रविवेशवनंरम्यंकदाचित्प्रिययासह॥१॥ तस्मि
न्विकचाशोकप्रसूननवपल्लवे॥ प्रोत्फुल्लमल्लिकाखंडकुंजद्भ्रमरसंकुले॥ १२८
नवकेसरसौरभ्यलुब्धरागीजनोत्सवे॥ सद्यःकोरकिताशोकतमालगहनांत
रे॥३॥ प्रसूनप्रकरानम्रमाधवीवनमंडपे॥ प्रवालकुसुमोद्योतद्भारवाभिरभिरंजि

ते॥४॥ पुन्नागवनविभ्रांतपुंस्कोकिलविराजिते॥ वसंतसमयेरम्येविजहारप्रि
यासखः॥५॥ अथाविदूरेक्रंदंतौद्रवंतौद्विजदंपती॥ अन्वीयमानौव्याघ्रेणददृ
शेनृपसत्तमः॥६॥ पाहिमहाराजभोनाथकरुणानिधे॥ एषआयातिशार्दूलोज
घुर्मावांमहारथ॥७॥ एषःपर्वतसंकाशःसर्वप्राणिभयंकरः॥ यावन्नखादति
प्राप्तस्तावन्नौरक्षभूपते॥८॥ इत्थमाक्रंदितंश्रुत्वासराजाधनुराददे॥ तावद
भ्येत्यशार्दूलोमध्येजग्राहतांवधूं॥९॥ हानाथनाथहाकांतहाशंभोहाजग
द्गुरो॥ इतिरोरूयमाणांतांव्याघ्रोजग्राहभीषणः॥१०॥ तावत्सराजानिशितैर्भल्लैर्व्या
घ्रमताडयत्तूर्णंतैर्विशिखैर्नव्यथेकिंचिद्गिरिरिवेववृष्टिभिः॥११॥ सशार्दूलोमहा
सत्त्वोराज्ञोस्त्रैरकृतव्यथः॥ बलादाकृष्यतांव्याघ्रोजगामसत्वरंततः॥१२॥ व्या

ब्रसो· ग्रेणापहृतांनारींवीक्ष्यविप्रोतिदुःखितः॥ क्रोशद्दहप्रियेबालेहाकांतेहापतिव्र-
७९ ते॥१३॥ मामेकमिहसंत्यज्यकथंलोकांतरंगता॥ प्राणेभ्योपिप्रियंतल्पक्त्वाकथंजी-
वितुमुत्सहे॥१४॥ राजन्क्वतेमहास्त्राणिक्वतेश्लाघ्यंमहाधनुः॥ क्वतेद्वादशसा-
हस्रमहानागातिगंबलं॥१५॥ किंतेखड्गेनशंखेनकिंतेविद्यास्त्रशक्तिभिः॥ किं
सत्वेनप्रतापेनकिंप्रभावेनतोयशः॥१६॥ तत्सर्वंविफलंजातंयच्चान्यत्त्वयितिष्ठ-
ति॥ यस्त्वंवनौकसंराजन्ननिवारयितुंक्षमः॥१७॥ क्षत्रस्यायंपरोधर्मःक्षताद्य-
त्परिरक्षणं॥ तस्मिन्कुलोचितोधर्मेनष्टेतज्जीवितेनकिं॥१८॥ आर्त्तानांशरणार्त्ता- ७९
नांत्राणंकुर्वंतिपार्थिवाः॥ प्राणैरर्थैश्चधर्मज्ञास्तद्विहीनामृतापुमाः॥१९॥ आर्त्त-
त्राणविहीनाश्चविनानमरणंवरं॥ धनीनांदानहीनानांधनंतुविफलंजायते॥२०॥

इत्थंविलापनंतस्यस्ववीर्यस्यचगर्हणं॥ निशम्यनृपतिःशोकादात्मन्येवव्यचिंतय-
त्॥२१॥ अहोमेपौरुषंनष्टंममदेवानसन्मुखाः॥ अद्यकीर्त्तिश्चमेनष्टापातकंप्राप्त-
मुत्कटं॥२२॥ गोब्राह्मणवधूनांचरक्षणंकर्ममामकं॥ तन्नष्टेहंमृतप्रायोभविष्या-
मिनसंशयः॥२३॥ धर्मःकालोचितोनष्टोहिमंदभाग्यस्यमेधुना॥ नूनंमेसंपदोराज्य-
मायुश्चक्षयमेष्यति॥२४॥ आयुषंसंपदोभोगाःपुत्रदारधनानिच॥ दैवेनक्षणघा-
तित्वात्क्षणादस्तंप्रयांतिच॥२५॥ अतएनंद्विजन्मानंहतदारंशुचार्दितं॥ हतशो-
कंकरिष्यामिदत्वाप्राणानपिप्रियान्॥२६॥ इतिनिश्चित्यमनसाभद्रायुर्नृपसत्त-
मः॥ पतित्वापादयोस्तस्यबभाषेपरिसांत्वयन्॥२७॥ कृपांकुरुमयीब्रह्मन्क्षत्रबं-
धौहतौजसि॥ शोकंत्यजमहाबुद्धेदास्याम्यर्थान्यथेप्सितान्॥२८॥ इदंराज्यमियंरा-

ब्रह्मो. ह्रीममचेदंकलेवरं॥त्वदधीनमिदंसर्वंकिंत्वेभिरखिलैर्विभो॥२९॥॥ब्राह्मणउवाच॥
१८० किमधर्म्यात्मवीर्येणकिंग्रहैर्भैक्ष्यजीविनः॥किंपुस्तकेनमूढस्यनिस्त्रीकस्यधनेन
किं॥३०॥अहोहंहतपत्नीकोऽभुक्तभोगोनकर्हिचित्॥इमांतवाग्रमहिषींकामयेदु
यतामियं॥३१॥॥राजोवाच॥॥ब्रह्मन्किमेषधर्मस्तेकिमेतद्गुरुशासनं॥अस्वर्ग्य
मयशस्यंचपरदाराभिमर्षणं॥३२॥दातारःसंतिवित्तस्यराज्यस्यगजवाजिनां॥
आत्मदेहस्यवाक्वापिनकलत्रस्यकर्हिचित्॥३३॥परदारोपभोगेनयत्पापस १८०
मुपार्जितं॥नतत्क्षालयितुंशक्यंप्रायश्चित्तैःशतैरपि॥३४॥॥ब्राह्मणउवाच॥॥
अपिब्रह्मवधंघोरंमय्यिमघनिवेषणं॥तपसानिर्हरिष्यामिकिंपुनःपरदारिकं
॥३५॥तस्मात्त्वंयच्छमेभार्यामिमांत्वंध्रुवमन्यथा॥अरक्षणाद्द्वयार्त्तानांगंता

सीनरकंध्रुवं॥३६॥इतिविप्रगिराभीतश्चिंतयामासपार्थिवः॥अरक्षणात्परंपा
पंपत्नीदानंततोवरं॥३७॥अतःपत्नींद्विजायास्मायदत्वानिर्मुक्तकिल्बिषः॥सद्योव
ह्निंप्रवेक्ष्यामिकीर्त्तिश्चावहिताभवेत्॥३८॥इतिनिश्चित्यमनसासमुज्वाल्यहुत-
ताशनं॥तंब्राह्मणंसमाहूयददौपत्नींसहोदकं॥३९॥स्वयंस्नातःशुचिर्भूत्वाप्रण-
म्यविबुधेश्वरान्॥तमग्निंत्रिःपरिक्रम्यशिवंदध्यौसमाहितः॥४०॥तमथाग्निंपति
ष्यंतंस्वपदासक्तचेतसं॥पतिषेधायविश्वेशःप्रादुर्भूतोजगत्पतिः॥४१॥तमीश्वरं
पंचमुखंत्रिनेत्रंपिनाकिनंचंद्रकलावतंसं॥प्रालंबितापिंगजटाकलापंमध्यं-
गताभास्करकोटितेजसं॥४२॥मृणालगौरंगजचर्मवासंवृषोपरिस्थंशितिकंठ
मीशं॥गौरीपतिंभक्तजनार्त्तिनाशनंप्रोद्भुतमग्रेनृपतिर्ददर्श॥४३॥अथांबरात्

ब्रसो॰ द्रुतंपेतुःदिव्याःकुसुमवृष्टयः॥प्रणेदुर्देवतूर्याणिदेव्यश्चननृतुर्जगुः॥४४॥तत्रा
१८१ जग्मुर्नारदाद्यास्तुयमानाःसहस्रशः॥इंद्रादयश्चलोकेशादेवब्रह्मर्षयोमलाः॥४५॥
तेषांमध्येमहादेवःसमासीनःसहोमया॥ववर्षकरुणासारंभक्तिनम्रेमहीपे
तो॥४६॥तद्दर्शनाह्लादविच्छिन्नभिन्नाशयःप्रवृद्धबाष्पांबुपरिप्लुतेक्षणः॥प्रवृद्धरो
मागलगद्गदाक्षरंतुष्टाववाग्भिर्मुकुलीकृतांजलिः॥४७॥॥राजोवाच॥॥नतोस्म्य
हंदेवमनादिमव्ययंप्रधानमव्यक्तगुणंमहंतं॥अकारणंकारणयेरूपंशिवंचि
दानंदघनंप्रपद्ये॥४८॥विश्वस्यसाक्षीजगतोस्यकर्त्तानिगूढधामाहृदिसन्निवि १८१
ष्टः॥अतोविचिन्वंतिधियाविपश्चितोयोगैरनेकैःकृतचित्तरोधैः॥४९॥एकात्मतां
भावयितुंत्वमेकोनानाधियायस्त्वमनेकरूपः॥अतींद्रियंशब्दमपास्तविश्वंमम

नःपथासंक्रियतेपदं॥५०॥नत्वांदुरापंमनसोधियश्चव्यपेतरूपंपरमात्मरूपं
॥गुणैकनिष्ठप्रकृतौविलीनाःकथंपुनःस्तोतुमलंगिरोमे॥५१॥तथापिभक्ता
श्रयतामुपेयुषःस्तवांघ्रियुग्मंप्रणतार्तिभंजनं॥सुघोरसंसारदवाग्निपीडितो
भजामिनित्यंभवभीतिशांतये॥५२॥नमस्तेदेवदेवायमहादेवायशंभवे॥न
मःस्त्रीमूर्तिभेदायसर्गसंस्थितिकारिणे॥५३॥नमोविश्वादिरूपायविश्वकृत्यप्र
साक्षिणे॥नमःसन्मात्रसत्तायबोधानंदघनायते॥५४॥सर्वक्षेत्रनिवासायक्षे
त्रभिन्नात्मशक्तये॥असक्तायनमस्तुभ्यंसक्ताभासायभूयसे॥५५॥निराभासाय
नित्यायसत्याज्ञानांतरात्मने॥विशुद्धायविमलाशेषधर्मिणे॥५६॥नमोवेदांतगु
ह्यायवेदमूलविकासिने॥नमोविविक्तचेष्टायनिर्वृत्तगुणवृत्तये॥५७॥नमःकल्या

अ्रसो·
१८२

णवीर्यायकल्याणफलदायिने॥नमोनंतायमहतेशांतायचशिवायच॥५८॥अघो
रायसुघोरायघोराघोरविदारिणे॥भर्ज्ञायभवबीजानांभर्गायचगरीयसे॥५९॥
नमोविधूतमायायविषदात्मगुणायच॥त्राहिमांजगतांनाथपाहिशंकरशाश्व
त॥६०॥पाहिरुद्रविरूपाक्षपाहिमृत्युंजयाच्युत॥मांपाहिपंचवक्त्रायशशां
कधारिणेनमः॥६१॥शंभोशशांककृतशेखरचिन्मसूर्त्तेगौरीशगोपतिदिनेश
हुताशनेत्र॥गंगाधरत्रिपुरदारणपुण्यकीर्त्तेभूतेशभूधरनिवाससदानमस् १८२
ते॥६२॥ ॥सूतउवाच॥ ॥एवंस्तुतःसभगवान्राज्ञीवेदोमहेश्वरः॥प्रसन्नःस
हपार्वत्याप्रत्युवाचदयानिधिः॥६३॥ ॥श्रीसदाशिवोवाच॥ ॥राजस्तेपरितुष्टो
स्मिभक्त्यापुण्यस्तवेनच॥अनन्यचेतास्त्वंनित्यंसदामांपर्यपूजय॥६४॥तव

भावपरिक्षार्थंद्विजोभूत्वेहमागतः॥व्याघ्रेणयपरियास्तासाक्षाद्देवीगिरींद्रजा॥क्ष
व्याघ्रोमायामयोयस्तेशरैरक्षतविग्रहः॥धीरतांद्रष्टुकामस्तेपत्नींयाचितवानहं
॥६६॥अस्याश्चकीर्त्तिमालिन्यातवभक्त्याचमानद॥तुष्टोहंसंप्रयच्छामिवरंवरय
दुर्ल्लभं॥६७॥ ॥राजोवाच॥ ॥एषएववरोदेयोयद्भवान्परमेश्वरः॥भवतापपरी
तस्यममप्रत्यक्षतांगतः॥६८॥वैरूपःपद्मकरोनामतत्पुत्रस्तुनयाधिपः॥सर्वा
नेतान्महादेवसदात्वत्पार्श्वगाकुरु॥६९॥ ॥सूतउवाच॥ ॥अथराज्ञीमहाभागप्र
णताकीर्त्तिमालिनीभक्त्याप्रसाद्यगिरिशंययाचेवरमुत्तमं॥७०॥ ॥राज्ञ्युवाच॥ ॥
चंडांगदोममपितामातासीमंतिनीचमे॥तयोयाचेमहादेवत्वत्पार्श्वेसन्निधिंकुरु॥
॥७१॥एवमस्त्वितिगौरीशोप्रसन्नोभक्तवत्सलः॥तयोःकामवरंदत्वाक्षणादंतर्हि

तोभवत्॥७२॥सोपिराजानरैःप्रार्थ्यपदंप्राप्यचशूलिनः॥सहितःकीर्तिमालिन्या
बुभुजेविषयान्नरः॥७३॥कृत्वावर्षायुतंराज्यमव्याहतबलोन्नतिः॥राज्यंपुत्रेषुस
विन्यस्यभजेच्छंभोःपरंपदं॥७४॥चंद्रांगदोपिराजेंद्रोराज्ञीसीमंतिनीचसा॥भक्त्या
संपूज्यगिरिशंजग्मतुःशांभवंपदं॥७५॥एतत्पवित्रमघनाशकरंविचित्रंशंभो
र्गुणानुकथनंपरमंरहस्यं॥यःश्रावयेद्बुधजनान्प्रयतःपठेद्वासंप्राप्यभोगविभ
वंशिवमेतिसोंते॥७६॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवमहात्म्यकथ
नंनामषड्विंशोऽध्यायः॥२६॥ ॥सूतउवाच॥ ॥ऋषभस्यानुभावोयंवर्णितःशिव
योगिनः॥अथान्यस्यापिवक्ष्यामिप्रभावंशिवयोगिनः॥१॥भस्मनश्चमहात्म्यंच
वर्णयामिसमासतः॥कृतकृत्याभविष्यंतियत्श्रुत्वापापिनोपिहि॥२॥अस्त्येकोवा

मदेवाख्यःशिवयोगीमहामतिः॥निर्द्वंद्वोनिर्ममःशांतोनिःसंगःसमदर्शनः॥३॥आ
त्मारामोजितक्रोधोगृहदारविवर्जितः॥अतर्कितगतिर्मौनीसंतुष्टोयेनकेनचि
त्॥४॥भस्मोद्धूलितसर्वांगोजटामंडलमंडितः॥वल्कलाजिनसंवीतोभिक्षाक
पात्रपरिग्रहः॥५॥सएकदाचरन्लोकेसर्वानुग्रहतत्परः॥क्रौंचारण्यंमहा
घोरंप्रविवेशयदृच्छया॥६॥तस्मिन्निर्मनुजेरण्येतिष्टत्येकोतिभीषणः॥क्षुत्तृषा
कुलितोरण्येयःकश्चिद्ब्रह्मराक्षसः॥७॥अभिदुद्राववेगेनजग्धुंतत्परिपीडितः॥
व्यात्ताननंमहाकायंघोरदंष्ट्रंभयानकं॥८॥तमायांतमभिप्रेक्ष्ययोगीशोनच
चालहा॥अहत्याभिद्रुत्यतरसासद्योरोधनगोचरः॥९॥दोर्भ्यांनिःपीड्यजग्राहनि
ःशंकंशिवयोगिनं॥तदंगस्पर्शनादेवसद्योनिर्धूतकल्मषः॥१०॥सब्रह्मराक्षसोर

घोरोविषदांस्मृतिमायया ॥ यथाचिंतामणींप्राप्यलोहंभवतिकांचनं ॥११॥ यथाजं
बूनदींप्राप्यमृत्तिकास्वर्णतांव्रजेत् ॥ यथामानसमाश्रित्यवायसोयातिहंसतां
॥१२॥ यथामृतस्यपानेननरोदेवत्वमाप्नुयात् ॥ तथैवचमहात्मानोदर्शनास्पर्शना
दिभिः ॥१३॥ सद्यःपुनंत्यघोपेतान्सत्संगोदुर्लभोह्यतः ॥ सपूर्वंक्षुत्पिपासार्तोघोरा
त्माविपिनेचरन् ॥१४॥ ससद्यस्तृप्तिमायातःपूर्णानंदोबभूवह ॥१५॥ तदात्रतस्यग्रमिद
भस्मकणानुविद्धःसद्योविधूतघनपापतमस्वभावः ॥ संप्राप्तपूर्वभवसंस्मृतिरुक्त
कार्यस्तत्पादपद्मयुगलेपतितोबभाषे ॥१६॥ प्रसीदमेमहायोगीन्प्रसीदकरुणा
निधे ॥ प्रसीदभगवन्ज्ञानामानंदामृतसागर ॥१७॥ क्वाहंपापमतिर्घोरःसर्वलोके
भयंकरः ॥ क्वत्वंमहानुभावस्यदर्शनंकरुणात्मनः ॥१८॥ उद्धरोद्धरमांघोरेपतितंभ

वसागरे ॥ ततःसन्निधिमात्रेणपापौघश्चनिवर्त्तते ॥१९॥ ॥ वामदेवउवाच ॥ ॥ कस्त्वं
वनचरोघोरोराक्षसोवाकिमास्थितः ॥ कथमेतांमहाघोरांकष्टांगतिमवाप्तवान्
॥२०॥ ॥ ब्रह्मराक्षसउवाच ॥ ॥ पार्थिवोहमितःपूर्वंपंचविंशतिमेभवे ॥ गोप्तायव
नराष्ट्रस्यदुर्जयोनामवीर्यवान् ॥२१॥ सोहंजहात्मापापीयान्स्वैरचारीमदोत्कट
॥ दंडकारीदुराचारीप्रजाघ्नोनिर्घृणःसदा ॥२२॥ युवाबहुकलत्रोपिकामासक्तो
जितेंद्रियः ॥ इमांपापीयसींचेष्टांपुनरेवगतोस्म्यहं ॥२३॥ प्रत्यहंनूतनामन्यांना
रींलोक्यमनःसदा ॥ आहृताःसर्वदेशेभ्योनार्योभृत्यैर्मदाज्ञया ॥२४॥ भुक्त्वाभुक्त्वा
पुनश्चान्यामेकामेकांदिनेदिने ॥ अंतर्गृहेषुसंस्थाप्यपुनरन्याःस्त्रियोहृताः ॥२५॥
एवंस्वराष्ट्रात्परराष्ट्रनृपस्यदेशात्करग्रामपुरव्रजेषु ॥ आहृत्यनार्योरमितास्त्वभु

ब्रखं.
१८५

क्रादं तस्मात्तैरैरसमर्दनैश्च ॥२६॥ तथान्यैश्च न भुंज्येत मया भुक्ताश्च याः स्त्रियः
॥अंतर्गृहेषु निहिताः शोचंते च दिवानिशं ॥२७॥ ब्रह्मविट्क्षत्रशूद्राणां यदा नार्यो
मयाहृताः ॥ ममराज्यस्थिता विप्राः सदारास्ते प्रदुद्रुवुः ॥२८॥ सभर्तृकाश्च कन्या
श्च विधवाश्च रजस्वलाः ॥ आहृत्याहृत्य रमिता मया कामहतात्मना ॥२९॥ त्रिशतं
द्विजनारीणां क्षत्रस्त्रीणां चतुःशतं ॥ षट्शतं वैश्यनारीणां शूद्रीणां तु सहस्रकं
॥३०॥ शतं चाभीरनारीणां पुलिंदीनां शतत्रयं ॥ शैलूषाणां पंचशतं रजकानां चतुः
शतं ॥३१॥ असंख्यां वारमुख्यानां मया भुक्तं दुरात्मना ॥ शतं नार्यो मदीयाश्च ताश्च सु १८५
क्ता मया निशं ॥३२॥ दिने दश तथा रात्रौ संध्याकाले द्वयं द्वयं ॥ तथापि मयि कामस्य
न तृप्तिर्ज्ञायते तदा ॥३३॥ एवं दुर्विषयासक्तं मत्तं पानरतं सदा ॥ यौवनेपि महारो

गाविविशुर्मां क्षयादयः ॥३४॥ रोगार्दितो नपत्यश्च शत्रुभिः परिपीडितः ॥ त्यक्तो मा
त्यैश्च भृत्यैश्च मृतोहं स्वेन कर्मणा ॥३५॥ आयुर्विनश्यत्ययशो विवर्द्धते भाग्यक्षयं
यात्यपि याति दुर्गतिः ॥ स्वर्गाच्च्यवंते पितरः पुरातना धर्मव्यये तस्य नरस्य निश्चितं
॥३६॥ अथाहं पुरुषैर्याम्यैर्नीतो वैवस्वतं पुरं ॥ क्रुद्धेन तेन नरके रेतःकुंडे निपाति
तः ॥३७॥ तत्राहं नरके घोरे वर्षाणामयुतत्रयं ॥ रेतःकुंडे पीड्यमानोन्ववसन्यर
मकिंकरैः ॥३८॥ ततः पापावशेषेण पिशाचो निर्जने वने ॥ सहस्राब्दकः संजातो
नित्यं क्षुत्तृट्श्रमातुरः ॥३९॥ पैशाचीं गतिमाश्रित्य नीत्वा दिव्यं शरच्छतं ॥ द्वितीयेहं
भवे जातो व्याघ्रः प्राणिभयंकरः ॥४०॥ तृतीये जगरो घोरश्चतुर्थेहं भवे बकः ॥ पंच
मे विट्वराहश्च षष्ठेहं कृकलासकः ॥४१॥ सप्तमे सारमेयश्च शृगालश्चाष्टमे भवे ॥

ब्र॰सो॰ ॥ नवमेगवयोऽभीमोदशमेहंमृगोऽभवं ॥ ४२ ॥ एकादशेमर्कटश्चगृध्रोद्वादशकेऽभ
१८६ वं ॥ त्रयोदशेहंनकुलोवायसश्चचतुर्दशे ॥ ४३ ॥ ऋक्षभल्लःपंचदशेषोडशेवनकु
क्कुटः ॥ गर्दभोहंसप्तदशेमार्जारोष्टादशेऽभवे ॥ ४४ ॥ एकोनविंशेमंडूकःकूर्मोविं
शतिमेऽभवं ॥ एकविंशेऽभवन्मत्स्योद्वाविंशेमूषकोऽभवं ॥ ४५ ॥ उलूकोहंत्रयोविंशे
चतुर्विंशेवनद्विपः ॥ पंचविंशेऽभवेचास्मिञ्जातोहंब्रह्मराक्षसः ॥ ४६ ॥ क्षुत्परीतो
निराम्यत्रमहावने ॥ इदानीमागतंदृष्ट्वाभवंतंजग्धुमागतः ॥ ४७ ॥ त्वदंगस्पर्श
मात्रेणप्राप्तःपूर्वभवस्मृतिः ॥ गतजन्मसहस्राणिस्मेराम्यद्यत्वदंतिके ॥ ४८ ॥ १८६
निर्वेदश्चपरंजातःप्रसन्नंहृदयंचमे ॥ ईदृशोयंप्रभावस्तेकथंलब्धोमहामते
॥ ४९ ॥ तपसातितीव्रेणकिंसुतीर्थनिषेवणात् ॥ योगेनमंत्रशास्त्राद्वामंत्रै-

र्वानंतशक्तिभिः ॥ ५० ॥ ततोमेब्रूहिभगवन्त्वामहंशरणंगतः ॥ ॥ वामदेवउवा
च ॥ ॥ एषमज्ञात्वलग्नस्यप्रभावोभस्मनोमहान् ॥ ५१ ॥ यत्संपर्कात्तमोवृत्तेस्त-
वेयंमतिरुत्तमा ॥ कोवेदभस्ममाहात्म्यंमहादेवादतेपरः ॥ ५२ ॥ दुर्विभाव्यंयथा
शंभोर्माहात्म्यंभस्मनस्तथा ॥ पुराभवादृशःकश्चिद्ब्राह्मणोवेदवर्जितः ॥ ५३ ॥
द्रविडेषुस्थितोमूढःकर्मणाशूद्रतांगतः ॥ चौर्यवृत्तिर्नैवकृतिकोवृषलीपतिर
लसः ॥ ५४ ॥ कदाचिज्जारतांप्राप्यशूद्रेणनिहतोनिशि ॥ तच्छूद्रस्यबहिर्ग्रामात्क्षि-
प्तस्यापेतकर्मणः ॥ ५५ ॥ चचारसारमेयोगेभस्ममाप्तोयदृच्छया ॥ अथतंनरके-
घोरेपतितंशिवकिंकराः ॥ ५६ ॥ निन्युर्विमानमारुह्यप्रसह्ययमकिंकरान् ॥ शिव
दूतान्समाचैयेत्ययमोथपरिपृष्टवान् ॥ ५७ ॥ महापातककर्तारंकथमेनंजिही

ब्र॰प्रे॰
१८

र्षय॥ अथोचुः शिवदूतास्ते पश्यास्य शवविग्रहे॥५८॥ वक्षोललाटदोर्मूलान्यंकि
तानि सुभस्मना॥ एत एव समानेतुमागताः शिवशासनात्॥ नास्मान्निरोद्धुं श
क्तोसि मास्त्वत्र तव संशयः॥ इत्याभाष्य यमं शंभोर्दूतास्ते ब्राह्मणं ततः॥६०॥ प
श्यतां सर्वलोकानां निन्युर्लोकमनामयं॥ वामदेव उवाच॥ तस्मादशेषपा
पानां सद्यः संशोधनं परं॥६१॥ शंभोर्विभूषणं भस्म सततं ध्रियते मया॥ इत्थं नि
शम्य माहात्म्यं भस्मनो ब्रह्मराक्षसः॥६२॥ विस्तरेण पुनः श्रोतुमौत्सुक्यात्प्रत्यभाष
त॥ साधु साधु महायोगिन्धन्योस्मि तव दर्शनात्॥६३॥ मां विमोचय पुण्यात्म १८
न्घोरादस्मात्कुजन्मनः॥ किंचिदस्तीति योगींद्र मम पुण्यं पुरातनं॥६४॥ अतोहं
त्वत्प्रसादेन मोक्ष्येस्माद्भवबंधनात्॥ एकस्मै द्विजमुख्याय तस्मिन्पार्थिवजन्मनि

॥६५॥ भूमिर्वृत्तिकरी दत्ता यस्यारामवती मया॥ यमेनापि तदैवोक्तं पंचविंशति
मे भवे॥६६॥ कल्पविद्योगिनः संगान्मोक्ष्यसे संसृतेरिति॥ तदेतत्फलितं पुण्यं य
त्किंचित्प्राग्भवार्जितं॥६७॥ गतो निर्मनुजेरण्ये संप्राप्तस्तव संगमः॥ अतो मां
घोरपापरतं संसरंतं कुजन्मनः॥६८॥ समुद्धर कृपासिंधो दत्वा भस्म समंत्रकं॥
कथं धार्यमिदं भस्म को मंत्रः को विधिः स्मृतः॥६९॥ कः कालः कोथवा देशः सर्वं क
थय मे गुरो॥ भवादृशा महात्मानः सदा लोकहिते रताः॥७०॥ सर्वेषां हितमिच्छं
ति कल्पवृक्षसधर्मिणः॥ इत्युक्तस्तेन योगींद्रो घोरेण वनचारिणा॥७१॥ दयावान्
वामदेवोसौ सर्वपापविनाशनं॥ भूयोपि भस्ममाहात्म्यं वर्णयामास तत्वतः॥७२॥
इदमाख्यानमतुलं यः शृणोति निरंतरं॥ पापं तस्य भवेन्नष्टं भस्ममाहात्म्यशृण्व

ब्रसो. तः॥७३॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभस्मनिरूपणंनामसप्तविंशोऽध्या
१८० यः॥२७॥ ॥वामदेवउवाच॥ ॥पुरामंदरशैलेंद्रेनानाधातुविचित्रिते॥नानासिंहसमाकी
र्णेनानावृक्षसमन्विते॥१॥कालाग्निरुद्रोभगवान्कदाचिद्विश्ववंदितः॥तमाससा
द्विश्वेशःस्वेछयापरमेश्वरः॥२॥समंतात्समुपातिष्टन्रुद्राणांशतकोटयः॥तेषां
मध्येसमासीनोदेवदेवस्त्रिलोचनः॥३॥तत्रागछन्सुरश्रेष्टोदेवैःसहपुरंदरः॥
तत्राग्निर्वरुणोवायुस्तथावैश्रवणस्तथा॥४॥गंधर्वाश्चित्रसेनाद्याःकिंनराश्च
महोरगाः॥विद्याधराःकिंपुरुषाःसिद्धाःसाध्याःप्रजेश्वराः॥५॥उर्वश्याद्याश्चाप्स १८०
रसःश्चंडिकाद्याश्चमातरः॥आदित्यावसवोष्टौचविश्वेदेवामहौजसः॥६॥तथान्ये
लोकपतयोलोकरक्षण क्षमाः॥महाकालश्चनंदीचतथाशंकरपार्श्वगौ॥७॥

वीरभद्रोमहातेजाःशंभुकर्णोमहाबलः॥घंटाकरणभद्रेशोमणिभद्रोवृको
दरः॥९॥कुंडोदरश्चविकटोतथाकुंभोदरोबली॥महोदरःकर्णधारःकेतुर्भृंगि
रिटिस्तथा॥१०॥भूतनाथस्तथान्येचमहाकायामहौजसः॥कृष्णवर्णाःकेचित्तु
श्वेताःकेचिन्मंडूकसन्निभाः॥११॥हरिताधूसराधूम्राःकर्बुराःपीतलोहिताः॥वि
चित्रवर्णाश्चित्रांगाश्चित्रवह्नीनीलांबरोत्कटा॥१२॥नानायुधोद्यतकरानानावाह
नभूषणा॥केचिद्व्याघ्रमुखाःकेचित्शूकरास्यामृगाननाः॥१३॥केचिच्चनक्र
वदनाःसारमेयमुखाःपरे॥शृगालवदनाश्चान्येउष्ट्राश्ववदनास्तथा॥१४॥के
चिच्छरभभेरुंडसिंहगृध्राश्वकाननाः॥एकहस्ताद्विहस्ताश्चचतुर्हस्ताःस्त्वहस्त
काः॥१५॥एकवक्त्राश्चतुर्वक्त्राश्चषण्मुखाः॥अपदाबहुपादाश्चबहुकर्णा

अलो॰ १८९ ककर्णिकाः॥१६॥एकनेत्राश्चतुर्नेत्रादीर्घाःकेचनवामनाः॥समंतात्परिवार्येशं
भूतनाथमुपासते॥१७॥आपृच्छतंन्महातेजामुनिनांप्रवरःसुधीः॥सनत्कुमा
रोधर्मात्मादृष्ट्वातंजगदीश्वरं॥१८॥सदेवदेवविश्वेशंसूर्यकोटिसमप्रभं॥महा
प्रलयसंक्षुब्धसप्तार्णवनिभस्वनं॥१९॥संवर्त्ताग्निसमारोपजटामंडलशोभितं॥
अक्षीणभालनमालाम्लाननिजात्विषं॥२०॥प्रदिप्तचूडामणिनाशशिखंडेनमंडि
तं॥तक्षकंवामकर्णेनदक्षिणेनचवासुकी॥२१॥बिभ्राणंकुंडलयुगंरत्ननीलम
हाहनु॥नीलग्रीवंमहाबाहुंनागहारंविराजितं॥२२॥फणिराजपरिभ्राजत्कंकणं १८९
गदमुद्रिकां॥अनंतफणसाहस्रमणिरंजितमेखलं॥२३॥व्याघ्रचर्मपरीधानंघं
टाभूषणभूषितं॥कर्कोटकमहापद्मधृतराष्ट्रधनंजयं॥२४॥कुजन्नूपुरसंपुष्प

रपद्मविराजितं॥प्रासतोमरखट्वांगखड्गपाशधनुर्धरं॥२५॥अप्रधृष्यमनिर्दे
श्यमानंदाकारमीश्वरं॥रत्नसिंहासनारूढंप्रणामाममहामुनिः॥२६॥तंभक्ति
भावोच्चलितांतरात्मासंस्तूयगीर्भिःश्रुतिसंगताभिः॥कृतांजलिःप्रश्रयनम्रकं
धरःपप्रच्छधर्मानिखिलान्शुभप्रदान्॥२७॥यान्यान्प्रपृच्छतमुनिस्तान्धर्मा
नशेषतः॥प्रोवाचभगवान्रुद्रोभूयोमुनिरपृच्छत॥२८॥॥सनत्कुमारउवाच॥
श्रुतास्तेभगवान्धर्मास्त्वन्मुखान्मुक्तिहेतवः॥येर्मुक्तपापामनुजास्तरिष्यंति
भवार्णवं॥२९॥अथापरंमहाधर्ममल्पायासान्महाफलं॥ब्रूहिकारणतोमहांस
द्योमुक्तिप्रदंनृणां॥३०॥आयासबहुलाधर्माःशास्त्रदृष्टाःसहस्रशः॥सम्यकसंसे
विताःकालेसिद्धिंगच्छंतिवानवा॥३१॥अतोलोकहितंगुह्यंभुक्तेर्मुक्तेश्चसाधनं॥

ब्र.सो. धर्मंविज्ञातुमिच्छामित्वत्तोहंपरमेश्वर॥३२॥स्कंदउवाच॥सर्वेषामपिधर्माणामु
१९० त्तमंश्रुतिनोदितं॥रहस्यंसर्वजंतूनांयत्त्रिपुंड्रस्यधारणं॥३३॥सनत्कुमारउवाच॥
त्रिपुंड्रस्यविधिंब्रूहिभगवन्जगतांपते॥तत्वतोज्ञातुमिच्छामित्वत्प्रसादान्महे
श्वर॥३४॥कतिस्थानानिकिंद्रव्यंकाशक्तिःकाचदेवता॥किंप्रमाणंचकःकर्त्ताके
मंत्राःस्तस्यकिंफलं॥३५॥एतत्सर्वमशेषेणत्रिपुंड्रस्यचलक्षणं॥ब्रूहिमेजगतां
नाथलोकानांहितकाम्यया॥३६॥शिवउवाच॥अग्नेयमुच्यतेभस्मदग्धगो १९०
मयसंभवं॥तदेवद्रव्यमित्युक्तंत्रिपुंड्रंचमहामते॥३७॥सद्योजातादिभिराद्यै
महामंत्रैश्चपंचभिः॥परिगृह्याग्निरित्याद्यैर्मंत्रैर्भस्माभिमंत्रणं॥३८॥मानस्तो
केतिसंक्षोभ्यशिरोलिंपेच्चत्र्यंबकात्॥त्र्यायुषादित्रिभिर्मंत्रैर्ललाटोरुभु

जद्वये॥३९॥स्कंधेचलेपयेद्भस्मसजलंमंत्रपावितं॥तिस्रोरेखाभवंत्येषुस्था
नेषुमुनिपुंगव॥४०॥भ्रुवोर्मध्यंसमारभ्ययावदंतोभवेद्भ्रुवोः॥मध्यमानामि
कांगुल्योर्मध्येतुप्रतिलोमतः॥४१॥अंगुष्ठेनकृतारेखात्रिपुंड्राख्याहियामता
॥तिसृणामपिरेखाणांप्रत्येकंनवदेवता॥४२॥अकारोगार्हपत्याग्निर्भूश्चात्मा
चरजोगुणः॥ऋग्वेदश्चक्रियाशक्तिःप्रातःसवनमुच्यते॥४३॥महादेवस्तु
रेखायाःप्रथमायाश्चदेवता॥उकारोदक्षिणाग्निश्चभुवःसत्वगुणस्तथा॥४४॥
माध्यंदिनंचसवनमिच्छाशक्त्यंतरात्मकौ॥महेश्वरश्चरेखायाद्वितीयायाश्चदे
वता॥४५॥मकाराहवनीयौचपरमात्मातमोदिवौ॥ज्ञानशक्तिःसामवेदस्तृती
यंसवनंस्मृतं॥४६॥शिवश्चेतितृतीयायारेखायाश्चैवदेवता॥एतानित्यंनमस्कृ

त्यत्रिपुंड्रंधारयेच्छुचिं॥४७॥माहेश्वरंव्रतमिदंसर्वलोकेषुकीर्तितं॥मुक्तिकामै
र्नरैःसेव्यंपुनःस्तेषांनसंभवः॥४८॥त्रिपुंड्रंकुरुतेयस्तुभस्मनाविधिपूर्वकं॥
ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथवायतिः॥४९॥महापातकसंघातैर्मुच्यते॥
चोपपातकैः॥तथान्येक्षत्रविट्शूद्रास्त्रीगोहत्यादिपातकैः॥५०॥वीरहत्यादिसंघा
तैर्मुच्यतेनात्रसंशयः॥अमंत्रेणापियःकुर्याद्ज्ञात्वामहिमोन्नति॥५१॥त्रिपुंड्रंभाल
केधृत्वामुच्यतेसर्वपातकैः॥परद्रव्यापहरणंपरदाराभिमर्षणं॥५२॥परदारपर
क्षेत्रहरणंपरपीडनं॥सस्यारामादिहरणंगृहदारादिकर्मच॥५३॥असत्यवादंपै
शून्यपारुष्यंवेदविक्रयः॥कूटसाक्ष्यव्रतत्यागःकैतवस्यनिशेवनं॥५४॥गोभू
हिरण्यमहिषीतिलकंबलवाससां॥आमधान्यजलादीनांनीचेभ्यश्चप्रतिग्रहं॥

॥५५॥दासिवेश्याभुजिष्यासुवृषलीषुनटीषुच॥रजस्वलासुकन्यासुविधवासुच
मैथुनं॥५६॥मांसचर्मरसादीनांलवणस्यचविक्रयः॥एवमादीन्यसंख्यानिपाप
निविविधानिच॥५७॥सद्यएवविनिश्यंतित्रिपुंड्रस्यैवधारणात्॥शिवद्रव्यापहर
णंशिवनिंदाचकुत्रचित्॥५८॥निंदाचशिवभक्तानांप्रायश्चित्तैर्नशुध्यति॥रुद्राक्ष
यस्यगात्रेषुललाटेचत्रिपुंड्रकं॥५९॥सचांडालोपिसंपूज्यःसर्ववर्णोत्तमोत्तमः॥या
नितीर्थानिलोकेस्मिन्गंगाद्याःसरितस्तथा॥६०॥स्नातोभवतिसर्वत्रललाटेयस्त्रिपुं
ड्रधृक्॥सप्तकोटिमहामंत्रापंचाक्षरदुरोपमाः॥६१॥तथान्येकोटिशोमंत्राःशैवाकै
वल्यहेतवः॥तेसर्वेतेनजप्तास्तुयोबिभर्तित्रिपुंड्रकं॥६२॥सहस्रपूर्वजातानांसह
स्रजनयिष्यतां॥स्ववंशजानांज्ञातीनामुद्धरेद्यस्त्रिपुंड्रधृक्॥६३॥इहाभुक्त्वाखिला

न्भोयान्दीर्घायुर्व्याधिवर्जितः॥जीवितांतेचमरणंसुखेनैवप्रपद्यते॥६४॥अष्टैश्व
र्यगुणोपेतंप्राप्यदिव्यवपुःस्वसं॥दिव्यंविमानमारुह्यदिवित्रिदशसेवितं॥६५॥वि
द्याधराणांसिद्धानांगंधर्वाणांमहौजसां॥इंद्रादीलोकपालानांलोकेषुचयथाक्रमं
॥६६॥भुक्त्वाभोगान्सुविपुलान्प्रजेशानांपदेषुच॥ब्रह्मणःपदमास्थायतत्रक
ल्पशतंवसेत्॥६७॥विष्णोर्लोकेचवसतेयावद्ब्रह्मशतात्ययः॥शिवलोकंततःप्र
प्यरमतेकालमक्षयं॥६८॥शिवसायुज्यमाप्नोतिनसभूयोभिजायते॥सर्वोपनिष
दांसारंसमालोक्यमुहुर्मुहुः॥६९॥इदमेवहिनिर्णीतंपरंश्रेयस्त्रिपुंड्रकं॥अतस्त्रि
पुंड्रकं॥अतस्त्रिपुंड्रमाहात्म्यंसमासात्कथितंमया॥७०॥रहस्यंसर्वभूतानांगोपनी
यमिदंत्वया॥इत्युक्त्वाभगवान्रुद्रस्तत्रैवांतरधीयत॥७१॥सनत्कुमारोपिमुनिर्ब्र

ह्मलोकपितामहः॥ ॥वामदेवउवाच॥ ॥तथापिभस्मसंपर्कात्संजाताविमला
मतिः॥७२॥त्वमपिश्रद्धयापुण्यंधारयस्वत्रिपुंड्रकं॥ ॥सूतउवाच॥ ॥ब्रह्मराक्ष
सतांसद्योजहौतस्यानुभावतः॥७३॥सबभौसूर्यसंकाशंतेजोमंडलभास्व
रः॥दिव्यावयवरूपश्रीर्दिव्यमालांबरोज्वलः॥७४॥भक्त्याप्रदक्षिणीकृत्यतंगु
रुंशिवयोगिनं॥दिव्यंविमानमारुह्यपुण्यान्लोकान्जगामसः॥७५॥त्रिद
शैःपूज्यमानस्तुदिव्यरूपधरःशुचिः॥वामदेवोमहायोगीदृष्ट्वातस्यपरांग
तिं॥७६॥चचारलोकेगूढात्मासाक्षादिवशिवःस्वयं॥एतद्भस्मस्यमाहात्म्यंत्रिपुं
ड्रंशृणुयान्नरः॥७७॥श्रावयेद्वापठेद्वापिपाठयेद्वापियोनरः॥सोपिपापैःप्रमु
च्येतप्रयातिपरमंपदं॥७८॥यदिभावोभवेन्नृणांशुद्धःशिवविभूतिषु॥त

ब्रह्मो० १९३ दाकरगतामुक्तिर्भवत्येवनसंशयः ॥७९॥ अग्निहोत्रभवंभस्मदेवीहोमभवं
तथा ॥ महारुद्रादिहोमत्थंपावनंशीघ्रपुण्यदं ॥८०॥ कथयतिशिवकीर्तिंसं
स्तेमुक्तिहेतुंप्रणमतिशिवरूपंध्याननगम्यंनरोयः ॥ रचयतिसितभस्मो
द्धासिभाजंत्रिपुंड्रंनपुनरिहजनन्यागर्भवासंभजेत्सः ॥८१॥ ॥इतिश्रीस्कं
दपुराणेवृहत्ब्रह्मोत्तरखंडेभस्ममाहात्म्यनिरूपणंनामाष्टाविंशतितमोऽ
ध्यायः ॥२८॥ ॥ऋषयऊचुः ॥ ॥वेदवेदांगतत्त्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः ॥ नृ
णांकृतोपदेशानांसद्यःसिद्धिर्हिजायते ॥१॥ अथात्रजनसामान्यैर्गुरुभिर्नीति १९३
कोविदैः ॥ नृणांकृतोपदेशानांसिद्धिर्भवतिकीदृशी ॥२॥ ॥सूतउवाच ॥ ॥श्रद्ध
याभजतांपुंसांशिलापिफलदायिनी ॥ मूर्खोपिपूजितोभक्त्यागुरुर्भवतिभा

वतः ॥३॥ श्रद्धयासेवितोमंत्रस्त्वबद्धोपिफलप्रदः ॥ श्रद्धयापूजितादेवानीचस्
यापिफलप्रदाः ॥४॥ अश्रद्धयाकृतापूजादानंयज्ञस्तपोव्रतं ॥ सर्वंनिष्फलतां
यातिपुष्पंवंध्यतरोरिव ॥५॥ सर्वत्राश्रद्धयायुक्तोदुराचारोथचंचलः ॥ परमार्था
त्परिभ्रष्टःसंसृतेनविमुच्यते ॥६॥ मंत्रेतीर्थेद्विजेदेवेदैवज्ञेभेषजेगुरौ ॥ यादृ
शीभावनायस्यसिद्धिर्भवतितादृशी ॥७॥ अतोभावमयंविश्वंपुण्यंपापंचभाव
तः ॥ तेउभेभावहीनस्यनभवेतांकदाचन ॥८॥ अत्रेदंपरमाश्चर्यमाख्यान
मुपवर्ण्यते ॥ अश्रद्धासर्वमर्त्यानांसर्वदादुःखदायिनी ॥९॥ श्रद्धयाधार्यतेधर्मः
श्रद्धयाधार्यतेव्रतं ॥ श्रद्धयाधार्यतेदानंतस्माच्छ्रद्धास्तिकारणं ॥१०॥ आसीत्पंचा
लराजस्यसिंहकेतुरितिश्रुतः ॥ पुत्रःसर्वगुणोपेतःशक्रस्येवधनंजयः ॥११॥ स

एकदाकतिपयैर्भटैर्युक्तोमहाबलः॥जगाममृगयाहेतौबहुसत्वान्वितंवनं॥१२॥
तद्भृत्यःशावरःकश्चिद्विचरन्मृगयांवने॥ददर्शजीर्णस्फुटितंपतितंदेवताल
यं॥१३॥तत्रपश्यन्महापीठंपतितंस्थंदिलोपरि॥शिवलिंगमनुसूक्ष्मंमूर्त्तंभा
ग्यमिवात्मनः॥१४॥सतदादायवेगेनपुण्यकर्मप्रणोदितः॥तस्मैसंदर्शया
मासराजराजायधीमते॥१५॥पश्येदंरुचिरंलिंगंमयादृष्टमिदंप्रभो॥तदेतत्पू
जयिष्यामियथाविभवमादरात्॥१६॥अस्यपूजाविधिंब्रूहियथादेवोमहेश्वरः॥अ
मंत्रकैःपराम्नैश्चप्रीतोभवतिपूजितः॥१७॥इतितेननिषादेनपृष्टःपार्थिवनंद
नः॥प्रत्युवाचप्रहस्यैनंपरिहासविशारदः॥१८॥संकल्पेनसदाकुर्यादभिषेकं
नवांभसा॥उपवेशासनेशुद्धेशुभैर्गंधाक्षतैर्नवैः॥१९॥वन्यैःपत्रैश्चकुसुमैर्धू

पैर्दीपैःप्रपूजयेत्॥चिताभस्मोपहारंतुप्रथमंपरिकल्पयेत्॥२०॥आत्मोप
योग्येनान्येनान्येननैवेद्यंपरिकल्पयेत्॥पुनश्चधूपदीपादीनुपचारान्प्रकल्प
येत्॥२१॥नृत्तवादित्रगीतादीन्विधायचयथाविधि॥नमस्कृत्यायविधिवत्प्र
सादंयाचयेत्ततः॥२२॥एषसाधारणःप्रोक्तःशिवपूजाविधिर्मया॥चिताभस्मोप
हारेणसद्यःसंतुष्यतिशंकरः॥२३॥सूतउवाच॥परिहासरसेनेत्यंभाषितंस्वा
मिनामुना॥सशंकराख्यःशाबरोमूर्ध्नाजग्राहतद्वचः॥२४॥ततःस्वभवनंप्राप्य
लिंगमूर्त्तिमहेश्वरं॥प्रत्यहंपूजयामाससचिताभस्मोपहारवत्॥२५॥यदात्मनःप्रि
यंवस्तुगंधपुष्पाक्षतादिकं॥नैवेद्यंशंभवेनित्यमुपायुंक्ततत:स्वयं॥२६॥एवंम
हेश्वरंभक्त्यासहपत्न्याभ्यपूजयत्॥एवंचसुखमासाद्यनिनायकतिचित्समाः॥२७॥

ब्रसो·
१९५

एकदाशिवपूजायैप्रवृत्तःशाबरोत्तमः॥नददर्शचिताभस्मकदाचित्पात्रमध्यगं॥
२८॥अथासौपरितोदूरंमन्वेष्टुंपरिबभ्रमन्॥नलब्धावांश्चिताभस्मश्रांतोगृह-
मगात्पुनः॥२९॥ततआहूयपत्नींस्वांशाबरोवाक्यमब्रवीत्॥नलब्धंमेचि-
ताभस्मकिंकरोमिवदप्रिये॥३०॥शिवपूजांतरायोमेजातोद्यममपापिनः॥पू-
जांविनाक्षणमपिनाहंजीवितुमुत्सहे॥३१॥उपायंनात्रपश्यामिपूजोपकर-
णेप्रिये॥नगुरोश्चविहन्येतशासनंसफलार्थदं॥३२॥इतिव्याकुलितंदृष्ट्वाभर्त्ता-
रंशाबरांगना॥प्रत्यभाषतमाभैस्त्वमुपायंप्रवदामिते॥३३॥इदमेवगृहंदग्ध्वा १९५
बहुकालोपबृंहितं॥अहंमग्निंप्रवेक्ष्यामिचिताभस्मभवेत्ततः॥३४॥शाबरउवा-
च॥धर्मार्थकाममोक्षाणांदेहःपरमसाधनं॥कथंत्यजसितंदेहंसुखार्थंनव-

यौवनं॥३५॥अधुनात्वमपत्याच्चत्वमुक्तविषयासती॥भोग्यभोग्यमिहेच्छसि॥३६॥
॥शाबर्युवाच॥एतावदेवसाफल्यंजीवितस्यचजन्मनः॥परार्थेयस्त्यजेत्प्राण-
न्शिवार्थंतन्महाफलं॥३७॥किंचतप्तंतपोघोरंकिंवादत्तंत्वयापुरा॥किंवार्चनंपुरा-
रांभोःकृतंजन्मशतांतरे॥३८॥किंवापुण्यंममपितुःकिंवामातुःकृतार्थता॥यच्छिवा-
र्थेसमिद्धेग्नौत्यजाम्यद्यकलेवरं॥३९॥इत्थंत्यंस्थिरामतिंकृत्वातस्याभक्तिंचशंकरे॥
तथेतिदृढसंकल्पःशाबरीप्रत्यपूजयत्॥४०॥साभर्त्तारमनुज्ञाप्यस्नात्वाशुचिरलं-
कृता॥गृहस्तद्दीप्तंवह्निंभक्त्याचक्रेप्रदक्षिणां॥४१॥नमस्कृत्वात्मगुरवेहृदिध्या-
त्वासदाशिवं॥अग्निप्रवेशाभिमुखीकृतांजलिरिदंजगौ॥४२॥शाबर्युवाच॥पुष्पा-
णिसंतुममदेवमदेंद्रियाणिधूपोगुरुर्वपुरिदंहृदयंप्रदीपः॥प्राणाहवींषिकरणा-

ब्रसो॰ नितवाक्षताश्चपूजाफलंत्वंब्रजतुसांप्रतमेवजीवः॥४३॥वांछामिनाहमपिसर्वसुर
१९६ साद्धिपत्यंनेच्छेपुरंदरपदंनपदंविधातुः॥भूयोभवामिपरिजन्मनिजन्मनिस्यांतत
त्वादपंकजजसन्मकरंदभृंगी॥४४॥जन्मानिसंतुममदेवशताधिकानीमास्या
न्माविशतुचित्तमबोधहेतुं॥किंचक्षणार्द्धमपितच्चरणारविंदध्यानेस्तुमेहृदयर
मीशनमोनमस्ते॥४५॥इतिप्रसाद्यदेवेशंशबरीकृतनिश्चया॥विवेशज्वलनंव
ह्निंभस्मसादभवत्क्षणात्॥४६॥शबरोपिचतद्भस्मयत्नेनपरिगृह्यच॥चक्रेद
ग्धगृहोपांतेशिवपूजांसमाहितः॥४७॥अथसस्मारपूजांतेप्रसादग्रहणोत्सुकं॥ १९६
दयितांगृहमायांतींप्रांजलिंविनयान्वितां॥४८॥स्मृतमात्रांतदागतांददृशेतःप्रियां॥
सर्वालंकारशोभाढ्यांभक्तिनम्रांशुचिस्मितां॥४९॥तांवीक्ष्यशबरःपत्नींप्रांजलिं

पूर्ववत्स्थितं॥भस्मावशेषंचगृहंयथापूर्वमुपस्थितं॥५०॥किमयंस्वप्नआहोस्वि
त्किंवामायात्ममात्मिका॥इतिविस्मयसंभ्रांतस्तांवधूंपर्यपृच्छत॥५१॥अयिप्रिये
कुतःप्राप्ताभस्मीभूतासिपावके॥दग्धंचभवनंभूयःकथंपूर्ववदास्थितं॥५२॥
शबर्युवाच॥॥यथागृहंसमुद्दीप्यप्रविष्टाहंहुताशने॥तदात्मानंनजानामिप
श्यामिनैवपावकं॥५३॥नतापस्तेजसोनासीन्मेप्रविष्टायाइवामृतं॥सुप्तेवत
त्क्षणार्द्धेविबुधामीक्षणार्द्धतः॥५४॥तावद्भुवनमद्राक्षमदग्धमिवसुस्थितं॥
अधुनादेवपूजांतेप्रसादंलब्धुमागता॥५५॥एवंपरस्परंप्रेम्णादंपत्योर्भाषमा
णयोः॥प्रादुरासतयोरग्रेविमानमन्वगात्शुभं॥५६॥तस्मिन्विमानेशतचंद्रभासु
रेचतारईशानुचराःपुरास्थिताः॥हस्तेगृहीत्वाथनिशाददंपतीआरोपयामासु

ब्र॰सो॰ १९७ रमुक्तविग्रहौ॥५७॥तयोर्निषाददंपत्योस्तत्क्षणादेवतद्वपुः॥शिवदूतकरस्प
र्शात्तत्सारूप्यमवाप्यह॥५८॥एवंतौशिवमाराध्यभक्त्याशबरदंपती॥शिवलो
कंसमासाद्यपरमानंदमापतुः॥५९॥तस्माच्छुद्धेषुचित्रेषुसर्वेषुपुण्यकर्मसु॥
नीचोपिशवःप्राप्तःश्रद्धयायोगिनांगतिं॥६०॥किंजन्मनासकलवर्णजनोत्त
मेनकिंविद्ययाश्रुतिपुराणविचारवत्या॥यस्यास्तिचेतसिसदापरमेशभ
क्तिःकोन्यस्ततोत्रिभुवनेपुरुषोस्तिधन्यः॥६१॥इतिश्रीस्कंदपुराणेवृहत्ब्र
ह्मोत्तरखंडेश्रद्धामहात्म्यंनामैकोनत्रिंशोऽध्यायः॥२९॥ ॥सूतउवाच॥अ १९७
थरुद्राक्षमाहात्म्यंवर्णयामिसमासतः॥सर्वपापक्षयकरंपवित्रंशृण्वताम
पि॥१॥अभक्तोवापिभक्तोवानीचोनीचतरोपिवा॥रुद्राक्षान्धारयेद्यस्तुमु

च्यतेसर्वपातकैः॥२॥रुद्राक्षधारणंपुण्यंकेनवासदृशंभवेत्॥महाव्रतमिदंप्रा
हुर्मुनयस्तत्वदर्शिनः॥३॥सहस्रंधारयेद्यस्तुरुद्राक्षाणांधृतव्रतः॥तंनमंतिसु
राःसर्वेयथारुद्रस्तथैवसः॥४॥अभावेतुसहस्रस्यबाह्वोःषोडशषोडश॥एकंशि
खायांकरयोर्द्वादशद्वादशैवहि॥५॥द्वात्रिंशत्कंठदेशेतुचत्वारिंशच्चमस्तके॥ए
कैककर्णयोःषट्षट्वक्षस्यष्टोत्तरं॥६॥योधारयतिरुद्राक्षान्रुद्रवत्सोपिपूज्य
ते॥मुक्ताप्रवालैःस्फटिकैरौप्यवैडूर्यकांचनैः॥७॥समेतान्धारयेद्यस्तुरुद्राक्षा
न्सशिवोभवेत्॥केवलानपिरुद्राक्षान्यद्यालस्याद्बिभर्त्तियः॥८॥तंनस्पृशंति
पापानितमांसीवविभावसुं॥रुद्राक्षमालयाजप्तोमंत्रोनंतफलप्रदः॥९॥रुद्रा ८
क्षंमस्तकेधृत्वाजपेद्यस्तुसमाहितः॥सिद्धिर्दशगुणातस्यनात्रकार्याविचारणा॥

त॥अरुद्राक्षोजपःपुंसांतावन्मंत्रफलप्रदः॥१०॥यस्यांगेनास्तिरुद्राक्षएकोपिसु-
चतुःपदः॥तस्यजन्मनिरर्थंस्यात्त्रिपुंड्ररहितोयदि॥११॥रुद्राक्षंमस्तकेकृत्वा-
नित्यंस्नानंकरोतियः॥गंगास्नानफलंतस्यजायतेनात्रसंशयः॥१२॥रुद्राक्षंपू-
जयेद्यस्तुविनातोयाभिषेचनं॥यत्फलंलिंगपूजायांतदेवाप्नोतिनिश्चितं॥१३॥
एकवक्त्राःपंचवक्त्राःएकादशमुखाःपरे॥चतुर्दशमुखाःकेचिद्रुद्राक्षालोकपू-
जिताः॥१४॥भक्त्यासुपूजितोयेनरुद्राक्षःशंकरात्मकः॥दरिद्रंचापिकुरुतेराज-
राजसमंश्रिया॥१५॥अत्रेदंपुण्यमाख्यानंवर्णयंतिमनीषिणः॥महापापक्ष-
यकरंश्रवणात्कीर्तनादपि॥१६॥राजाकाश्मीरदेशस्यभद्रसेनइतिस्मृतः॥तस्यपु-
त्रोभवद्धीमान्सीमंतोनामवीर्यवान्॥१७॥तस्यामात्यसुतःकश्चित्तारकोनामस-

द्गुणः॥बभूवराजपुत्रस्यसखापरमशोभनः॥१८॥तावुभौपरमस्निग्धौकुमारौ
रूपसुंदरौ॥विद्याभ्यासरतौबाल्येसहक्रीडांप्रचक्रतुः॥१९॥तौसदासर्वगात्रेषु-
रुद्राक्षकृतभूषणौ॥विचेरतुरलंप्रीत्यादिव्यालंकारधारिणौ॥२०॥हारकेयूर-
कटककुंडलादिविभूषणं॥हेमरत्नमयंत्यक्त्वारुद्राक्षान्दधतुस्तुतान्॥२१॥
रुद्राक्षमालिनौनित्यंरुद्राक्षकरकंकणौ॥रुद्राक्षकंठाभरणौकृतरुद्राक्षकंक-
णौ॥२२॥हेमरत्नाद्यलंकारेलोष्ठपाषाणदर्शिनौ॥बोध्यमानावपिसदारुद्राक्षांस्तु
नमुंचतः॥२३॥तस्यकाश्मीरराजस्यगृहंप्राप्तोयदृच्छया॥पराशरोमुनिवरःसाक्षा-
द्विपितामहः॥२४॥तमर्चयित्वाविधिवद्राजाधर्मभृतांवरः॥पप्रच्छसुखमासीनं-
त्रिलोकज्ञंमहामतिं॥२५॥राजोवाच॥भगवन्नेषपुत्रोमेसोपिमंत्रिसुतस्तुमे॥रु-

ब्र॰सो॰ १९९

रुद्राक्षधारिणौनित्यंरत्नाभरणनिस्पृहौ॥२६॥शास्यमानावपिजनैरत्नाकल्पपरिग्रहे॥
विलंघितास्मद्वचनौरुद्राक्षेष्वेवतत्परौ॥२७॥नोपदिष्टाविमौबालौकदाचिदपिके
नचित्॥एषास्वाभाविकीवृत्तिःकथमासीत्कुमारयोः॥२८॥पराशरउवाच॥शृणु
राजन्प्रवक्ष्यामितवपुत्रस्यधीमतः॥तयात्वन्मंत्रिपुत्रस्यप्रवृत्तिंविस्मयावहां॥
२९॥नंदीग्रामेपुराकाचित्महानंदेतिविश्रुता॥बभूववारवनिताशृंगारललि
ताकृतिः॥३०॥छत्रंपूर्णेंदुसंकाशंयानंस्वर्णविभूषणं॥चामराणिसदंडानिपादु १९९
केचहिरण्मये॥३१॥अंबराणिविचित्राणिमहार्हाणिद्युमंतिच॥चंद्ररश्मिनिभा
शय्यापर्यंकाश्चहिरण्मयाः॥३२॥गावोमहिष्यःशतशोदासाश्चबहुसस्यमन्व
ताः॥सर्वाभरणदीप्तांग्योदास्यश्चनवयौवनाः॥३३॥भूषणानिपराध्यानिनवर

त्नोज्ज्वलानिच॥गंधकुंकुमकस्तूरीकर्पूरागरुलेपनं॥३४॥चित्रमाल्यावतंसश्च
यथेष्टमृतभोजनं॥नानाचित्रवितानाढ्यंनानावापिमयंगृहं॥३५॥बहुरत्नसह
स्राढ्यंकोटिसंख्याधिकंधनं॥एवंविभवसंपन्नासावेश्यानाग्रमध्यगं॥३६॥रुद्रा
क्षैर्भूषयित्वैकंमर्कटंचैवकुक्कुटं॥करतालैश्चगीतैश्चसदानर्त्तयतीद्वयं॥३७॥
पुनश्चविहसत्युच्चैःसखीभिःपरिवारिता॥रुद्राक्षैःकृतकेयूरंकरणाभरणा
कुंडलं॥३८॥मर्कटंशिक्षयातस्याःपुरोनृत्यतिबालवत्॥शिखाग्रेबद्धरु
द्राक्षःकुक्कुटःकपिनासह॥३९॥चिरंनृत्यतिनृत्यतःपश्यन्तीचित्तमाहरन्
॥एकदाचगृहंतस्याःकश्चिद्वैश्यःशिवव्रती॥४०॥आजगामसरुद्राक्षस्त्रि
पुंड्रोजटिलाकृतिः॥सबिभ्रद्रत्नसम्यग्विशदंप्रकोष्ठेकरकंकणं॥४१॥सरत्नपरि

भ्रस्रो· २०० त:कीर्णज्वलंतंतरुणार्कवत्॥तमागतंसगणिकासंपूज्यपरयामुदा॥४२॥त
स्मकोष्टगतंवीक्ष्यकंकणंप्राहविस्मिता॥महारत्नमयंसोयंकंकणस्त्वत्करे
स्थितः॥४३॥मनोमेहरतिसाधोदिव्यस्त्रीभूषणोचितः॥इतितांनवरत्नाढ्यस्व
हाकंकणभूषणे॥४४॥वीक्ष्योदारमतिर्वैश्यःसस्मितंसमभाषत॥अस्मिन्र
त्नमयेदिव्येयदितेस्पृहतेमनः॥४५॥तमेवदत्वामुदितामौल्यमस्यददामि
कं॥॥वेश्योवाच॥॥वयंहिस्वैरचारिण्योवेश्यास्तुनपतिव्रता॥४६॥अस्मत्कुले
चितोधर्मोव्यभिचारोनसंशयः॥यद्येतद्रत्ननिचितंददासिकरभूषणं॥४७॥ २००
दिनत्रयमहोरात्रंतवपत्नीभवाम्यहं॥॥वैश्यउवाच॥॥तथास्तुयदितेसत्यं
वचनंवीरवल्लभो॥४८॥ददामिरत्नवलयंत्रिरात्रंभवमद्वधुः॥एतस्मिन्व्य

वहारेत्रप्रमाणंत्वग्निभास्करौ॥४९॥त्रिरात्रंसत्यमित्युक्ताहृदयंस्पृश्यातीप्रिये॥गृ
हाणकंकणंदिव्यंमयासार्द्धरमस्वहि॥५०॥॥वारांगनाउवाच॥॥दिनत्रयमहोरा
त्रंपत्नीभूत्वातवप्रभो॥सधर्मंचचरामीतिसातद्धृदयमस्पृशत्॥५१॥अथतर
स्यैसवैश्यास्तुप्रहृष्टोरत्नकंकणं॥लिंगरत्नमयंतस्याहस्तेदत्वेदमब्रवीत्॥५२॥
इदंरत्नमयंलिंगंशैवंमत्प्राणसन्निभं॥रक्षणीयंत्वयाकांतेतस्यहानौमतिर्म
म॥५३॥एवमस्त्वितिसाकांतालिंगमादायरत्नजं॥नाट्यमंडपिकामध्येनिधाय
प्राविशद्गृहं॥५४॥सातेनसंगतारात्रौवैश्येणविटधर्मिणा॥सुखंसुष्वापपर्यं
केमृदुतल्पोपशोभिते॥५५॥ततोनिशीथसमयेनाट्यमंडपिकांतरे॥अकस्मा
दुत्थितोवह्निस्तमेवसहसावृणोत्॥५६॥मंडपेदह्यमानेतुसहसोत्थायसाभ्र

ब्रत्नो. २०१ मात्॥ मर्कटं मुंचयामास सा वैश्या तत्र वैजवात्॥५७॥ स मर्कटो मुक्तबंधः कुर्कुटेन स
हामुना॥ भीतो सौ प्रदुद्राव विधूमाग्निकणान्बहून्॥ चिक्षेप भवने तस्याः स्तेन द
ग्धं च सर्वतः॥५८॥ स्तंभेन सह निर्दग्धं तल्लिंगं शाकलाकृतं॥ दृष्ट्वा वैश्य स्ववेश्या च
परमं दुःखमापतुः॥५९॥ दृष्ट्वा प्राणसमं लिंगं दग्धं वैश्यपतिस्तथा॥ अथ संप्राप्त
निर्वेदो मरणाय मतिं दधे॥६०॥ निर्विण्यो नितरां खेदात्वैश्यामाह सुदुःखितः॥ शि
वलिंगे तु निर्भिन्ने नाहं जीवितुमुत्सहे॥६१॥ चितां कारय मे भद्रे तव भृत्यैर्बलाधि २०१
कैः॥ शिवे मनसमावेश्य प्रवेक्ष्यामी हुताशनं॥६२॥ यदि ब्रह्मेंद्रविष्ण्वाद्या वारयेयुः
समेत्य तं॥ तथाप्यस्मिन्क्षणे प्राणान्प्रविष्याग्नित्यजाम्यहं॥६३॥ तमेव दृढनि
र्बंधं संविज्ञाय सुदुःखिता॥ स्वभृत्यैः कारयामास चितां स्वभवनाद्बहि॥६४॥ ततः

स वैश्यः शिवभक्तिपूतः प्रदक्षिणीकृत्य समिद्धमग्निं॥ विवेश पश्यत्सु जनेषु धीरः स
चानुतापाद्युगतिं प्रपेदे॥६५॥ अथ सा दुःखिता नारी स्मृत्वा धर्मं सुनिर्मलं॥ सर्वान्बं
धुजनान्वीक्ष्य बभाषे करुणं वचः॥६६॥ रत्नकंकणमादाय मया सत्यमुदाहृतं॥ दि
नत्रयमहं पत्नी वैश्यस्यामुष्य संमता॥६७॥ कर्मणा मत्कृते नायं मृतो वैश्यः शि
वव्रती॥ तस्मादहं प्रवक्ष्यामि सहानेन हुताशनं॥६८॥ स्वधर्मचारिणीत्युक्ता सत्या
सक्तमनाः सती॥ सत्येन त्रिदिमां यांति देवास्त्रिभुवनेश्वराः॥६९॥ सत्याश्रय परो धर्मो
सत्ये सर्वं प्रतिष्ठितं॥ सत्येन स्वर्गमोक्षौ च नासत्येन परा गतिः॥७०॥ तस्मात्सत्यं समा ३८
श्रित्य प्रवेक्ष्याम्यहुताशनं॥ इति सा दृढनिर्बंधा वार्यमाणापि बंधुभिः॥७१॥ सत्यलो
पभयान्नारी प्राणांत्यक्तुं मनो दधे॥ सर्वस्वं द्विजमुख्येभ्यो दत्वा ध्यात्वा सदाशिवं॥७२॥

ब्र॰सो॰ २०२

तमग्निंत्रिःपरिक्रम्यप्रवेशाभीमुखीस्थिता॥परिक्रम्यपतंतीतांस्वपदार्पितमान॰
सा॥७३॥वारयामासविश्वात्माप्रादुर्भूतःसदाशिवः॥व्याजहारतदावाणींमामे॰
तिकरुणानिधिः॥७४॥सातंविलोक्याखिलदेवदेवंत्रिलोचनंचंद्रकलावतंसं॥
शशांकसूर्यानलकोटिभासुरंस्तब्धैवभीतेवतथैवतस्थौ॥७५॥तांविह्वलां
भयात्त्रस्तांवेपमानांजडीकृतां॥समाश्वास्यगलद्वाष्पांकरेगृह्याब्रवीद्वचः॥७६॥
सत्यंधर्मंचधैर्यंचभक्तिंचमयिनिश्चलां॥परिप्रष्टुंस्वसकाशंवैवेश्याभूत्वाहमागत
ः॥७७॥माययाग्निंसमुत्पाद्यदग्धात्वन्नाट्यमंडपं॥दग्धंकृत्वारत्नलिंगंप्रविष्टोस्मि॰ २०२
हुताशने॥७८॥वेश्याकैतवचारिण्याःस्वैरिण्याधनसंचकाः॥सात्वंसत्यमनुस्मृ
त्यप्रविष्टाग्निंमयासह॥७९॥अतस्तेसंप्रदास्यामिभोगांस्त्रिदशदुर्लभान्॥आ

युष्यपरमंदीर्घंमहासौख्यंपरोन्नतिं॥८०॥यद्यदिच्छसिसुश्रोणितत्तद्देवददामिते॥
इतिब्रुवतिगौरीशेसवेश्याप्रत्यभाषत॥८१॥नमेवांछास्तिभोगेषुभूमौस्वर्गेरसात
ले॥तवपादांबुजस्पर्शादन्यत्किंचिन्नकामये॥८२॥एतेभृत्याश्चदासाश्चयेचान्ये
ममबांधवाः॥सर्वेत्वदर्चनपरास्त्वयिसन्यस्तवृत्तयः॥८३॥सर्वानेतान्मयासार्धं॰
नीत्वातवपरंपदं॥पुनर्जन्मभयंघोरंविमोचयनमोस्तुते॥८४॥तथेतितस्यवचनं
प्रतिनंद्यमहेश्वरः॥तान्सर्वांश्चयथाकालंनिनायस्वपरंपदं॥८५॥॥पराशरउवा
च॥॥नाट्यमंडपिकादाहेयौदूरंविगतौपुरा॥तत्रावशिष्टौतावेवकुक्कुटोमर्कटस्त
था॥८६॥कालेननिधनंप्राप्यसतस्यानाट्यमर्कटः॥असौतवकुमारोभूत्कुक्कुटोमं॰
त्रिणःसुतः॥८७॥रुद्राक्षधारणोद्भूतात्पुण्यात्पूर्वभवार्जितात्॥कुलेमहतिसंजा॰

ब्र.प्रो. २०३

तौवर्त्तेतेबालकाविमौ॥८८॥पूर्वाभ्यासेनरुद्राक्षान्दधानौमुदमानसौ॥अस्मि
न्जन्मनितंलोकंशिवंसंपूजयिष्यतः॥८९॥एषामेवर्णितस्तेनयोबालयोःसमु
दाहृता॥तथाचशिवभक्तकायाःकिमन्यच्छ्रोतुमिच्छसि॥९०॥इतिश्रीस्कंदपुराणेब्र
ह्मोत्तरखंडेरुद्राक्षमहिमावर्णनंनामत्रिंशोध्यायः॥३०॥सूतउवाच॥
एवंब्रह्मर्षिणाप्रोक्तंवाक्यंपीयूषसन्निभं॥आकर्ण्यमुदितोराजाप्रांजलिःपुनर
ब्रवीत्॥१॥राजोवाच॥अहोसत्संगमःपुंसामपोतीर्थप्रसाधनं॥कामधेनुरिर
वाभिष्टदोग्धासर्वजनस्यहि॥२॥अथामायातमोनिष्टेज्ञानदृष्टिःप्रसादिता॥तव २०३
दर्शनमात्रेणजातोहममरोत्तमः॥३॥श्रुतंचपूर्वचरितंबालयोःसम्यगेतयोः॥
भविष्यदपिशुश्रूषामितत्सुचाचरणंमुने॥४॥अस्यायुःकतिवर्षाणिभाग्यंचवदकीदृ

शं॥विद्याकीर्तिश्चशान्तिश्चश्रद्धाभक्तिश्चकीदृशी॥५॥एतत्सर्वमशेषेणमु
नेत्वंवक्तुमर्हसि॥तवभृत्योस्मिशिष्योस्मिशरणंत्वांगतोस्म्यहं॥६॥पराशरउ
वाच॥अथवाच्यंहियत्किंचित्कथंराज्ञोमिशंसितुं॥यच्छ्रुत्वामतिमंतोपिविषादं
प्राप्नुयुर्जनाः॥७॥तथापिनिर्व्यलीकेनभावेनपरिपृच्छतः॥अवाच्यमपिवक्ष्यामि
तवस्नेहान्महीपते॥८॥अमुष्यत्वत्कुमारस्यवर्षाणिद्वादशायुषः॥इतःपरंचपंच
तसप्तमेदिवसेमृतिं॥९॥इतितस्यवचःश्रुत्वाकालकूटमिवोदितं॥मूर्छितःसह
साभूमौपपातनृपतिःशुचा॥१०॥उत्थाप्यचसमाश्वास्यसमुनिःकरुणार्द्रधीः॥
उवाचमाभैर्नृपतेपुनर्वक्ष्यामितेहितं॥११॥संगात्परंसदालोकंपरमंपदं॥चिदा निष्कलं
नंदपरंज्योतिःसआद्यःकेवलःशिवः॥१२॥सएवादौरजोरूपंस्रष्टाब्रह्माणमात्मनः॥

सृष्टिकर्मनियुक्तायतस्मैदेवोंऽशादत्तवान् ॥१३॥ पुनश्चजगतामीशःसाक्षाद्ब्र
ह्मसनातनं ॥ शिवात्मकंपरंतत्त्वंरुद्राध्यायेप्रतिष्ठितं ॥१४॥ आत्मभूःससृजेवि
श्वंचतुर्भिर्वदनैर्विराट् ॥ ससर्जवेदांश्चतुरोलोकानांस्थितिहेतवे ॥१५॥ त
त्रायंयजुषांमध्येब्रह्मणोदक्षिणामुखात् ॥ अशेषाणामपियत्सारोरुद्राध्यायोस
मुद्धृतः ॥१६॥ सएषमुनिभिःपूर्वैर्मारीच्यात्रिपुरोगमैः ॥ सहवेदैर्धृतस्तेभ्यस्त
च्चजगृहुश्चते ॥१७॥ तच्छिष्यपुत्रैस्तत्पुत्रैस्तत्पौत्रैश्चक्रमागतैः ॥ धृतोरुद्रात्मको
सोऽयंवेदसारःप्रकाशितः ॥१८॥ एषएवपरोमंत्रएषएवपरंतपः ॥ रुद्राध्यायज
पःपुंसांपरंकैवल्यसाधनं ॥१९॥ नमहापातकैर्मुक्ताउपपातकिनश्चये ॥ रुद्रा
ध्यायजपात्पुंसांपरंकैवल्यसाधनंत्सद्यस्तेपियांतिपरांगतिं ॥२०॥ भूयोपिब्रह्म

णासृष्टाःसदसन्मिश्रयोनयः ॥ देवतीर्यङ्मनुष्याद्यास्ततसंपूरितंजगत् ॥२१॥
तेषांकर्माणिसृष्टानिस्वजन्मानिगुणानिच ॥ लोकास्तेषुप्रवर्त्तंतेभुंजतेचैव
तत्फलं ॥२२॥ लोकसृष्टिप्रवाहार्थंस्वयमेवप्रजापतिः ॥ धर्माधर्मौससर्जाग्रेस
ववक्षःपृष्ठभागतः ॥२३॥ सर्वमेवानुतिष्ठंतिपुनर्विंदंतितत्फलं ॥ अधर्ममनु
तिष्ठंतिस्तेपापफलभोगिनः ॥२४॥ पुण्यधर्मफलंस्वर्गोनरकस्तद्विपर्ययः ॥
तयोर्द्वावपियैर्धात्राकृतौशातमखांतकौ ॥२५॥ कामक्रोधश्चलोभश्चदंभमा
नादयःपरे ॥ अधर्मस्यसुताह्यासन्सर्वेपापैकनाशकाः ॥२६॥ गुरुतल्पःसुरा
पानस्वर्णस्तेयीवधःपरः ॥ ब्रह्महत्यैवकन्याचक्रोधस्यतनयाह्यमी ॥२७॥ का
मस्यतनयाह्येतेप्रधानाःपरिकीर्त्तिताः ॥ क्रोधात्पितृवधोजातस्तथामातृवध

ब्रह्मो. परः॥२८॥ ब्रह्महत्यैवकन्याचक्रोधस्यतनयाह्यमी॥ देवस्वहरणेचैवब्रह्मस्वह
२०५ रणस्तथा॥२९॥ स्वर्णस्तेयइतिह्येतेलोभस्यतनयाःस्मृताः॥ एतानाहूयचंडाला
न्पुत्रान्पातकनायकान्॥३०॥ नरकस्यविवृध्यर्थमधिपत्यंचकारह॥ तेयमेन
समादिष्टामहापातकनायकाः॥३१॥ रुद्राध्यायेषुवेदाग्रेसाक्षात्कैवल्यसाधने॥
भीताःप्रदुद्रुवुःसर्वेतेभीताःपापनायकाः॥३२॥ यमंविज्ञापयामासुःसहान्यैरु
पपातकैः॥ जयदेवमहाराजवयंहितवकिंकराः॥३३॥ नरकस्यविवृध्यर्थमधि २०५
काराःकृतास्त्वया॥ अधुनावर्त्ततुलोकेनशक्तास्मोवयंप्रभो॥३४॥ रुद्रजाप्या
नुभावेनविदग्धाश्चविद्रुताः॥ ग्रामेग्रामेनदीकूलेपुण्येष्वायतनेषुच॥३५॥
रुद्रजाप्येचपर्याप्तेकथंलोकेचरामहे॥ प्रायश्चित्तसहस्रैर्वागणयामोनकिंचन

॥३६॥ रुद्रजाप्याक्षरारावेसोढुंत्वंनशक्नुमः॥ महापातकमुख्यानामस्माकंलो
कघातिनां॥३७॥ रुद्रजाप्याभयंघोरंरुद्रजाप्यमहद्विषं॥ अतोदुर्विषहंघोरंमस्मा
कंव्यसनंमहत्॥३८॥ रुद्रजाप्येनसंप्राप्तमपनेतुंत्वमर्हसि॥ इतिविज्ञापितःसा
र्द्धंयमःपातकनायकैः॥३९॥ ब्रह्मणोंतिकमासाद्यतस्मैसर्वंव्यजिज्ञपत्॥ देवदे
वजगद्धातस्त्वमहंशरणंगतः॥४०॥ त्वयानियुक्तोमर्त्यानांशासनेपापकारिणां॥
अधुनापापिनोमर्त्यानिवसन्पृथिवीतले॥४१॥ रुद्रध्यानेननिहतंपातकानांकु
लंमहत्॥ पातकानांकुलेनष्टेनरकःशून्यतांगतः॥४२॥ नरकेशून्यतांयाति
तिममराज्यंहिनिष्फलं॥ तस्मात्त्वयैवभगवन्नुपायःपरिचिंत्यतां॥४३॥ यरु
द्यामेनविहन्येतस्वामित्वंसर्वदेहिनां॥ इतिविज्ञापितोधाताउपायमथचिंत.

ब्रस्तो॰ २०६ यत्॥४४॥अश्रद्धाचैवदुर्मेधाह्यविद्यायाःसुतेउभे॥श्रद्धामेधाविद्यातिन्नोमन्त्रै
ष्टुसमचोदयत्॥४५॥ताभ्यांविमोहितेलोकेरुद्राध्यायपराङ्मुखे॥यमःस्वस्या
नमासाद्यकृतार्थइवसोभवत्॥४६॥सर्वजन्मकृतैःपापैर्जीर्यंतेल्पायुषोजन
नाः॥तानिपापानिनश्यंतिरुद्रजाप्यवतान्नृणां॥४७॥क्षीणेषुसर्वपापेषुदीर्घ
मायुर्बलंधृति॥आरोग्यंज्ञानमैश्वर्यंवर्धतेसर्वदेहिनां॥४८॥रुद्राध्यायेनदे
वेशंस्नापयंतिमहेश्वरं॥तज्जलैःकुर्वतेस्नानंतेमृत्युंसंतरंतिच॥४९॥रुद्राध्या
याभिजप्तेनस्नानंकुर्वंतियेंभसा॥तेषांमृत्युभयंनास्तिशिवलोकेमहीयते॥५० २०६
शतरुद्राभिशेषेणशतायुर्जायतेनरः॥अशेषपापनिर्मुक्तःशिवस्यदयितोभवे
त्॥५१॥एवंरुद्रायुतस्नानंकरोतुतवपुत्रकः॥दशवर्षसहस्राणिमोदतांभूविशा

कवान्॥५२॥अव्याहतबलैश्वर्योहतशत्रुर्निरामयः॥निर्धूताशेषपापौघःशास्ता
राज्यमकंटकं॥५३॥विप्रावेदविदःशांतादर्शिनःसुशीलव्रताः॥ज्ञानयज्ञस्तपो
निष्ठासर्वतःसर्वदर्शिनः॥५४॥रुद्राध्यायजपंसद्यःकुर्वंतुविमलाशयाः॥तेषां
जपानुभावेनसद्यःश्रेयोभविष्यति॥५५॥इत्युक्त्वैवंतंनृपतिमहामुनिंतमेव
वव्रेप्रथमंक्रियागुरुं॥अथापरान्सर्वमजाशयान्मुनीन्नावाहयामाससहस्र
शःक्षणात्॥५६॥तेविप्राःशांतमनसःसहस्रपरिवारिताः॥कलशानांशतंश
स्थाप्यपुण्यवृक्षरसैर्युतः॥५७॥रुद्राध्यायेनसंजप्यतमुर्वीपतिपुत्रकं॥विधि
वत्स्थापयामासुसंप्राप्तेसप्तमेदिने॥५८॥स्नाप्यमानोमुनिवरैःसराजन्यकु
मारकः॥अकस्मादिवविचस्तःक्षणंमुर्छामवापह॥५९॥सहसैवप्रबुद्धोसोमुनि

भिः कृतरक्षणः ॥ उवाच कश्चित्पुरुषो दंडहस्तः समागतः ॥६०॥ मां प्रहर्तुं ह
तमतिर्भीमो दंडो भयावहं ॥ सोपि चान्यैर्महावीर्यैः पुरुषैरभिरक्षितः ॥६१॥
इत्युक्तवंतं नृपतिस्तनुजं मुनिसत्तमः ॥ आशीर्भिर्वादयामासुर्भयं राजा मुमो
चह ॥६२॥ अथ सर्वान्द्विजश्रेष्ठान्दक्षिणाभिर्नृपोत्तम ॥ पूजयित्वा वरान्नेन
भोजयित्वा च भक्तितः ॥६३॥ प्रतिगृह्याशिषं तेषां मुनीनां ब्रह्मवादिनां ॥ भुक्त्वा
बंधुजनैः सार्धं सभार्यः समुपाविशत् ॥६४॥ तस्मिन्समागते वीरे मुनिभिः स
ह पार्थिवैः ॥ आजगाम महायोगी देवर्षी नारदः स्वयं ॥६५॥ तमागतं प्रेक्ष्य पु
त्रं मुनीनां सार्द्धं सहर्षैरखिलैर्मुनींद्रैः ॥ प्रणम्य भक्त्या विनिवेश्य पीठे कृतोप
चारं नृपतिर्बभाषे ॥६६॥ दृष्टं किमस्ति ते ब्रह्मन्त्रैलोक्ये किंचिदद्भुतं ॥ तन्नो

ब्रूहि वयं सर्वे त्वत्कथामृतलालसाः ॥६७॥ श्रीनारद उवाच ॥ अत्र चित्रं महद्दृ
ष्टं व्योम्नावतरता मया ॥ तच्छृणुष्व महाराज सहर्षैर्मुनिपुंगवैः ॥६८॥ अद्य मृत्यु
रिहायातो निहंतुं तव पुत्रकं ॥ दंडहस्तो दुराधर्षो लोकमुद्वेजयन्सदा ॥६९॥ ईश्व
रोपि विदित्वैनं त्वत्पुत्रं हंतुमागतं ॥ सहसा पार्षदैः कश्चिद्वीरभद्रमचोदयत् ॥७०॥
स आगत्य परं मृत्युं त्वत्पुत्रं हंतुमागतं ॥ गृहीत्वा सुदृढं बध्वा दंडेनाभ्यहनद्रु
षा ॥७१॥ तं नीयमानं जगदीशसंनिधिं शीघ्रं विदित्वा भगवान्भवः स्वयं ॥ कृ
तांजलिर्देवजयेत्युदीरयन्प्रणम्य मूर्ध्ना निजगाद शूलिनं ॥७२॥ यम उवाच ॥
देवदेव महारुद्र वीरभद्र नमोस्तु ते ॥ वीरागतिः कथं नाथ मृत्योः काः समुपस्थितः
॥७३॥ निजकर्मानुबंधेन राजपुत्रं गतायुषं ॥ प्रहर्तुमुद्यते मृत्यौ को पराधो वद

ब्रह्मो. २०९

प्रभो ॥७४॥ ॥ वीरभद्र उवाच ॥ ॥ दशवर्षसहस्रायुस्राजतनयः कथं ॥ संप्राप्तिमं
तरायातिरुद्रस्नानधृतायुषः ॥७५॥ अस्तिचेदत्रसंदेहोमद्वाक्येप्यतिवारिते ॥
चित्रगुप्तंसमानीयप्रक्षामोद्यमयाचिरं ॥७६॥ श्रीनारद उवाच ॥ ॥ अथाद्भुत
श्चित्रगुप्तोयमेनसहमागतः ॥ आयुःप्रमाणंतत्सूनोःपरिदृष्ट्वसचाब्रवीत्
॥७७॥ द्वादशाब्दंचतस्यायुरित्युक्त्वाचविमृश्यच ॥ पुनश्चलेखकःप्राहसवर्षा
युतजीविनः ॥७८॥ अथाभीतोयमोराजावीरभद्रप्रसाद्यच ॥ कथंचिद्धारया
मासमृत्युसंहारबंधनं ॥७९॥ वीरभद्रेणमुक्तोथयमोगान्निजमंदिरं ॥ वीर २०९
भद्रश्चकैलाशमहंप्राप्तस्तवांतिकं ॥८०॥ अतस्तवकुमारोयंरुद्रजाप्यानुभाव
तः ॥ मृत्योर्भयमतिक्रम्यसंप्राप्तसुखीजातोयुतंसमाः ॥८१॥ इत्युक्त्वानृपमामंत्र्य

नारदेत्रिदिवंगते ॥ महर्षयःप्रमुदिताःस्वंस्वंजग्मुरथाश्रमं ॥८२॥ येकीर्त्तयंति
मनुजाःपरमेश्वरस्यमाहात्म्यमेतदथकर्णपुटैःपिबंति ॥ तेजन्मकोटिकृतपा
पगणैर्विमुक्ताःशंभोःप्रयांतिपरमंपदमिंदुमौलेः ॥८३॥ ॥ इतिश्रीस्कंदपुराणे
ब्रह्मोत्तरखंडेरुद्रजाप्यमहिमानिरूपणंनामैकत्रिंशोऽध्यायः ॥३१॥ ॥ सू
त उवाच ॥ ॥ अत्रार्थेकथयिष्यामिसर्वधर्मोत्तमोत्तमं ॥ उमामहेश्वरंव्रतंश्रेष्ठं
सर्वार्थसाधनं ॥१॥ आनर्त्तेष्वभवत्कश्चिन्नाम्नादेवरथोद्विजः ॥ कलत्रपुत्रसंप
न्नोविद्वानुत्तमवंशजः ॥२॥ तस्यैवंवर्त्तमानस्यब्राह्मणस्यगृहाश्रमे ॥ बभूव
शारदानामकन्याकमललोचना ॥३॥ तांरूपलक्षणोपेतांबालांद्वादशहायनां
॥ ययाचेपद्मनाभाख्योमृतदारोजरद्विजः ॥४॥ महाधनस्यशूरस्यसदाराजसमय

स्यच॥याऽत्राभंगभयात्तस्यतांकन्यांप्रददौपिता॥५॥मध्येदिनकृतोद्वाहःस
विप्रःश्वसुरालये॥संध्यामुपाययौतत्रसरसस्तटमाययौ॥६॥उपास्यसंध्या
विधिवत्तःस्यागच्छतमोऽटते॥मार्गेदष्टोभुजंगेनममारनिजकर्मणा॥७॥
तस्मिन्मृतेकृतोद्वाहेसहसागतबांधवाः॥चक्रुश्शुःशोकसंतप्तास्तश्वसुरैस्सा
चकन्यका॥८॥निर्हृत्यतंबंधुजनंजग्मुःस्वंस्वंनिवेशनं॥शारदाप्राप्तवैध
व्यापितुरेवांतिकेस्थिता॥९॥वृद्धांनपर्यचरद्देवीभर्त्राविरहितासती॥निना
यकतिचिन्मासान्साबालापितृमंदिरे॥१०॥एकदानैधृतोनामकश्चिद्वृद्धत
मोमुनिः॥अंधःशिष्यकरग्राहीतन्मंदिरमुपाययौ॥११॥तस्मिन्वृद्धेगृहेप्रा
प्तेगतेषुक्वापिबंधुषु॥साक्षादिवात्मनोदेवंसाबालासमुपाचरत॥१२॥स्वा २०९

गतंतेमहाभागप्रीतेऽस्मिन्नुपवेश्यतौ॥नमस्तेमुनिनाथायप्रियंकिंकरवाणि
ते॥१३॥इत्युक्त्वाभक्तिमास्थायकृत्वापादावनेजनं॥पूजयित्वापरिश्रांतंतन्मु
निपर्यतोषयत॥१४॥गृहंप्रवेश्यतंबालाकृत्वाभ्यंगस्वपाणिना॥कृतस्ना
नंचविधिवत्कृतदेवार्चनंव्रतं॥१५॥सुखासनोपविष्टंतुधूपमाल्यानुलेप
नैः॥पूजयित्वावरान्नेनभोजयामाससादरं॥१६॥भुक्त्वाचसम्यक्शानकैः
सुप्तःस्वानंदनिर्भरः॥चकारांधमुनिस्तस्यैसुप्रीतःपरमाशिवं॥१७॥विह
त्यभर्त्रासहयावदायुर्लब्ध्वासुतंसर्वगुणैरुपेतं॥कीर्तिंचलोकेमहतीम
वाप्यप्रसादयोग्याभवदेवतानां॥१८॥इत्याशिषाहतंतेनमुनिनागतचक्
षुषा॥निशम्यविस्मिताबालाप्रत्युवाचकृतांजलिः॥१९॥ब्रह्मन्रस्त्वद्वच

अ॰सो॰ निसत्यंनकदाचिन्मृषाभवेत्॥ तदेतन्मंदभाग्यायांकथंमय्यफलिष्यति॥
२१० २०॥ न्यूनायामिवतद्दृष्टिःनेत्राक्यामिवसत्क्रिया॥ विफलामंदभाग्यायामा
शीर्वादविदामयि॥२१॥ सैषाहंविधवाव्रतनदुष्कर्मफलभोगिनी॥ तवाशी
र्वचनस्यास्यकथंयास्यसिवैफलं॥२२॥ ॥मुनीरुवाच॥ ॥त्वामानालक्ष्मय
त्रोक्तंमंधेनापिमयाधुना॥ तदेतत्साधयिष्यामिकुरुमत्कोसनंशुभे॥२३॥
उमामहेश्वरंनामव्रतंयदिचरिष्यसि॥ तेनव्रतप्रभावेनसद्यःश्रेयोह्यवा
प्स्यसि॥२४॥ ॥शारदोवाच॥ ॥त्वयोपदिष्टंयत्तेनकरिष्याम्यतिदुःस्वरं॥ त २१०
द्व्रतंब्रूहिमेव्रतनविधानंवदकीदृशं॥२५॥ ॥मुनिरुवाच॥ ॥चैत्रेचमार्गे
शीर्षेवाशुक्लपक्षेशुभेदिने॥ व्रतारंभप्रकुर्वीतयथावद्गुर्वनुज्ञया॥२६॥

अष्टम्यांचचतुर्दश्यांमुभयोरपिपारणे॥ संकल्पविधिवत्कृत्वाप्रातःस्ना
नंसमाचरेत्॥२७॥ संतर्प्यपितृदेवादीन्गत्वात्वभवनंप्रति॥ मंडपंकारयेद्र
म्यंवितानाद्यैरलंकृतं॥२८॥ फलपल्लवपुष्पैश्चपुष्पाद्यैस्तोरणैश्चसमन्वि
तं॥ पंचवर्णैस्तुतन्मध्येरजोभिःपद्ममुद्धरेत्॥२९॥ चतुःषष्टिदलेबाह्येद्वा
त्रिंशच्चतदंतरे॥ तदंतरेषोडशभिरष्टभिश्चतदंतरे॥३०॥ एवंपद्मंसमुद्धृ
त्यपंचवर्णमनोरमं॥ चतुरस्रंततःकुर्यादंतर्वेदीमुत्तमं॥३१॥ व्रीहितं
डुलराशिंचतन्मध्येचसकुर्चकं॥ कूर्चोपरिसुसंस्थाप्यकलशंधान्यपूरि
तं॥३२॥ कलशोपरिविन्यस्यवस्त्रवर्णसमन्वितं॥ तस्योपरिष्टात्सौवर्णेप्रति
मेःशिवयोःशुभे॥३३॥ निधायपूजयेद्भक्त्यायथाविभवविस्तरं॥ पंचामृतै

ब्र.सो. २११ स्तु संस्नाप्य तथा शुद्धोदकेन च ॥३४॥ रुद्रैकादशकं जप्त्वा पंचाक्षरशताष्ट
कं ॥ अभिमंत्र्य पुनः स्नाप्य पीठे हेममये र्चयेत् ॥३५॥ स्वयं शुद्धासनासीनो र
धौतशुक्लांबरः सुधीः ॥ पीठमामंत्र्य यत्नेन प्राणायामं समाचरेत् ॥३६॥ संक
ल्पं पद्यते तत्र शिवाभ्यां विहितांजलिः ॥ यानि यानि च घोराणि जन्मांतरशते
षु मे ॥३७॥ तेषामेव विनाशाय शिवपूजासमारभे ॥ सौभाग्यविजयारोग्य
धर्मैश्वर्यादिवृद्धये ॥३८॥ स्वर्गापवर्गसिध्यर्थं करिष्ये शिवपूजनं ॥ इति सं
कल्पमुच्चार्य यथावत्सुसमाहितः ॥३९॥ अंगन्यासं ततः कृत्वा ध्यायेदीशं च २११
पार्वतीं ॥ कुंदेंदुधवलाकारं नागाभरणभूषितं ॥४०॥ वरदाभयहस्तं च वि
भ्राणं परशुं मृगं ॥ सूर्यकोटिप्रतीकाशं जगदानंदकारणं ॥४१॥ जाह्नवीजल

लसंसिक्तदीर्घपिंगजटाधरं ॥ उरगेंद्रफणोन्नद्धमहामुकुटमंडितं ॥४२॥ शी
तांशुखंडविलसत्कोटीरांतरभूषणं ॥ उन्मीलभालनयनं तथा सूर्येंदुलोचनं
॥४३॥ नीलकंठं चतुर्बाहुं गजेंद्राजिनवाससं ॥ रत्नसिंहासनासीनं नानाभूष
णभूषितं ॥४४॥ देवीं च दिव्यावयवां बालसूर्यांशुयुतद्युतिं ॥ बालवेषां च तन्वं
गीं बालशीतांशुशेखरां ॥४५॥ पाशांकुशाभयवरान्बिभ्रंतीं च चतुर्भुजां ॥
प्रसादसुमुखीं मंदलीलारतिविहारिणीं ॥४६॥ विलसत्कुरबकाशोकपुन्नाग
नवचंपकैः ॥ कृतावतंसामुत्फुल्लमल्लिकोत्कलिकाशुहां ॥४७॥ कांचीकलाप
पर्यस्तजघानाभोगशालिनीं ॥ उदारकंकणश्रेणिनूपुराढ्यपदद्वयां ॥४८॥ गं
डलसत्समकररत्नकुंडलरोपितं ॥ विनीधाशानुरक्तानुलसद्दशानचंद्रिका

ब्र.सो. ॥४९॥मुद्रीप्ररत्नग्रैवेयतारहारविराजिता॥नवमाणिक्यरुचिरंकंकणांगद
२१२ मुद्रिकां॥५०॥रक्तांशुकपरिधानांरक्तमाल्यानुलेपनां॥उह्यमानांकुचद्वंद्वंनि
हितांभोजकोरकौ॥५१॥नीलालोलासितापांगीभक्तानुग्रहकारिणीं॥एवंध्या
त्वाहृदीमध्येजगतःपितरौशिवौ॥५२॥जप्त्वातदात्मकंमंत्रंतदंतेबहिरर्च
येत्॥आवाह्यप्रतिमायुग्मेकल्पयेदासनादिकं॥५३॥अर्घ्यंचदद्याद्विधिवद्यो
मंत्रेणानेनमंत्रवित्॥नमस्तेपार्वतीकांतेनमस्तेवरदर्षभ॥५४॥श्रीत्र्यं
बकमहादेवंगृहाणार्घ्यंनमोस्तुते॥नमस्तेदेविविश्वेशिप्रपन्नार्तिविनाशि २१२
नी॥५५॥त्र्यंबिकेवरदेदेवीग्रहाणार्घंशिवप्रिये॥इतित्रिवारमुच्चार्यदद्या
दर्घंसमाहितः॥५६॥गंधपुष्पाक्षतान्कल्प्यधूपदीपान्प्रकल्पयेत्॥नै

वेद्यपायसान्नेनघृताक्तंपरिकल्पयेत्॥५७॥जुहुयान्मूलमंत्रेणहविषा
ष्टोत्तरंशतं॥ततःउद्वास्यपाद्यंचधूपदीपनिराजनं॥५८॥कृत्वानिवेद्यतां
बूलंनमःस्कुर्यात्समाहितः॥अथाभ्यर्च्योपहारेणपूजयेद्विजदंपती॥५९॥
एवंसायंतनीपूजांकृत्वाविप्रानुमोदितं॥भुंजीतवाग्यतोरात्रौभुंजीतक्षी
रभावितं॥६०॥एवंसंवत्सरंकुर्याद्व्रतंपक्षद्वयोबुधः॥ततःसंवत्सरेपूर्णे
व्रतोद्यापनमाचरेत्॥६१॥शातकुंभिजरौप्यैस्तुस्नापयेत्प्रतिमेजलैः॥आग
मोक्तेनविधिनापूजयेद्गिरिजाशिवौ॥६२॥वस्त्रंचस्वसुवर्णंचकलशंप्रतिमा
न्वितं॥दत्वाचार्यायमहतेसदाचाररतायवै॥६३॥ब्राह्मणान्भोजयेत्पश्चाद्य
थाशक्त्याभिपूज्यचदक्षिणांतेभ्योगोहिरण्यांबरादिकं॥६४॥भुंजीतत्नदनुज्ञा

ब्रलो॰ २१३

ताःसहेष्टजनबंधुभिः॥एवंयःकुरुतेभक्त्याव्रतंत्रैलोक्यविश्रुतं॥६५॥ससंद
कुलमुधृत्यभुक्त्वाभोगान्यथेप्सितान्॥इंद्रादिलोकपालानांस्थानेषुरम
तेचिरं॥६६॥ब्रह्मलोकेचरमतेविष्णुलोकेचशाश्वते॥शिवलोकेमनुप्राप्यत्र
कल्पशतंपुनः॥६७॥भुक्त्वाभोगान्सुविपुलान्निर्वाणमेवप्रपद्यते॥महाव्र
तमिदंवत्सेत्वमपिश्रद्धयाचर॥६८॥अतीवदुर्लभंवापिप्राप्स्यसेचमनोरथं॥
इत्यादिष्टामुनींद्रेणसाबालामुदिताभृशं॥६९॥तथेत्युक्त्वांजलिंबध्वातद्वा
क्यंसुमनोहरं॥अथतस्याःसमायाताःपितृमातृसहोदराः॥७०॥तंमुनींसुख २१३
मासीनंदृष्टुःकृतभोजनं॥सहसागत्यतेसर्वेनमश्चक्रुर्महात्मने॥७१॥
प्रसीदनःप्रसीदेतिगृह्णंतःपर्यपूजयेत्॥कृत्वातेचयथासाध्यपूजितं

परमंमुनिः॥७२॥अनुग्रहंकृतंतस्यैकृत्वाहर्षपरंययुः॥तेकृतांजलयः
सर्वेतंमुचुर्मुनिपुंगवं॥७३॥अद्यनेधन्यवयंसर्वेतवागमनमात्रतः॥पा
वितंनःकुलंसर्वंगृहंचसफलंकृतं॥७४॥इयंतुशारदानामकन्यावैधं
व्यमागताः॥केनापिकर्मद्वारेणदुर्विलंघ्यचभूयसा॥७५॥सैषाद्यतव
पादाब्जंप्रपन्नाशरणंसतां॥इमांसमुद्धरासह्यात्सुघोरात्दुःखसागरात्
॥७६॥त्वयापितावदत्रैवस्थातव्यंनोगृहांतिके॥अस्मद्गृहेमठेह्यस्मिन्स
चपूजाजपोचिता॥७७॥एषाचत्वंबालाभगवन्कुर्वतीव्रतमुत्तमं॥उप
सित्वातावदत्रैवकृतार्थेकुरुनोगुरो॥७८॥एवमभ्यर्थितस्तस्याःसर्वैः
भ्रातृजनादिभिः॥तथेतिसंन्निश्रेष्टस्तत्रोवासमठेशुभे॥७९॥सापि

तेनोपदिष्टेनमार्गेणगिरिजा॥ शिवो॥ अर्चयंतीद्रुतंसम्यक्चचारगिरिजेश्व
यो॥३७॥ ॥इतिश्रीस्कंदपुराणे॰ ब्रह्मोत्तरखंडेउमामहेश्वरव्रतकथनं
नामद्वात्रिंशत्तमोऽध्यायः॥३२॥ ॥सूतउवाच॥ ॥एवंमहाव्रतंतस्याश्चरं
त्यागुरुसंन्निधौ॥ संवत्सरोव्यतीयायनियमासक्तचेतसः॥१॥ संवत्सरांते
साबालातत्रैवपितृमंदिरे॥ चकारोद्यापनंसम्यक्विप्रभोजनपूर्वकं॥२॥
दत्वाचदक्षिणांतेभ्योब्राह्मणेभ्योयथार्हतः॥ विसृज्यतान्नमस्कृत्यपितृभ्या
मभिनंदिता॥३॥ उपोषितास्वयंतस्मिन्दिनेनियममास्थिता॥ जजापपर
मंमंत्रंयमादिष्टंमहात्मना॥४॥ अथप्रदोषसमयेप्राप्तेसंपूज्यशंकरं॥ त
स्मिन्गृहांतिकमठेगुरोस्तस्यचसंनिधौ॥५॥ जपार्चनरतासाध्वीध्यायं॰

तीपरमेश्वरं॥ तस्मिन्जागरणेरात्रौसूपविष्टाशिवांतिके॥६॥ तस्यांरात्रौतया॰
सार्द्धंसमुनिर्जगदंबिकां॥ जपध्यानतपोभिश्चतोषयामासपार्वतीं॥७॥ तस्या
श्चभक्त्याव्रतभावितायाःमुनेस्तपोयोगसमाधिनाच॥ तुष्टाभवानीजगदेकमा
ताप्रादुर्बभूवामलसांद्रमूर्तिः॥८॥ प्रादुर्भूतायदादेवीतयोरग्रेजगन्मयी॥ अं॰
धोपितत्क्षणादेवमुनिःप्रापदृशोर्द्वयं॥९॥ तांवीक्ष्यजगतांधात्रीमाविर्भूतांपु
रःस्थितां॥ निपेततुस्तत्पदयोःसमुनिःसाचकन्यका॥१०॥ तौभक्तिभावात्तसि
तामलाशयावानंदुकुपोक्षितसर्वगात्रौ॥ उत्थाप्यदेवीकृपयापरिप्लुतात्र॰
ण्णावभाषेमृदुवल्गुभाषिणी॥११॥ प्रीतास्मितेमुतिश्रेष्ठवत्सेतुष्टास्मितेन
घे॥ किंकिंददाम्यस्तिमतंदेवानामपिदुर्लभं॥१२॥ ॥मुनिरुवाच॥ ॥एषातु

श्लो· २१५ शारदानारीकन्यातुगगतभर्तृका॥मयाप्रतिश्रुतंचास्यैतुष्टेनगतचक्षुषा
॥१३॥सहभर्त्राचिरंकालंविहृत्यसुतमुत्तमं॥लभतेतिमयाप्रोक्तंसत्यंकुरुन
मोस्तुते॥१४॥॥देव्युवाच॥॥एषापूर्वभवेद्राजाद्रविडस्यद्विजन्मनः॥आसीत्त
स्यातिदयिताकामिनीनामविश्रुता॥१५॥साभर्त्तुःप्रेयसीनित्यंरूपमाधुर्यपू
र्णं॥भर्त्तारंवशमालिन्येरूपवश्यादिकैस्तवैः॥१६॥अस्यांविषयाहृदयःसवि
प्रोमोहयंत्रितः॥कदाचिदपिनैवागाज्ज्येष्ठपत्नीपतिव्रतां॥१७॥अनाभ्यागम २१५
नाद्भर्त्तुःसानारीपुत्रवर्जिता॥सदाशोकेनसंतप्ताकालेननिधनंगता॥१८॥भ
अस्याग्रहंसमीपस्थोयःकश्चिद्ब्राह्मणोयुवा॥इमांवीक्ष्यातिचार्वंगीकामार्त्तः
करमग्रहीत्॥१९॥अनयारोषताम्राक्ष्यासविप्रस्त्वधरीकृतः॥इमांसस्मराद

वानकनिधनंप्रत्यपद्यत॥२०॥एषासंमोह्यभर्त्तारंज्येष्ठपत्न्यापराङ्मुखं॥चका
रतेनपापेनभवेस्मिन्विधवाभवत्॥२१॥याःकुर्वंतिस्त्रियोलोकेजायापत्यो
श्चविग्रहं॥तासांकौमारवैधव्यमेकविंशतिजन्मसु॥२२॥यदेतयापूर्वभवेम
त्पूजामहतीकृता॥तेनपुण्येनतत्पापंनष्टमस्याःपुरातनं॥२३॥एतांसंस्मरत
योविप्रोमृतःकामेनमोहिताः॥सोस्याःपाणिगृहंकृत्वात्रभवेस्मिन्निधनंगतः॥
॥२४॥प्राग्जन्मपतिरेतस्याःपांडुदेशेषुसोधुना॥जातोविप्रवरःश्रीमानसदा
चारःपरिच्छदः॥२५॥तेनभर्त्राप्रतिनिशंसैषाप्रेम्णाभिसंगता॥स्वप्नेरतिसु
खंदेयात्स्वप्नेष्टंजागरणादपि॥२६॥पृष्ठ्युत्तरत्रिंशतयोजनदूरसंस्थोदेशाद्
तोद्विजवरःसचकर्मगत्या॥एतांवधूंप्रतिनिशंमनसाभिरामांस्वप्नेषुपश्यं

श्लो. रयतिचिरंरतिमादधानः॥२७॥एषाचस्वप्नसंगतापत्युःप्रतिनिशंसती॥
२१६ कालेनजप्स्यतेपुत्रंवेदवेदांगपारगं॥२८॥एतस्यास्तनयंजातमात्मानस्त्रि
रसंगमात्॥सोपिविप्रोनिरंस्वप्नेदृश्यतीप्रेमभावनं॥२९॥अनयाराधिता
पूर्वंभवेसाहंमहामुने॥अस्यैवरप्रदानार्थंप्रादुर्भूतास्मिसांप्रतं॥३०॥सूत
उवाच॥॥अथोवाचमहादेवीतांबालामथसावरं॥अयिवत्सेमहाभागेशृणु
मेपरमंवचः॥३१॥यदाकदाचिद्भर्त्तारंकापिदेशेपुरातनं॥द्रक्ष्यसिस्वप्नदृष्टंवा
ज्ञास्यतेत्वांविचक्षणां॥३२॥त्वांद्रक्ष्यतिसविप्रोपिसुचिरंविप्रलक्षितं॥तदाप २१६
रस्परालापोयुवयोःसंभविष्यति॥३३॥तदास्वतनयंभद्रेतस्मैदेहिबहुश्रुतं॥
फलंचैवव्रतस्यास्यतस्यहस्तेसमर्पय॥३४॥ततःप्रभृतितस्यैववंशेतिर

सुमध्यमे॥युवयोर्दैहिकःसंगोसाभूत्स्वप्नरताहते॥३५॥कालात्पंचत्वमाप
न्नेतस्मिन्ब्राह्मणसत्तमे॥अग्निंप्रविश्यतेनैवसहयास्यसिमत्पदं॥३६॥पुत्रस्ते
भविताशुभ्रसर्वलोकमनोरमः॥संपदश्चभविष्यंतिप्राप्स्यसेपरमंसुखं॥३७॥
इत्युक्त्वात्रिजगन्मातातस्यैवचमनोरथं॥तयोःसंपश्यतोरेवक्षणेनादर्शनं
गता॥३८॥सापिबालावरंलब्ध्वापार्वत्याःकरुणानिधेः॥अवापपरमानंदंप्र
जयामासतंगुरुं॥३९॥तस्यांरात्र्यांव्यतीतायांसमुनिर्लब्धलोचनः॥तस्यापि
त्रोश्चतत्सर्वंरहस्याचष्टधर्मवित्॥४०॥अथसर्वाननुपामंत्र्यशारदांचयशस्वि
नीं॥विधायानुग्रहंतेषांययौस्वैरगतिर्मुनिः॥४१॥एवंदिनेषुगच्छत्सुसाबालाच
प्रतीक्षयां॥भर्तुःसमागमंलेभेस्वप्नेसुखविवर्द्धनं॥४२॥गौर्याव्रतप्रभावेनसा

शारदाविशारदव्रता ॥ दधारगर्भंस्वप्नेपिभर्त्तुःसंगानुभावतः ॥४३॥ श्रुत्वातांभर्त्तृ
रहितांशारदांगर्भिणींसतीं ॥ सर्वेधिग्धिगितिप्रोचुर्जारिणीतिमुहुर्मुहुः ॥४४
॥ सर्पदष्टस्यतद्भर्त्तुर्येज्ञातिकुलबांधवाः ॥ तावात्रेदुःश्रवांश्रुत्वाययुस्ते
पितृमंदिरं ॥४५॥ अथसर्वेसमायाताग्रामवृद्धाश्चपंडिताः ॥ समाजंचकु
रिकत्रकुलवृद्धैःसमन्विताः ॥४६॥ अंतर्वत्नींसमादायशारदांविनताननं
॥ अतर्जयंस्तुसंवृद्धाःकेचिदासन्पराङ्मुखाः ॥४७॥ अयिजारिणिदुर्बुद्धेकि
मेतत्तेविचेष्टितं ॥ अस्मत्कुलेस्यदुःकीर्त्तिकृतत्वमसिबालिके ॥४८॥ इति
संतर्जयंतस्तेग्रामवृद्धामनीषिणः ॥ सर्वेसंमंत्रयामासुःकिंकुर्मःइति
भाषिणः ॥४९॥ तत्रोचुःकेचनवृद्धास्तांबालांप्रतिनिर्दयाः ॥ एषापरमती

बालाकुलद्वयविघातिनी ॥५०॥ कृत्वाऽस्याःकेशवपनंकर्णौछित्वाचनासि
कां ॥ निःसार्यतद्बहिर्ग्रामात्परित्यक्तास्वगोत्रजाः ॥५१॥ इतिसर्वेसमालोक्यतां
तथाकर्त्तुमुद्यताः ॥ अर्थांतरिक्षात्संभूतासुश्रवेवागगोचरा ॥५२॥ अनया
नकृतंपापंनचवैकुलदूषणं ॥ व्रतभंगोनवास्याःस्तिस्वचरित्रेयमंगना ॥
५३॥ अतःपरंस्त्रियंनारींजारिणीतिवदंतिये ॥ तेषांदोषविमूढानांसद्योजिह्
ह्वाविदीर्यते ॥५४॥ इत्यंतरिक्षेजननींवाणींश्रुत्वाथजारिणीं ॥ सर्वेप्रजहृषु
स्तस्याजननीजनकादयः ॥५५॥ ततःससंभ्रमाःसर्वेग्रामवृद्धाःसभाजनाः ॥
मुहूर्त्तंमौनमालंब्यभीतास्तस्थुरधोमुखाः ॥५६॥ तावत्केचिदविश्वासान्मिथ्
थ्यावाणीत्यवादिषुः ॥ तेषांजिह्वाद्विधाभूत्वाप्रणेमुस्तेक्षणात्क्षणात् ॥५७॥ त

ब्रसो· २१८ तः संपूजयामासुस्तां बालां ज्ञातिबांधवाः॥ बंधुस्त्रियश्च श्वश्रूस्तु साधुसाधि
ति॥५८॥ मुमुचुः केचिदानंदबाष्पबिंदून्कुलोत्तमाः॥ कुलस्त्रियः प्रमुदिताः स्तं
समाश्लिष्य आश्वसन्॥५८॥ अथ तत्रापरे प्रोचुर्दैवं वदति नान्तरं॥ कथमेषा द
धौ गर्भं शीलान्न चलितापि च॥५९॥ इति सर्वान्सभ्यजनान्संशयाविष्टचेतसः
॥ विलोक्य स्पष्टवस्तत्रैको बभाषे लोकतत्त्ववित्॥६०॥ मायामयमिदं विश्वं दृश्यते
श्रूयते च यत्॥ किं भाव्यं किमभाव्यं वा संसारेस्मिन्नमातुरैः॥६१॥ अनिरूप्य
मभूतार्थे मायायोजयतीस्फुटं॥ ईश्वरस्य वशा माया तस्याः को वेद चेष्टितं॥ २१८
६२॥ रूपके तोस्तु राजर्षेः शुक्रं निपतितं जले॥ सशुक्रं च जलं पीत्वा वेश्या गर्भं
दधौ किल॥६३॥ मुनिर्विभांडकस्यापि शुक्रं पीत्वा सहांभसा॥ हरिणी गर्भिणी भू

त्वा ऋष्यशृंगमसूयत॥६४॥ सुराष्ट्रस्य तथा राज्ञः करस्पृष्टा मृदंगना॥ तत्क्षणा
द्गर्भिणी भूत्वा अमुं प्रासूत सत्वरं॥६५॥ तथा सत्यवती नारी शाकरी गर्भसंभवा॥
तथैव महिषीगर्भे जातोहि महिषासुरः॥६६॥ तथा संति पुरा नार्यः कारुण्या ग
र्भसंभवाः॥ तथापि वसुदेवेन रोहिण्यास्तनयोभवत्॥६७॥ देवतानां महर्षि
णां शापेन च वरेण च॥ अत्यक्रमाययाकुर्मे युज्यते नात्र संशयः॥६८॥ शांब
राजा४ स्य सुशालं जातं जरान्मुनिशापतः॥ युवनाश्वस्य गर्भोभून्मुनिनां मंत्रगौ
रवात्॥६९॥ नूनमेषापि कल्याणि महर्षेः पादसेवनात्॥ महाव्रतानुभावाच्च
धत्ते गर्भमनंदिता॥७०॥ अस्मिन्नर्थे रहस्येनां सत्यं प्रक्ष्यंतु योषितः॥ ततो नि
त्रसंदेहो भविष्यति महाजनाः॥७१॥ ततस्तद्वचनाद्देवतामपृच्छंस्त्रियो मिथः॥

ब्रह्मो. २१९ नाप्यःसाङ्गांसतत्सर्वंस्वदृत्तांतंमहाद्भुतं॥७२॥विज्ञानार्थाततःसर्वेमानयित्वा
चतांसतीं॥मोदमानाःशंसंतस्थप्रययुःस्वस्वमालयं॥७३॥अथकालेशुभेप्रा
प्तेशारदाविषयाशया॥असूततनयंबालंबालार्कसमतेजसं॥७४॥सुकुमारोम
कमलेश हो दारोलक्षणैः॥अवापमहतींविद्यांबाल्येचैवमहामतिः॥७५॥अथोपनीतो
पा:४ गुरुणाकालेलोकमनोरमः॥सशारदेयएवेतिलोकेविख्यातिमापह॥७६॥ऋ
ग्वेदमष्टमेवर्षेनवमेयजुषांगणं॥दशमेसामवेदंचलीलयाध्यगमत्सुधीः॥७७
॥अत्रयेलोकमहतेसंप्रोद्युत्रिविकर्मणि॥गोकर्णंप्रत्ययुःसर्वेजनाभरतवा २१९
सिनः॥७८॥शारदापिस्वपुत्रेणसहबंधुजनेनच॥सहितापितृमातृभ्यांगोक
र्णंप्रययुःसती॥७९॥तत्रापश्यतमायांतंसदास्वप्नेभिलाषितं॥पूर्वजन्मनि

भर्तारंनिजबंधुजनैर्युतं॥८०॥तंदृष्ट्वाप्रेमनिर्भिन्नापुलकांचितविग्रहा॥वि
रुद्धबाष्पप्रसरातस्थौसन्यस्तलोचना॥८१॥सोपिविप्रोथतांदृष्ट्वास्वरूपा
चारलक्षणा॥स्वप्नेसदाभुज्यमानामात्मानोरतिदायिनीं॥८२॥तंकुमारमतीं
स्वप्नेदृष्टमात्मशरीरजं॥विलोक्यविस्मयाविष्टस्तदंतिकमुपाययौ॥८३॥ए
णाक्षिवादृष्टुमिच्छामियत्किंचिन्मनसिस्थितं॥इतिप्रथममाभाष्यरहस्यानं
निनायतां॥८४॥कात्वंकथययथावामोरुकस्यभार्यासिसुव्रता॥कोदेशःकस्य
वैपुत्रीकिंनामेत्यब्रवीहितत्॥८५॥इतितेनसमादिष्टासानारीबाष्पलोच
ना॥व्याजहारात्मनोवृत्तंबालवैधव्यकारणं॥८६॥पुनःपप्रच्छतांबालांपुत्रः
कस्यायमुत्तमः॥कयाधृतोवाजठरेबालोयंचंद्रसन्निभः॥८७॥॥शारदोवाच॥

ब्र॰सो॰ एषमेतनयःस्वामिन्सर्वविद्याविशारदः॥शारदेयइतिख्यातोममनाम्नैव
२२० कल्पितः॥८८॥इतितस्यावचःश्रुत्वाविहस्यब्राह्मणोत्तमः॥प्रोवाचकिंचित्कष्टं
हिचरंतंतवभामिनी॥८९॥पाणिग्रहणमात्रेतेकलत्रंत्वम्मृतःकिल॥कथंतव
यंसुतोजातस्तस्यकारणमुच्यतां॥९०॥इतितेनोदितावाणीमाकर्ण्यातीवलज्जि
ता॥क्षणंनम्रमुखीभूत्वाधैर्यादित्थमभाषत॥९१॥॥शारदोवाच॥॥इत्यलंपरि
हासेनत्वंमांवेत्सिमहामते॥त्वामहंवेद्मिचार्थेस्मिन्प्रमाणंमनआवयोः॥९२॥
इत्युक्त्वासर्वमावेद्यदेव्यादत्तंवरादिकं॥व्रतंस्थाप्यकुमारंचददौतस्मैधृतव्र २२०
ता॥९३॥सोपिप्रमुदितोविप्रःकुमारंप्रतिगृह्यतं॥पित्रोरनुमतेनैवतांनिना
यनिजालयं॥९४॥सोपिस्थित्वाबहूनब्दान्तस्यविप्रस्यमंदिरे॥तस्मिन्कालव

रांप्राप्तेप्रविश्याग्निंतमन्वगात्॥९५॥ततस्तौदंपतीभूत्वाविमानंदिव्यमास्थितौ
॥दिव्यभोगसमायुक्तौजग्मतुःशिवमंदिरं॥९६॥इत्येतत्पुण्यमाख्यानंमयासं
मनुवर्णितं॥पठतांशृण्वतांसद्योभुक्तिमुक्तिप्रदायकं॥९७॥आयुरारोग्यसंप
त्तिधनधान्यविवर्धनं॥स्त्रीणांमंगलसौभाग्यसुखसंतानवर्द्धनं॥९८॥॥एतन्महा
ख्यानमघौघनाशनंगौरीमहेशव्रतपुण्यकीर्त्तनं॥भक्त्याचसद्यःशृणुयाच्चकीर्त्त
येद्भुक्त्वासभोगान्पदमेतिशाश्वतं॥९९॥॥इतिश्रीस्कंदपुराणेबृहद्ब्रह्मोत्तर
खंडेउमामहेश्वरव्रतप्रभावकथनोनामत्रयस्त्रिंशत्तमोऽध्यायः॥३३॥॥सूत
उवाच॥॥एवंशिवतमःपंथाशिवेनैवप्रदर्शितः॥नृणांसंतिबंधानांसद्योमुक्ति
करःपरः॥१॥अतिदुर्मेधसांपुंसांवेदेष्वनधिकारिणां॥स्त्रीणांचद्विजबंधूनांसर्व

ब्रह्मो· षांचशरीरिणां॥२॥एषसाधारणःपंथाःसाक्षात्कैवल्यसिद्धिदः॥महामुनिजनैःस
२२१ र्वैर्देवैरपिचपूजितः॥३॥यत्कथाश्रवणंशंभोःसंसारभयमोचनं॥सद्यःशुद्धिकरं
श्लाघ्यंपवित्रंसर्वसिद्धिदं॥४॥अज्ञानतिमिरांधस्यदीपोयंज्ञानदृष्टिदः॥भवरोग
निबद्धानांनिसेव्यंपरमौषधं॥५॥महापातकशैलानांवज्रघातःसुदारुणः॥भ
र्जनंकर्मविजानांसाधनंसर्वसंपदां॥६॥येशृण्वंतिकथांशंभोःसदाभुवनपा
विनीं॥तेवैमनुष्यरूपेणरुद्राएवनसंशयः॥७॥शृण्वतांशूलिनोगाथांतथा
कीर्त्तयतांसतां॥तेषांपादरजांस्येवतीर्थानिमुनयोजगुः॥८॥तस्मान्निःश्रेयसं २२१
गंतुंयेभिवांछंतिदेहिनः॥तेशृण्वंतुसदाभक्त्याशैवींपौराणिकींकथां॥९॥यद्य
शक्तःकथांश्रोतुंतदापौराणिकींनरः॥मुहूर्त्तंवापिशृणुयान्नियमात्मादिनेदि

ने॥१०॥अथप्रातःप्रतिदिनंमध्याह्नेयदिमानवाः॥पुण्यमासेषुवापुण्यदि
नेपुण्यतिथावपि॥११॥यःशृणोतिकथांरम्यांपुराणैःसमुदीरितां॥ससंसरति
संसारंदग्धकर्म्मघनाटविं॥१२॥मुहूर्त्तंवातदर्धंवाक्षणंवापावनींकथां॥येशृ
ण्वंतिनराभक्त्यानतेषामस्तिदुर्गतिः॥१३॥यत्फलंसर्वयज्ञेषुसर्वदानेषुयत्फ
लं॥सकृत्पुराणश्रवणात्तत्फलंविंदतेनरः॥१४॥कलौयुगेविशेषेणपु
राणश्रवणादृते॥नास्तिधर्मोपरःपुंसांनास्तिमुक्तिपथःपरः॥१५॥पुराणश्र
वणंशंभोस्तथासंकीर्त्तनंपरं॥शुभएवमनुष्याणांपुण्यदंतुमहाफलं॥१६॥
कलौहीनायुषोमर्त्यादुर्बलाश्रमपीडिताः॥दुर्मेधसोदुःखभाजोधर्माचारवि
वर्जिताः॥१७॥इतिसंचिंत्यभगवान्कृपयाबादरायणिः॥हितायतेषांविद

ब्र.सो. धेपुराणाख्यमहारसं॥१८॥पिबन्वागमृतंयस्माद्देहिस्यादजरामरः॥अंतेमो
२२२ क्षमवाप्नोतिभुक्त्वाभोगान्यथेप्सितान्॥१९॥बालोयुवाथवृद्धोपिदरिद्रोपिचदु
र्बलः॥पुराणज्ञःसदावंद्यःसंपूज्यसुकृतार्थिभिः॥२०॥नीचबुद्धिंनकुर्वीतपुराण
ज्ञेकदाचनं॥यस्यवक्त्रोद्गतावाणीकामधेनुःशरीरिणां॥२१॥गुरवःसंतिलो स्र९:
केस्मिन्जन्मतोगुणतश्चये॥तेषामपिचसर्वेषांपुराणज्ञःपरोगुरुः॥२२॥पु
राणज्ञःकृतीदांतःशांतोविगतमत्सरः॥साधुःसकरुणोवाग्मीवदेद्दीशकथा
सुधीः॥२३॥भवकोटीसहस्रेषुभूत्वागौरवसीदतं॥ददात्यपुनरावृत्तिंकोन्यस्त २२२
स्मात्परोगुरुः॥२४॥व्यासासनेसमारूढोयदापौराणिकोद्विजः॥आसमाप्तेःप्र
संगस्यनमस्कुर्यान्नकस्यचित्॥२५॥येधूर्तायेचदुर्वृत्तायेचान्येविजगीषवः॥

येधूर्तायेचदुर्वृत्तायेचान्येविजगीषवः॥तेषांकुटिलवर्त्तिनामग्रेनैववदेत्कथां
॥२६॥नदुर्जनसमाकीर्णेनतुदस्युसमावृते॥देशेनधूर्तसदनेवदेत्पुण्यक
थांसुधीः॥२७॥सद्ग्रामेसुजनाकीर्णेसत्क्षेत्रेदेवतालये॥पुण्येवाथवदीतीरे
रेवदेत्पुण्यकथांसुधीः॥२८॥श्रद्धाभक्तिसमायुक्तानान्यकार्येषुलालसाः॥२
वाग्यताःशुचयोव्यग्राःश्रोतारःपुण्यभागिनः॥२९॥अभक्त्यायेकथांपुण्
यांशृण्वंतिमनुजाधमाः॥तेषांपुण्यफलंनस्याद्दुःखंस्याज्जन्मजन्मनि
॥३०॥पुराणंयेत्वसंपूज्यतांबूलाद्यैरुपायनैः॥शृण्वंतिचकथांभक्त्या
दरिद्राःस्युर्नपापिनः॥३१॥कथायांवर्त्तमानायांयेगच्छंत्यन्यतोजनाः॥भ
ोगांतरेविनश्यंतितेषांजाताश्चसंपदः॥३२॥सोष्णीषमस्तकायेचकथां॥
ष्णी

भ्रस्रो॰ २२३

शृण्वंतिपाविनीं॥तेनिःफलाप्रजायंतेपापिनोमनुजाधमाः॥३३॥तांबूलंभ
क्षयंतोयेकथांशृण्वंतिपाविनीं॥स्वविष्टांखादयंत्येतेयमकिंकराः॥
३४॥येचतुंगासनारूढाःकथांशृण्वंतिदांभिकाः॥अक्षयान्नरकान्भुक्त्वा
तेभवंत्येववायसाः॥३५॥येचवीरासनारूढायेचान्यासनसंस्थिताः॥शृण्वं
तिसत्कथांयेवैभवंत्यर्ज्जुनपादपाः॥३६॥असंप्रणम्यशृण्वंतोविषवृक्षाभवं
तिते॥कथांशयानाशृण्वंतोभवंत्यजगरानराः॥३७॥यःशृणोतिकथांवक्तु २२३
समासनसंस्थितः॥गुरुतुल्यसमंपापंसोंतेचनरकंव्रजेत्॥३८॥येनिंदंति
पुराणज्ञंमत्सरंबुध्यानराधमाः॥शतजन्मसुजायंतेकृकलासास्तथापराः
॥३९॥कदाचिदपिपुण्यांतोशृण्वंतिचकथांनराः॥तेभुक्त्वानरकान्घोरान्भ

भवंतिवनसूकराः॥४०॥येहसंतिपुराणज्ञंकथायांपापनाशिनीं॥तेनजन्म
शतंमर्त्याःसारमेयाभवंतिहि॥४१॥योकथांमनुजोदत्तेकीर्त्तिमानांनरोत्तम
॥दिव्यंविमानमारूढायातिशंभोःपरंपदं॥४२॥कृत्वाकथामविश्वासंनराः
कुर्वंतियेशमाः॥कोट्यशान्नरकान्भुक्त्वाभवंतिग्रामसूकराः॥४३॥येश्रावयं
तिमनुजान्पुण्यांपौराणिकींकथां॥कल्पकोटिशतंसाग्रेतिष्ठंतेब्रह्मणःपदं॥
४४॥आसनार्थंप्रयच्छंतिपुराणज्ञस्ययेनराः॥कंबलाजिनवासांसिमंत्रंफल
कमेवच॥४५॥स्वर्गलोकंसमासाद्यभुक्त्वाभोगान्यथेप्सितान्॥स्थिताब्रह्मादि
लोकेषुपदंयातिनिरामयं॥४६॥पुराणज्ञेप्रयच्छंतियेसूक्ष्मंवसनंनवं॥भोगिनो
ज्ञानसंपन्नास्तेभवंतिभवेभवे॥४७॥येमहापातकैर्युक्ताउपपातकिनश्चये॥पुरा

ब्रप्रो॰
२२४

णाच्छ्रवणादेवतेयांतिपरमंपदं ॥४८॥ अत्रवक्ष्येमहापुण्यमितिहासंद्विजोत्त
माः ॥ शृण्वतांसर्वपापघ्नमितिहासंमनोहरं ॥४९॥ दक्षिणापुरतोमध्ये
ग्रामेकर्कस*संज्ञिते ॥ तत्रपापाजनाःसर्वेमूढाज्ञानविवर्ज्जिताः ॥५०॥ ब्राह्म
णाश्चदुराचाराःश्रुतिस्मृतिपराङ्मुखाः ॥ जपःस्वाध्यायरहिताःसदादुर्विषया
तुराः ॥५१॥ कृषीवलाःशस्त्रधरानिर्दयाजिह्मवृत्तयः ॥ नजानंतिपरंधर्मं
ज्ञानवैराग्यलक्षणं ॥५२॥ स्त्रियश्चपापनिरताःस्वैरिण्यःकामलालसाः ॥ दुर्बु
द्धयःकुटिलगाःसद्वृत्ताचारवर्ज्जिताः ॥५३॥ तत्रैकोविदुरोनामदुरात्माब्राह्मणाध २२४
मः ॥ आसीद्वेश्यारतोयोसौसदारोपिकुमार्गगः ॥५४॥ सपत्नींचंचलांनामहित्वा
प्रतिदिनंतथा ॥ वेश्याभवनमासाद्यरमतेस्मरपीडितः ॥५५॥ सापितस्यांगना

रात्रौनियुक्तानवयौवना ॥ ह्यसहंतीस्मरावेशंरेमेजारेणसंगता ॥५६॥ तांकदा
चिद्दुराचारांजारेणसहसंगतां ॥ दृष्ट्वातस्याःपतिःक्रोधाद्विदुरश्चसत्वरं ॥५७॥
जारेपलायितेपत्नींगृहीत्वासौदुराशयः ॥ संताड्यमुष्टिवंधेनपुनःपुनरतर्ज
यत ॥५८॥ सानारीपीडिताभर्त्राकुपिताप्राहनिर्भया ॥ भवान्प्रतिदिनंवेश्यांर
मतेकामनिर्मम ॥५९॥ अहंरूपवतीयोषानवयौवनशालिनी ॥ कथंसहिष्ये
कामार्त्ताभर्तृसंगविवर्ज्जिता ॥६०॥ इत्युक्तःसतयातन्व्याप्रोवाचब्राह्मणाध
मः ॥ युक्तमेवत्वयोक्तंहितस्मात्कुर्ष्यामितेप्रिये ॥६१॥ जारेभ्योधनमाकृष्यतेभ्यो
देयामहारतिः ॥ तद्धनंदेहिमेसर्वंपण्यस्त्रीणांददामितत् ॥६२॥ एवंतेपूर्यतेका
मोममापिचवरानने ॥ तथेतिभर्तृवचनंप्रतिजग्राहसावधूः ॥६३॥ एवंतयोः

ब्र॰सो॰ स्तु दंपत्योर्दुराचारप्रवृत्तयोः॥ कालेन निधनं प्राप्तः स विप्रो वृषलीपतिः॥६४
२२५ मृते भर्त्तरि सा नारी पुत्रैः सह निजालये॥ उवास कतिचित्कालं किंचिदुत्क्रांतयौ
वना॥६५॥ एकदा दैवयोगेन सा नारी व्यभिचारिणी॥ महता पुण्ययोगेन
गोकर्णक्षेत्रमाययौ॥६६॥ तत्र तीर्थजले स्नात्वा कस्मिंश्चिद्देवतालये॥ सुश्राव वृ
द्धवक्त्रमुखात्पुण्यां पौराणिकीं कथां॥६७॥ योषितां जारसक्तानां नरके यमकिं
कराः॥ संतप्तं लोहपरिघं क्षिपंति स्मरमंदिरे॥६८॥ इति पौराणिकेनोक्तं सा स्म
ता धर्मसंहितां॥ तमुवाच रहस्येषा भीता ब्राह्मणपुंगवं॥६९॥ ब्रह्मन्पापमजानं
त्या मया चरितमुल्बणं॥ यौवने कामचारेण जारकर्म कृतं मया॥७०॥ इदं त्वद्वच २२५
नं श्रुत्वा पुराणार्थविजृंभितं॥ भीतिर्मे महती जाता शरीरं वेपते मुहुः॥७१॥ धिग्मा

दुर्विषयासक्तां स्मरबाणविमोहितां॥ अल्पस्य यत्सुखस्यार्थे घोरां यास्यामि दु
र्गतिं॥७२॥ कथं पश्यामि मरणे यमदूतान्भयंकरान्॥ कथं पाशैर्बलात्कंठे ब
ध्यमाना धृतिर्लभे॥७३॥ कथं पश्यामि मरणे यमदूतान्भयंकरान्॥ कथं स
मां सहिष्ये नरके दुःसहं देहकृंतनं॥ पुनः कथं पतिष्यामि संतप्ते कीटकर्दमे॥
॥७४॥ कथं वा रोचते मह्यं मद्यप्रभृति भोजनं॥ रात्रौ कथं सहिष्ये वा निद्रां दुःख
दवाहुतां॥७५॥ हा हा हतास्मि दग्धास्मि विदीर्णहृदयास्मि च॥ हविषेमां महा
पापे यद्बुद्धिमपापतः॥७६॥ पतनस्तुंगशैलाद्या ब्रूल्लप्रोतस्य देहिनं॥ पतदुः
खं जायते घोरं तस्मात्कोटिगुणं मम॥७७॥ अश्वमेधशतं कृत्वा गंगां स्नात्वा श
तं समाः॥ न शुद्धिर्जायते प्रायो मत्पापस्य गरीयसः॥७८॥ किं करोमि क्व गच्छामि

किंवाशरणमाश्रये॥कोवामांत्रायतेलोकेपतंतींनरकार्णवे॥७९॥त्वमेवमे
गुरुर्ब्रह्मन्त्वंमातात्वंपितासिच॥उद्धरोद्धरमांदीनांत्वामेवशरणंगता॥८०॥इ
तितांजातनिर्वेदांपतंतींचरणद्वये॥उत्थाप्यकृपयाधीमान्बभाषेद्विजपुंगव
॥८१॥दीक्षाकालेप्रबुद्धासिक्षत्वेमांमहतींकथां॥माभैषीस्त्वंवक्ष्यामिगते
वत्वंसुखावहं॥८२॥सत्कथाश्रवणादेवजाताते मेतिरीदृशी॥इंद्रियार्थेषुवैरा
ग्यंपश्चात्तापोमहानभूत्॥८३॥पश्चात्तापोहिसर्वेषामघानांनिष्कृतिःपरा॥
तेनैवकुरुतेसद्यःप्रायश्चित्तंसुधीर्नरः॥८४॥प्रायश्चित्तानिसर्वाणिकृत्वापि
विधिवत्पुनः॥अपश्चात्तापिनोमर्त्यानयांतिगतिमुत्तमां॥८५॥सत्कथाश्रवणा
न्नित्यंमज्जनानांनिषेवणात्॥पुण्यक्षेत्रनिवासाच्चचित्तशुद्धिःप्रजायते॥८६॥

यथासत्कथयानित्यंचित्तंयातिविशोकतां॥तथासत्कथयाचेतोविशुद्धिंपरमांव्र
जेत्॥८७॥विशुद्धेचेतसिनृणांध्यानंस्यात्सीतुमापते॥ध्यानेनसर्वविलयंमनोवा
क्कायकर्मजं॥८८॥सद्योविधूयकृतिनोयांतिशंभोःपरंपदं॥अतःसमस्तपुण्यानां
सत्कथासाधनंपरं॥८९॥कथयामिद्यतिध्यानंध्यानात्कैवल्यमुत्तमं॥असिद्धः
परमध्यानःकथामेवशृणोतियः॥९०॥सोन्यजन्मनिसंप्राप्यध्यानंयातिपरां
गतिं॥नामोच्चारणमात्रेणप्राप्नोतिपरमंपदं॥९१॥पश्चात्तयासध्यानेनजि
त्वामृत्युमनाविलं॥सर्वेषांश्रेयसांबीजंसत्कथाश्रवणंनृणां॥९२॥यस्तद्विही
नोनपशुःरूपंमुच्येतबंधनात्॥अतस्त्वमपिसर्वेभ्योविषयेभ्योनिवृत्तितः॥९
४॥भक्तिंपरांसमास्थायततोमुक्तिमवाप्स्यसि॥ध्यायतःशिवपादाब्जंमुक्तिरे

ब्र.सो. २२७ केनजन्मना॥९५॥भविष्यतिनसंदेहःसत्यंसत्यंवदामिते॥इत्युक्तातेनविप्रे-
णसानारीबाष्पलोचना॥९६॥पतितापादयोस्तस्यकृतार्थास्मित्यभाषत॥त-
स्मिन्नेवमहाक्षेत्रेतस्मादेवद्विजोत्तमात्॥९७॥सुश्रावसत्कथांसाध्वीकैवल्यफ-
लदायिनीं॥सउवाचद्विजस्तस्मैकथांवैराग्यबृंहितां॥९८॥यांश्रुत्वामनुजःसद्य-
स्त्यजेद्विषयवासनां॥तस्याःशुद्धंयदाचित्तंवैराग्यरसधारया॥९९॥तदोवाच
द्विजःशैवीकथांभक्तिसमन्वितां॥यथायथामनःस्तस्याःप्रसादमधिगच्छति॥१००॥
तथातथाशनैःशंभोर्ध्याननयोगमुपादिशत्॥१॥शनैःशनैर्ध्वस्ततमोमलंमनो २२७
विमुक्तसर्वेंद्रियभोगविभ्रमं॥विशुद्धसर्वत्रदयंद्विजस्त्रियोविवेशविश्वेश्वरयो-
गचेतनां॥२॥इत्थंसफतिमाश्रित्यसानारीप्राप्तसंगतिः॥दध्यौमुहुर्मुहुःशंभो

श्चिदानंदमयंवपुः॥३॥नित्यतीर्थजलेस्नात्वाजटाकल्पधारिणी॥भस्मोद्धूलि-
तसर्वांगीरुद्राक्षकृतभूषणा॥४॥शिवनामजपासक्तावाग्यतामितभोजना॥
बद्धपद्मासनाव्यग्रासत्कथाश्रवणोत्सुका॥५॥गुरोःशुश्रुषणपरात्यसुहृज्जना-
॥गुरूपदिष्टमार्गेणाशिवमेवमतोषयत्॥६॥विश्वेशविश्वविलयस्थितिजन्महे-
तोविश्वैकवंद्यशिवशाश्वतविश्ववंद्य॥विध्वस्तकालपरिवीतगुणाभवाद्यहेश्री-
महेशमयिधेहिकृपाकटाक्षं॥७॥शंभोःशशांककृतशेखरशांतमूर्त्तेगंगाधराम-
रवरार्चितपादपीठ॥नागेंद्रभूषणनगेंद्रनिकेतनेशभक्तार्त्तिहन्मयिनिधेहि-
कृपाकटाक्षं॥८॥श्रीविश्वनाथकरुणाकरशूलपाणेभूतेशभर्गभुवनत्रयगीत-
कीर्त्ते॥श्रीनीलकंठमदनांतकविश्वमूर्त्तेगौरीपतेमयिनिधेहिकृपाकटाक्षं॥९॥

ब्रप्रो॰
२२६

इतिप्रतिदिनंभक्त्यासाप्रार्थयंतीमहेश्वरं॥शृण्वंतितत्कथांपुण्यांकर्मबंधसमा
छ्छनत्॥१०॥अथकालेनसानारीसमुत्सृज्यकलेवरं॥महेशानुचरैर्नीताजगा
मशिवमंदिरं॥११॥उपास्यमानंगौरीशंकोटिसूर्यसमप्रभं॥त्रिलोचनंपंचमु
खंनीलग्रीवंसदाशिवं॥१२॥तत्रदेवैर्मतादेवंसेव्यमानंसनातनं॥गणेशानं
दिभृंगीतुवीरचंडेश्वरादिभिः॥१३॥वामांगेबिभ्रतंगौरीविद्युत्पुंजसमप्रभं॥
दृष्ट्वासंसंभ्रमंनारीसाप्रणम्यपुनःपुनः॥१४॥आनंदाश्रुकुलैर्युक्तारोमहर्षसं
माकुला॥संमानीताकरुणयापार्वत्याशंकरेणच॥१५॥तस्मिन्लोकपरानं २२६
देसर्वज्योतिषिशाश्वते॥लब्ध्वानिर्वाणमचलंलेभेसुखमनाहतं॥१६॥साकदा
चिदुमादेवमभिगम्यसदाशिवं॥पर्यपृच्छतमेभर्त्ताकांगतिंगतवानिति॥१७॥

तामुवाचतदादेवीसत्तेभर्त्ताद्दुराशयः॥भुक्त्वानरकदुःखानिविंध्येजातःपि
शाचकः॥१८॥पुनःपप्रच्छसानारीदेवींत्रिभुवनेश्वरीं॥केनोपायेनमेभर्त्तासद्ग
तिंप्राप्नुयादिति॥१९॥देव्युवाच॥ ॥सोस्मत्कथांमहापुण्यांकदाचिच्छृणुयाद्यवि
दि॥निस्तीर्यासद्गतिंसर्वामिमंलोकंप्रयास्यति॥२०॥इतिदेव्यावचःश्रुत्वासा
नारीविहितांजलिः॥प्रार्थयामासतांदेवींभर्त्तुःपापविशोधने॥२१॥तयामुहुः
प्रार्थ्यमानासागौरीकरुणाप्लुता॥तुंबरुंनामगंधर्वंसमाहूयेदमब्रवीत्॥२२॥
तुंबरोगच्छभद्रंतेविंध्यशैलमहानय॥अस्तिपिशाचकोनत्रयोस्याःपतिरस
न्मतिः॥२३॥तस्याग्रेपरमांदिव्यांकथांमस्मत्कृपोर्युतां॥व्याख्यायदुर्गतेमुक्तंत
मानयशिवांतिकं॥२४॥इतिदेव्यासमादिष्टस्तुंबरुनादप्रियं॥तयासहविमाने

ब्र॰सो॰ २२९ नविंध्याद्रिसहसायया॥२५॥तत्रापश्यन्महाकायंरक्तनेत्रंमहातनुं॥प्रहसंतं
रुदंतंचवसंतंचपिशाचकं॥२६॥बलाद्गृहीत्वातंपाशैर्बध्वासमुपवेश्यच॥तंच
कर्णेतत्रकीहस्तोज्जगौगौरीपतेःकथां॥२७॥सपिशाचोमहापुण्यांकथांश्रुत्वापु
रद्विषः॥विधूयकल्मषंसर्वंसद्योहात्माप्रसद्गतिः॥२८॥सपिशाचंवपुर्हित्वास्व
रूपंदिव्यमाश्रितः॥जगौस्वयंमपिश्रीमच्चरितंपार्वतीपते॥२९॥विमानवरमा
रुह्यसचदिव्यस्वरूपधृक्॥॥सतुवैश्यःपार्श्वगतस्तत्रकीर्तयागायन्महेशस्यगु
णान्मनोहरान्॥जगामकैवल्यपदंसनातनंगायंस्तुमाहेशगुणैर्महात्मनः॥३०॥ २२९
इत्येतत्कथितंपुण्यमाख्यानंदुरितापहं॥महेश्वरंप्रीतिकरंनिर्मलज्ञानसा
धनं॥३१॥यइदंकीर्तयेद्विप्राःशृणुयाद्वासमाहितः॥शंभोर्गुणानुकथनंपवि

त्रंपापनाशनं॥३२॥परमानंदजननंभवक्लेशमहौषधं॥भुंक्तेहविपुलान्भोगान्
मुक्तोयातिपरांगतिं॥३३॥पूज्यंतेतेमहाभागाःकृतार्थामुनिसत्तमः॥येसेवंतेसदा
शंभोःकथामृतरसांबुधि॥३४॥तेजन्मभाजःखलुजीवलोकेयेषांमनोध्याय
तिविश्वनाथं॥वाणीगुणान्स्तौतिकथांशृणोतिश्रोत्रद्वयंतेभयमुत्तरंति॥३५॥
विविधगुणविदैतित्वष्टमस्यस्वरूपंजगतिचबहिरंतर्भ्राजमानंमहिम्ना॥मन
सिचबहिरंतर्वाङ्मनोवृत्तिरूपंपरमशिवमनंतंड्हष्टिसांद्रपद्मे॥३६॥ ॥इतिश्री
स्कंदपुराणेवृहद्ब्रह्मोत्तरखंडेपुराणश्रवणमहिमानामचतुस्त्रिंशोध्यायः॥३४॥
ऋषयऊचुः॥॥सूततेदंपरमंश्रेष्ठंत्वयोक्तंवेदसंमतं॥अस्माकंमोक्षजनिकाफल
दानाभिसांप्रतं॥१॥सर्वंश्रुतंसमासेनत्वन्मुखेंदोःसुधावचः॥तेधन्याःकृतकृ

ब्र.सो. स्यास्तेसर्वमान्याश्चतेसदा॥२॥येषांमुखेमृतमयंशुद्धंशिवकथानकं॥धन्या
२३० तेषांचजननीजनकोपितथामता॥३॥याभ्यांशिवःसमुद्भूतोवदतीदंकथा
मृतं॥तेषांधन्यंकुलंज्ञातिंदर्शनीयंचसद्वपुः॥४॥यैर्धृताशंभुपादाब्जरेणु
प्रीतिर्गरीयसी॥शिवसृष्टिर्महाश्रेष्ठातस्यांश्रेष्ठास्तुस्थावराः॥५॥स्थावरेषुम
हाश्रेष्ठाःपार्वतास्तेषुसत्तवै॥सत्त्वष्वपिमहाश्रेष्ठस्तुहिमाद्रिरितिस्थितिः॥६॥त
स्याजातामहादेवीपार्वतीजगदंबिका॥यस्यादर्शनमात्रेणमार्कंडेयादयो
मताः॥७॥ऋषयःसिद्धिमापन्नासायज्ञार्यामहेश्वरी॥सशिवःसर्वदाश्रेष्ठःस २३०
र्वेभ्योदेवमात्रतः॥८॥तत्कथात्वद्धृदिप्रख्यातस्मात्त्वंभोसिपूज्यमान्॥सूतज
नासिसर्वत्वंयतःशिवकथानके॥९॥विमलावर्त्ततेचित्तेप्रीतिःप्रेममधुराःस

रा॥पुनःकथययद्भव्यंशिवसायुज्यदायकं॥१०॥व्रतेनदानदानधर्माख्यांशौ
चेनायसमन्वितं॥व्रतंचकीदृशंप्रोक्तंयेनतुष्टोभवेच्छिवः॥११॥दानंचैवत
थाब्रूहियेनेष्टोभवतिप्रभुः॥धर्मश्चकीदृशःप्रोक्तोयेनस्यात्तुष्टोहरः॥शौ
चंचकीदृशंख्यातंशिवतुष्टोभवेद्यतः॥१२॥तिथीनांनिर्णयंसूतप्रायश्चित्त
विधिंतथा॥वक्तुमर्हसिचास्माकंव्यासशिष्यमहामते॥१३॥॥सूतउवाच॥॥
धन्यंप्रोक्तंयशस्यंचसर्वसिद्धिप्रदंनृणां॥शिवसायुज्यदंशश्वत्भवद्भिःप्रश्न
पूर्वकं॥१४॥अतिख्यातुमशक्तोपिवदिष्येहंमहादरात्॥व्यासप्रसादतोनूनं
किंकिंनप्रोच्यतेमया॥१५॥शृणुध्वमृषयःसर्वेतिथीनांनिर्णयंपरं॥अनिर्णि
तातिथिष्वेषुनकिंचित्कर्मसिध्यति॥१६॥श्रौतंस्मार्त्तंवरंदानंयच्चान्यत्कर्मवैदि

ब्रह्मो. २३१

कं॥ निर्णीतासु तिथिष्वेवं कर्म कुर्वीत नान्यथा॥१७॥ प्रायः प्रातमुपोष्यं स्यात्तिथे
र्दैवफले श्रुतिः॥ मूलं हि पितृतुष्टयर्थं पित्र्यं चोक्तं महर्षिभिः॥१८॥ यां प्राप्यास्तमु
पैत्यर्कः सा चेत्स्यात्त्रिमुहूर्त्तिका॥ धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुस्तिथिं॥१९॥
क्षये पूर्वा प्रकर्त्तव्या वृद्धौ कार्या तथोत्तरा॥ तिथेस्तस्यास्त्रिक्षणायाः क्षयवृद्धित्व
कारणं॥२०॥ अष्टम्येकादशी षष्ठी तृतीया च चतुर्दशी॥ कर्त्तव्या परयुक्तास्ता अ
पराः पूर्वमिश्रिताः॥२१॥ वृहत्तल्पा तथारंभा सावित्री वटपैत्रिकी॥ कृष्णाष्टमी च
संपूर्ता कर्त्तव्या सम्मुखा तिथिः॥२२॥ शुक्ले द्वैततया कृष्णे युगादी कवयो विदुः॥ शु
क्ले पूर्वाह्निके कार्ये कृष्णे चैवापराह्निके॥२३॥ नागविद्धा तु या षष्ठी शिवविद्धा तु स
प्तमी॥ दशम्येकादशी विद्धा नोपोष्या सा कथंचन॥२४॥ ज्ञात्वैवं चंद्रसूर्याभ्यां ति २३१

थिं स्फुटतरां व्रती॥ एकादशी तृतीया च षष्ठी चोपवसेत्सदा॥२५॥ फलमेकादशी
हंती विहंति दशमीयुता॥ पारणं च त्रयोदश्यामुद्धरेद्द्वादशीव्रतं॥२६॥ पारण
णाहे न लभ्येत द्वादशी सकलापि चेत्॥ तदानीं दशमीविद्धा उपोष्यैकादशी तिथिं
॥२७॥ शुक्ले वा यदि वा कृष्णे भवेदेकादशीद्वयं॥ उत्तरां तु यतिः कुर्यात्पूर्वामेव सदा
गृही॥२८॥ दर्शं च पौर्णमासं च सप्तमीं पितृवासरं॥ पूर्वविद्धमकुर्वाणो नरकं प्रति
पद्यते॥२९॥ सिनीवाली द्विजैर्ग्राह्या साग्निकैः श्राद्धकर्मणि॥ कुहूः स्त्रीभिस्तथा शूद्रै र
पि चान्यैरनग्निकैः॥३०॥ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता॥ निशाव्रते
षु च ग्राह्या प्रदोषव्यापिनी तिथिः॥३१॥ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः॥
यत्र वा युज्यते विप्राः प्रदोषे हिमरश्मिना॥३२॥ अर्वाक् षोडशनाड्यस्तु परतश्चे

ब्रह्मो० २३२

वर्षोद्भवः॥पुण्यकालोत्रसंक्रांतौस्नानदानजपादिषु॥३३॥आसन्नसंक्रमंपुण्यं
दिनार्द्धंस्नानदानयोः॥रात्रौसंक्रमणेभानोर्विषुवत्ययनेदिने॥३४॥सूर्येंदुग्रहणं
यावत्तावत्स्नानजपादिकं॥नस्वप्यान्नचभुंजीतस्नात्वाभुंजीतमुक्तयोः॥[illegible]॥आदि
त्यशीतकीरणौग्रस्तावस्तंगतौयदा॥दृष्ट्वातदान्यदिवसेस्नात्वाभुंजीतवाग्यतः॥
३५॥सूतकेमृतकेवापिनोपवासंत्यजेद्व्रती॥यस्मात्कृत्यमव्रतोनीवगर्हितोवेदपारगैः
॥३६॥यस्मात्प्रसाददोषेवास्नात्वाकार्यंव्रतंद्विजाः॥देवार्चनादिकंकर्मकार्यंदीक्षि
तैःसदा॥३७॥नास्तिपापंयतस्तेषांसूतकंचयदात्मनां॥शिवेदेवार्चनंयस्ययः ॥२३२
स्यचाग्निपरिग्रहः॥३८॥ब्रह्मचारियतीनांचशरीरेनास्तिसूतकं॥महद्दुःखप्रयुक्ता
यायाचसोपाद्द्विदितिथिः॥३९॥सामावास्यासमाज्ञेयादानाध्ययनकर्मसु॥पालनीयाप्र

यत्नेनशैवैरपिमुमुक्षुभिः॥४०॥माघाद्यपरपक्षेतुपूर्वमध्यानुशाश्वता॥चतुर
ष्टकास्तिस्रःसप्तम्यादिष्वनुक्रमात्॥४१॥माघेपंचदशीकृष्णानभस्येचैत्रयोदशी॥
तृतीयामाधवेशुक्लाकार्त्तिकेनवमीसिता॥४२॥एतायुगादयःप्रोक्ताःसर्वाचाक्ष
यपुण्यदाः॥तेषुश्राद्धादिकंश्रेष्ठंसर्वपापविशुद्धये॥४३॥सिंहवृश्चिकयोःकुंभसं
क्रांतिषुभवंत्युत॥क्रमात्कृतयुगादीनांयुगांतास्तेमहर्षयः॥४४॥श्राद्धपक्षेत्रयो
दश्यांमघास्विंदुकरेरविः॥यदातदागजच्छायांश्राद्धेपुण्यैरवाप्यते॥४५॥धनुस्त्री
मीनयुग्माकाःषडशीतिमुखाःस्मृताः॥अश्वयुक्शुक्लनवमीद्वादशीकार्त्तिकेसि
ता॥४६॥तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच॥फाल्गुनस्यत्वमावास्यापौषस्यै
कादशीतथा॥४७॥आषाढस्यापिदशमीमाघमासस्यसप्तमी॥श्रावणस्याष्टमीकृ

ख्यातथाषाढीचपूर्णिमा॥४८॥कार्त्तिकीफाल्गुनीचैवज्येष्ठपंचदशीसिता॥म
न्वंतरादयश्चैतादत्तस्याक्षयकारकाः॥४९॥संक्रांतयस्तथापुण्याभास्वतोद्वा
दशैवतु॥पर्वस्वेतेषुदानानिधेनुशय्यादिकानिच॥५०॥प्रयच्छंतिद्विजेंद्रेभ्यो
लभंतेचाक्षयांगतिं॥एकैकवर्द्धितोविप्रान्नंतेद्वादशभोजयेत्॥५१॥सहस्र
रंमहापद्मंकर्त्तव्यंतंडुलैस्तुसैः॥निर्द्धनैर्द्वादशाब्दंवाकार्यमुद्यापनेविधौ॥५२॥
हयदानंप्रशंसंतिमुनयोत्रमहाशयाः॥जपाकुसुमसंकाशंमणिंदद्याद्धुः
भास्वये॥५३॥द्विभुजांरविमूर्त्तिंचसंज्ञामूर्त्तिंतथैवच॥सौवर्णेकलशेस्थाप्यतौ २३३
त्रिपूर्णजलेमुदा॥५४॥एतद्व्रतंमहाश्रेष्ठंसूर्यप्रीतिकरंमहत्॥मुद्गामोदकव
स्त्रैश्चदीपैस्ताम्रतलेस्थितैः॥५५॥संयुक्ताअव्रणाःकुंभास्त्रयोदशसुपक्वगाः

पूजनीयाप्रयत्नेनद्वादशारविनामभिः॥५५॥नाम्नापुरुषोत्तमेनैवमध्यस्थंकुं
भमर्चयेत्॥ग्राह्यंमकरतश्चैतद्यावद्वर्षमितिर्भवेत्॥५६॥मकरेवैसमाप्तिस्या
त्तत्रोद्यापनमिष्यते॥अशक्तोमोदकान्दद्यात्प्रतिसंक्रमवृद्धिगान्॥५७॥सद
क्षिणान्फलैःसार्द्धंयज्ञसूत्रादिभिःक्रमात्॥एवंयःकुरुतेतस्यरविमोक्षप्रदो
भवेत्॥५८॥शैवंनेत्रंचदक्षंवैरविःप्रोक्तोमहर्षिभिः॥एतत्कृतेनतुष्टःस्यादुमा
कांतोनसंशयः॥५९॥शिवनेत्रद्वयोत्पन्नौव्यतिपातश्चवैधृतिः॥तयोरपिव्र
तंकार्यमेकवृद्ध्यादिभोजनात्॥६०॥सर्वतोभद्रकंवाथलिंगतोभद्रमेवच॥त
त्रपूज्योमहेशानःपार्वत्यासंयुतोनरा॥६१॥वर्द्धमानोभयावाथद्वादशीपापना
शिनी॥साप्येवंविधिनाकार्याधेनुर्देयात्रवैशुभा॥६२॥व्यतिपातेसुवर्णस्यद

श्लो॰ नमुक्तंमहाफलं॥ घृतंगुडंतथाताम्रंवैधतेप्येवमेवतत्॥६३॥ पौर्णिमापर्व
२३४ विप्रेंद्राःशृणुध्वंकथयामिवः॥ यदनुष्ठानतःसर्वान्कामान्जंतुरवाप्नुयात्
॥६४॥ विप्रैर्वैश्यैःखतोग्राह्याश्रावणात्क्षत्रियर्षभैः॥ कार्त्तिक्यावैश्यवर्णेनमाघा
च्छूद्रैरनुक्रमात्॥६५॥ नभसीकार्तिकीवापिस्त्रवैर्ग्राह्यायथादरं॥ दंपतीभो
जनंकार्यंप्रतिपर्वैकवृद्धिमत्॥६६॥ षट्पंचाशाद्धिकंयावत्तंतवर्षेभवेत्त
दा॥ उद्यापनंचकर्तव्यंयथाविभवसंततं॥६७॥ हेमांमूर्त्तिर्हरेःकार्यालक्ष्म्या
श्चैवतथाविधां॥ पूजयेत्सर्वतोभद्रेतिथितुल्यघटान्विते॥६८॥ सदीपेदक्षिणा २३४
युक्तेसवस्त्रेकलशैर्चयेत्॥ चंद्रकांतमणेर्दानंविशेषात्परिकीर्त्तितं॥६९॥ ए
तानिपंचपर्वाणिप्रतिमासंकरोतियः॥ तस्यैभुक्तिंचमुक्तिंचदत्तोविष्णुस्तदा

सदाशिवो॥६९॥ अमावास्यामहापर्वपितृणांमुक्तिदायकः॥ प्रतिमासंप्रकर्त्त
व्यंपितर्युपरतेनृभिः॥७०॥ एकंवैद्वादशीपर्वामावास्यापर्वतद्वयं॥ नत्याज्यं
सर्वथानित्यंपितृणांमुक्तिदायकं॥७१॥ षण्णवतीतममित्येकेश्राद्धपूर्वंवदंतिहि
॥ वर्षेकेनैवकर्त्तव्यंपितृमोक्षपरंयतः॥७२॥ द्व्याधिकांसप्तर्तीचाहुःश्राद्धकर्म
णिचापरे॥ कृत्वातानिनरोभक्त्यामुच्यतेपैतृकादृणात्॥७३॥ अमापूर्णाव्यती
पातेवैधृतिःसंक्रमस्तथा॥ द्वादश्यावृद्धयंशुक्लात्सप्तपर्वाणिचोचिरे॥७४॥ ह
त्तश्राद्धममावास्याद्वादशाहेतथाह्निके॥ येकुर्वंतिनरास्तेषांपितरस्स्वर्गमास्थि
ताः॥७५॥ अत्रदानानिदेयानियथाविभवसारतः॥ यदिच्छेदात्मनोमुक्तिंतद्दाशा
द्द्यंविवर्ज्जयेत्॥७६॥ विषयैर्हिनहानिःस्याद्दानैर्मुक्तिरवाप्यते॥ तद्धनंदानसात्क

ब्रसो॰ त्वामोक्षंगच्छेत्नसंशयः॥७७॥पानीयमप्येषुतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतो
२३५ मनुष्यः॥श्राद्धंकृतंतेनसमासहस्रंरहस्यमेतत्पितरोवदंति॥७८॥ ॥इतिश्री
स्कंदपुराणेवृहत्ब्रह्मोत्तरखंडेधर्माचारवर्णनेपंचत्रिंशोध्यायः॥३५॥ ॥ऋष
यऊचुः॥ ॥ज्ञातमेतन्महाभागतिथ्यादिनांसमासतः॥दानानांलक्षणंब्रूहि
प्रमाणंचविधिंतथा॥१॥सूतउवाच॥ ॥सर्वदानानिवक्ष्यामिमहादानानिषो
डष॥तुलापुरुषआद्यंतुहिरण्यगर्भदानकं॥२॥ब्रह्मांडंकल्पवृक्षश्चगोसह॰ २३५
स्रंचपंचमं॥हिरण्यकामधेनुश्चहिरण्याश्वस्तुसप्तमः॥३॥हिरण्याश्वरथस्तद्व
द्धेमहस्तीरथस्तथा॥पंचलांगलकंतद्वद्धरादानंतथैव॥४॥विश्वचक्रंकल्पलता
सप्तसागरकंपरं॥रत्नधेनुर्महाभूतघटःशुभदिनेर्पयेत्॥५॥मंडपेमंडले॰

दानंदेयात्सूज्यार्थिनेक्षिपेत्॥दानंषोडशधाप्रोक्तंमेरवोदशतान्शृणु॥५॥
धान्यद्रोणसहस्रेणउत्तमोर्द्धार्धतोपरैः॥षोडशभिरुत्तमोद्रोणैःकृतस्तुलव
णाचलः॥६॥दशभारैर्गुडादिस्यादुत्तमोर्द्धार्द्धतःपरैः॥उत्तमःफलसाहस्रैफ॰
लादिरर्द्धतःपरौ॥७॥दशद्रोणैस्तिलादिस्यात्पंचभिश्चत्रिभिःक्रमात्॥कार्पासप
र्वतोविंशद्भारैश्चदशपंचभिः॥८॥विंशत्याघृतकुंभानामुत्तमस्याद्घृताच॰
लः॥दशभिःपलसाहस्रैरुत्तमोरजताचलः॥९॥अष्टभारैःशर्करायाउत्तमः
शर्कराचलः॥दशधेनुःप्रवक्ष्यामियांदत्वामृतमश्नुते॥१०॥प्रथमागुडधेनु॰
स्याद्घृतधेनुर्द्वितीयका॥तिलधेनुस्तृतीयाचचतुर्थीजलधेनुका॥११॥पंच
मीक्षीरधेनुश्चषष्ठीधेनुर्मधुमयी॥सप्तमीशर्कराधेनुरष्टमीदधिधेनुका॥१२॥

ब्रसो. नवमीरसधेनुःस्यात्सर्वकामफलदास्मृता॥दशमीतुसहैववत्सास्यात्स्व
२३६ रूपेणसुंदरी॥१३॥कुंभाःस्युर्द्रव्यधेनूनामितरासांतुराशयः॥कृष्णाजिनंच
तुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि॥१४॥गोमयेनानुलिप्तायांदर्भानास्तीर्यस
र्वतः॥लघ्वैणकाजिनंतद्वत्सस्यतत्रपरिन्यसेत्॥१५॥प्राङ्मुखींकल्पयेद्धे
नुमुदक्पादांसवत्सकां॥उत्तमागुडधेनुःस्यात्सदाभारचतुष्टयात्॥१६
॥वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता॥पंचकृष्णलकोमाषस्ते
सुवर्णस्तुषोडश॥१७॥पलंसुवर्णाश्चत्वारस्तुलापलशतंस्मृतं॥भारःस्तुभ २३६
लाष्टभिःप्रोक्तोद्रोणस्तुलाष्टभिःप्रोक्तोद्रोणस्तुचतुराढकः॥१८॥धेनुवत्सौ
गुडस्योभौसुद्धसूक्ष्मांबरावृतौ॥शुक्तिसंपुटकृत्यादौशुचिमुक्ताफलेक्षणौ

॥१९॥सितसूत्रशिरालौतावृत्तिकंबलकंबलौ॥ताम्रगंडकपृष्ठौतौसितच
मररोमकौ॥२०॥विद्रुमभ्रुमगावेतौनवनीतस्तनान्वितौ॥क्षौमप्रान्तौकामरेह
विंद्रनीलकतारकौ॥२१॥सुवर्णशृंगाभरणौराजतक्षुरसंमतौ॥रचयित्वाय
जेधेनुमिमैर्मंत्रैर्द्विजोत्तमः॥२२॥यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता॥
धेनुरूपेणसादेवीममशांतिंप्रयच्छतु॥२३॥देहस्थायाचरुद्राणींशंकरस्यस
दाप्रिया॥धेनुरूपेणसादेवीममपापंव्यपोहतु॥२४॥विष्णोर्वक्षसियाल
क्ष्मीःस्वाहायाचविभावसौ॥चंद्रार्कतारकाशक्तिर्यासाधेनुस्तुमेश्रिये॥२५॥च
तुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच॥लक्ष्मीर्यालोकपालानांसाधेनुर्वरदा
स्तुमे॥२६॥स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांयतः॥सर्वपापहराधेनुस्त

अ.खं.
२३१

स्याङ्गतिप्रयच्छमे ॥२७॥ एवमामंत्रितांधेनुंब्राह्मणायनिवेदयेत् ॥ समानंसर्व
धेनूनांविधानंचैतदेवहि ॥२८॥ गावोमेचाग्रतःसंतुगावोमेसंतुपृष्ठतः ॥ गावो
मेहृदयेसंतुगवांमध्येवसाम्यहं ॥२९॥ स्वर्णशृंगैःशफैरूप्यैःसुशीलावस्त्रसंयु
ता ॥ कांस्योपदोहादातव्याक्षीरिणीगौःसवत्सका ॥३०॥ स्वनामगोत्रमुच्चार्य
दातार्थिनास्तिवत्तु ॥ पुच्छमादायहस्तेनद्विजहस्तेर्पयेन्मुदा ॥३१॥ सदक्षिणा ॥
दातास्यात्स्वर्गमाप्नोतिवत्सरान्रोमसम्मितान् ॥ कपिलाचेन्नारतिनर्कोत
द्रूपश्चासप्तमंकुलं ॥३२॥ स्वर्णशृंगीरौप्यखुरीकांस्यदोहनिकान्विता ॥ शक्ति २३१
तोदक्षिणायुक्तादत्वास्याद्भुक्तिमुक्तिभाक् ॥३३॥ सवत्सरोमतुल्यानियुगान्यु
भयतोमुखीं ॥ दत्वास्वर्गमवाप्नोतिपूर्वेणविधिनाददन् ॥३४॥ आसान्नमृत्यु

नादेयासवत्सागौस्तुपूर्ववत् ॥ यमद्वारेमहाघोरेकृष्णावैतरणीनदी ॥३४॥ तां
तर्तुंगांदद्यामेनांकृष्णांवैतरणींस्मृतां ॥ धर्मशास्त्रेषुयान्याहुःप्रायश्चित्तानिसू
रयः ॥३५॥ तदर्धंदशधाधेनुर्दातव्याशुद्धिमिच्छता ॥ एकांगांदशगुर्दद्याद्दशदद्या
च्चगोशतं ॥३६॥ शतंसहस्रगुर्दद्यात्सर्वेतुल्यफलाहिते ॥ प्रासादायत्रसौवर्णा
रत्नखचितभित्तयः ॥३७॥ मणिनांदीपकायत्रगोदातारोव्रजंतितत्र ॥ गोलो
केपुण्यनिलयेसर्वबाधाविवर्जिते ॥३८॥ अन्यान्यपिपिचदानानिवदिष्येतव
दयतः ॥ यत्कृत्वासर्वपापेभ्योमुच्यतेमनुजःक्षणात् ॥३९॥ महिष्यादानमतुलं
सर्वसौभाग्यदायकं ॥ हस्तेधृत्वाविशाणंचइमंमंत्रमुदीरयेत् ॥४०॥ धर्मरा
जस्यसाहाय्येयस्याःपुत्रप्रतिष्ठितः ॥ महिषासुरस्यजननीयासास्तुवरदामम ॥

ब्रसो॰ म॥४१॥महिष्याःसर्वसौभाग्यंवृषदानाद्दिवंव्रजेत्॥दशानांकपिलानांतुदत्वा
२३८ नांज्येष्ठपुष्करे॥४२॥तत्फलंसमवाप्नोतिवृषभस्यतुमोक्षणात्॥धर्मोसित्वंचच
तुःपादसर्वकामदुघोद्भव॥४३॥नमोब्रह्मण्यदेवेशपितृभूतादिपोषक॥त्वयि
मुक्तेस्त्वयालोकाममसंतुनिरामयाः॥अंकयेच्चत्रिशूलाभ्यांमंत्रेणानेनचोत्सृ
जेत्॥एकादशाहेप्रेतस्यतत्रचोत्सृज्यतेवृषः॥४४॥मुच्यतेप्रेतलोकाच्चष
ण्मासेचाब्दिकादिषु॥दशहस्तेनदंडेनत्रिंशादंडान्निवर्तनं॥४५॥तान्येवद
शविस्ताराक्षेत्रंचमैतत्स्मृदोद्यभित्॥भूहिरण्यस्तुसंयुक्तंकृष्णाजिनंतुयोर्प्पयेत् २३९
॥४७॥सर्वदुःकृतकर्मापिसायुज्यंब्रह्मणोव्रजेत्॥शय्यांदत्वातुसगुणांभुक्ति
मुक्तिमवाप्नुयात्॥४८॥विपुलांतुगृहंदत्वापृथ्वींवागृहसंमितं॥ब्रह्मलोकेव

सेत्सोपिब्रह्मणासहमोदते॥४९॥कदलीक्षुगुडादीनांरचयित्वाशुभांगृहं॥भू
मिमूर्तिसमायुक्तांददातिसोपिमुक्तिभाक्॥५०॥पंचाशत्पलसंयुक्तंलोहदंडं
तुयोर्प्पयेत्॥वस्त्रेणाछाद्यविप्राययमदंडोनविद्यते॥५१॥मूलंफलादिवाद्
व्यंसंहतंचार्थचैकतः॥मृत्युंजयंसमुद्दिश्यदद्यादायुर्विवर्द्धये॥५२॥पुमान्
कृष्णतिलैःकार्योरूप्यदंडःसुवर्णदृक्॥खड्गोद्यतकरोदीर्घोजपाकुसुममंडन
॥५३॥रक्तांबरधरःस्रग्वीचांखमालाविभूषितः॥उपानद्युगयुक्तांघ्रिःकृष्णकंब
लपार्श्वगः॥५४॥गृहीतमांसपिंडश्चवामेवैकालपूरुषः॥संपूजतंचगंधाद्यैर्ब्रा
ह्मणायोपपादयेत्॥५५॥मरणव्याधिहीनस्यात्राजराजेश्वरोभवेत्॥गोवृषौ
तुद्विजंदत्वाभुक्तिमुक्तिमवाप्नुयात्॥५६॥सर्वान्कामान्वाप्नोतियःप्रयतिकांच

नी॥सुवर्णेदीयमानेतुरजतंदक्षिणेष्यते॥५७॥अन्येषामपिदानानांसुवर्णंद
क्षिणेष्यते॥सुवर्णंरजतंताम्रंतंदुलाधान्यमेवच॥५८॥नित्यश्राद्धंदेवपूजासर्व
मेतदक्षिणं॥रजतंदक्षिणापित्र्येधर्मकामार्थसाधनं॥५९॥सुवर्णंरजतंताम्रंम
णिमुक्तावसूनिच॥सर्वमेतन्महाप्राज्ञोददातिवसुधांददन्॥६०॥पितरश्चपितृलो
कान्स्वान्देवस्थानेचदेवताः॥संतर्पयन्तिरां॥तात्मायोददातिवसुंधरां॥६१॥ख
र्वटंखेटकंवापिग्रामंवासस्यशालिवा॥निर्वर्तनशतंवापितदर्द्धंवागृहादिकं
॥६२॥अपिगोचर्ममात्रंचदत्वोर्विस्वर्गभाक्भवेत्॥तैलबिंदुर्यथातोयमुपसर्
पेत्तथैवहि॥६३॥सर्वेषामेवदानानामेकजन्मानुगंफलं॥हाटकक्षितिगौरीणां
सप्तजन्मानुगंफलं॥६४॥त्रिःसप्तकुलसंयुक्तःकन्यादोब्रह्मलोकभाक्॥गजं

सदक्षिणंदत्वाचैंद्रेणसहमोदते॥६५॥अश्वंदत्वावरारोग्यसौभाग्यंस्वर्गमाप्नुया
त्॥दासींदत्वाद्विजेंद्रायअप्सरोलोकमाप्नुयात्॥६६॥दत्वाताम्रमयींस्थालींप
लानांपंचभिःशतैः॥अर्द्धैस्तदर्द्धमर्द्धैर्वाभुक्तिमुक्तिमवाप्नुयात्॥६७॥शाकटंवृ
षसंयुक्तंदत्वादानेननाकभाक्॥दंतदानाक्षणोदायुरारोग्यंस्वर्गमक्षयं॥६८॥
धान्यगोधूमकलमयवादीन्स्वर्गभाक्भवेत्॥आसनंतैजसंपात्रंलवणंगं
धचंदनं॥६९॥धूपंदीपंचतांबूलंलोहंरौप्यंचरत्नकं॥विद्यादानानिद्रव्याणि
दत्वास्यान्मुक्तिभुक्तिभाक्॥७०॥तिलांश्चतिलपात्रंचदत्वास्वर्गमवाप्नुयात्॥
अन्नदानात्परंनास्तिनाभूतंनभविष्यति॥७१॥हस्त्यश्वरथदानानिदासीदास
गृहाणिच॥अन्नदानस्यसर्वाणिकलांनार्हंतिषोडशीं॥७२॥कृत्वापिसुमहाघो

ब्र.खं. रंपापंयोद्यंनदोभवेत्॥सर्वपापविनिर्मुक्तोलोकेकानाप्नोतिचाक्षयान्॥अ
२४० पानीयस्यप्रपांदत्वाभुक्तिमुक्तिमवाप्नुयात्॥घृतंतैलंचलवणंदत्वात्सर्वम
वाप्नुयात्॥७३॥छत्रोपानहकाष्टानिदत्वासौख्यमवाप्नुयात्॥प्रतिपन्नंति
थिमुख्येषुविष्कुंभादिषुवाथवा॥७४॥चैत्रादौवत्सरादौचअश्विन्यादौहरिंहर
॥ब्रह्मादीन्लोकपालादीन्प्रार्थ्यदानंमहाफलं॥७५॥त्रीणितुल्यफलान्याहगावः
पृथ्वीसरस्वती॥ब्राह्मींसरस्वतींदत्वानिर्मलोब्रह्मलोकभाक्॥७६॥सप्तद्वीप
महीदःस्याद्ब्रह्मज्ञानंददातियः॥अभयंसर्वभूतेभ्योसदद्यात्सर्वभाग्भवेत्॥७७॥ २४०
पुराणंभारतंवापिरामायणमथापिवा॥लिखित्वापुस्तकंदद्याद्भुक्तिमुक्तिमुक्ति
मवाप्नुयात्॥७८॥वेदशास्त्रंनृत्यगीतंयोध्यापयतिनाकभाक्॥वृत्तिंदद्यादुपा

ध्यायेच्छात्राणांभोजनादिकं॥७९॥कुलंतारयतेतेषांदशपूर्वान्दशापरान्॥कु
र्वीतिष्ठतियस्यान्नंविद्याभ्यासेनजीर्यते॥८०॥एकविंशत्कुलंतस्यतरंत्येवन
संशयः॥किमदत्तंभवेत्तेनधर्मकामार्थदर्शिना॥८१॥वाजपेयसहस्रस्यसम्यग्द
त्तस्ययत्फलं॥तत्फलंसमवाप्नोतिविद्यादानान्नसंशयः॥८२॥शिवालयेविष्णु
गृहेसूर्यस्यभवनेतथा॥सर्वदानप्रदःस्यात्पुस्तकंचार्पयेत्तुयः॥८३॥त्रैलोक्येच
तुरोवर्णाश्चत्वारश्चाश्रमाःपृथक्॥ब्रह्माद्यादेवताःसर्वेविद्यादानेप्रतिष्ठिताः॥८४॥
विद्याकामदुघाधेनुर्विद्याचक्षुरनुत्तमं॥उपवेदप्रदानेनगंधर्वैःसहमोदते
॥८५॥वेदांगानांचदानेनशक्रलोकमवाप्नुयात्॥धर्मशास्त्रप्रदानेनधर्मेणस
मोदते॥८६॥सिद्धान्तानांप्रदानेनमोक्षमाप्नोत्यसंशयं॥विद्यादानीह्यवाप्नोतिप्र

ब्रखो॰ दानीपुस्तकस्यच॥८७॥शास्त्राणीचपुराणानिदत्वामोक्षमवाप्नुयात्॥द्रव्येसति
२४१ नयोदद्याद्विषयीनरकंव्रजेत्॥८८॥सिक्षांचसिक्षयेद्यस्तुपुंडरीकफलंलभेत्॥येर
मजीवतितद्दत्वाफलस्यांतोनतस्यवै॥८९॥लोकेश्रेष्टतमंसर्वमात्मानश्चापियत्प्रि
यं॥तद्दत्वापरलोकेवैगत्वाप्नोतिनरोह्यसौ॥९०॥विष्णुरुद्रपद्मयोनिंदेवंविघ्नेश्व
रादिकम्॥पूजयित्वाप्रदद्याद्यःसर्वोपस्करसंयुतः॥९१॥शंखंघंटांताम्रपात्रमभि
धा षेकसमंत्रकं॥सिंहासनंतथाछत्रंपताकाव्यंजनानिच॥९२॥धूपपात्रंदीपपात्रं
नैवेद्यस्यचपात्रकं॥आरात्रिकंतथापात्रंमालामाचमनीयकं॥९३॥संपुटद्वं २५१
यसंयुक्तंतथालंकारसंयुतं॥आषोडशादिनपर्यंतंसदन्नंसघृतादिकं॥९४॥दे
वामेप्रियतांसद्यःइत्युक्त्वार्घेनअर्पयेत्॥यस्यदेवेपराभक्तिस्तस्मैतंदेवमर्प्पयेत्॥

९४॥अन्यथानिष्फलंदातुर्देवतानांचहेलनात्॥तस्मात्सतामनुद्दिश्यपंचायत
नमुत्तमं॥९५॥धर्मार्थकाममोक्षाणांविनियोगात्समर्पयेत्॥यद्यच्छ्रेष्टतमंलो
केतद्दानात्प्राप्नुयान्नरः॥९६॥अनादाविहसंसारेदुर्वारेमकरध्वजे॥कुलेचका
मिनीमूलेसद्बुद्धिप्रदईश्वरः॥९७॥तस्मात्सर्वप्रयत्नेननस्थेयंदानवर्जितं॥दुः
खेनप्राप्यतेद्रव्यंतद्रव्यंचार्थिसात्कृतं॥९८॥कष्टात्कष्टतरेकालेस्वयमेवोपतिष्ठ
ते॥यत्रयत्रगतोजंतुःपुण्यंतदनुगच्छति॥९९॥यथाधेनुसहस्रेषुवत्सोवे
त्तिमातरं॥दातारंहितथापुण्यमन्वेषतिनसंशयः॥१००॥देवतायतनंसम्यक्
सुधेनैवविनिर्मितं॥देवंसंस्थाप्यतत्रैववेदशास्त्रविधानतः॥१॥ब्राह्मणा
न्भोजयेद्यस्तुतत्पुण्यंतोनविद्यते॥देवानांपंचप्रतिमाःकारयन्सर्वमाप्नु

ब्रसो· पात्॥२॥गणेशेभ्यापितेसर्वेदेवायांतिप्रसन्नतां॥तस्मादादौगणेशस्यस्थाप
२४२ नंश्रेष्ठमीरितं॥३॥रवेस्तुस्थापनात्तुभर्गशस्थापना॥४॥च्छिवा॥विष्णोश्चस्थापना
द्वैधावेधातुद्विज॰रूपभाक्॥४॥सर्वेषास्थापनंमंबादेव्याःस्थापनतःशि
वः॥शिवस्यस्थापनंदेवैःसाकंप्रीतःसदाशिवः॥५॥देवालयेनरोगत्वास्तंमा
र्ज्जयतिनित्यशः॥यमोपिकुरुतेनित्यंतत्पापानांसुमार्जनं॥६॥भग्नदेवाल
यस्यैवजीर्णोद्धारंकरोतियः॥पूर्ववत्फलमाप्नोतिकोटियज्ञसमुद्भवं॥७॥वि २४२
प्रालयंयःकुरुतेस्वहस्तपरहस्ततः॥सर्वदेवालयंपुण्यंसःप्राप्नोतिनसंशयः
॥८॥दैवाधीनंजगत्सर्वंमंत्राधीनाश्चदेवताः॥तेमंत्राब्राह्मणाधीनास्तस्मा
द्देवोहिसद्द्विजः॥९॥पंचतीर्थानिवर्त्तंतेब्राह्मणस्यकरेसदा॥कराग्रेदेवतीर्थंतु

मणिबंधेतुब्राह्मणं॥१०॥तर्ज्जन्यंगुष्ठयोर्मध्येपित्र्यंतीर्थमुदाहृतं॥प्रतिग्रहानबा
धंतेवह्नितीर्थप्रभावतः॥११॥पातकंभस्मसात्कृत्वादातापुण्येनयुज्यते॥तस्माद्वि
प्रसमंनास्तिदानपात्रंमहीतले॥१२॥ब्राह्मणोपिसविज्ञेयोयःतुशंकरमर्चकः॥
शिवरूपतयासर्वान्देवान्यजतिसादरं॥१३॥अविद्योवासविद्योवाब्राह्मणोमा
मकीतनुः॥एतद्बुद्ध्वावतांपुंसांकिंफलंब्राह्मणस्यतत्॥१४॥श्रद्धापात्रात्समुद्ध
त्यसत्फलंदातरिन्यसेत्॥पुण्यरिक्तंभवेत्पात्रंचेत्स्याद्देदविवर्ज्जितं॥१५॥त
स्माद्बुद्ध्वापुरस्कृत्ययत्किंचित्कुरुतेनरः॥गंधंपुष्पंधूपदीपंनैवेद्यंचप्रदक्षिणं
॥१६॥घंटाध्वजंवितानंचप्रेक्षणंवाद्यगीतकं॥वस्त्रादिदत्वादेवायभुक्तिमुक्ति
मवाप्नुयात्॥१७॥कस्तूरिकांसिंदूरकंचश्रीखंडमगरुंतथा॥कर्पूरंचतथामु

श्रस्तो· स्तंत्वरुद्रं विजयं ददेत् ॥१७॥ घृतःप्रस्थेन संस्नाप्य तथा घटशतेन च ॥ स्नानं पंजज्ञ
२४३ तं ज्ञेयमत्यंगं पंचविंशति ॥१८॥ पलानां तु सहस्रेण महास्नानं प्रकीर्त्तितं ॥ द
शापराधांस्तोयेन क्षीरेण स्नपनाच्छतं ॥१९॥ सहस्रं पयसा दध्ना घृतेनायुतमु
च्यते ॥ दासीदासगृहारामा गोभूम्यश्वगजादिकं ॥२०॥ देवाय दत्वा सौभाग्यं धु
नायुष्मान् व्रजेत्परं ॥ निःकामान्मुक्तिमाप्नोति सकामः पुनरावृजेत् ॥२१॥ कामा
न्निःकामतो वापि यो जपेल्लिवचक्रिणो ॥ तयोः स्थानमवाप्नोति शैवं वा वैष्णवं ज
नः ॥२२॥ भोजनाच्छादनं छत्रं जलपात्रमुपानहौ ॥ पादुके व्यजनं चारु शय्यां सो· २४३
पस्करां तथा ॥२३॥ सप्तधान्यं तथा क्षीरं शाकं लवणतैलके ॥ कदलीदाडिमादिनी
स्वादुवंति फलानि च ॥२४॥ यत्किंचिद्दुर्लभं वस्तु दूरदेशात्समागतं ॥ आदावेव द्वि

जातिभ्यः समादायार्पयेन्मुदा ॥२५॥ स्वल्पव्ययान्महत्पुण्यं श्रद्धया जायते नृ
णां ॥ सत्कथाश्रवणेनैव श्रद्धा भवति शूलिनी ॥२६॥ शूलिनः कृपया नृणां दाने प्री
तिः प्रजायते ॥ दानेन पापहानिः स्यात्ततः पुण्योदयो भवेत् ॥२७॥ पुण्योदयादात्म
शुद्धिस्तया शिवरतिर्भवेत् ॥ तया ध्यानगतः शंभुरंते मुक्तिप्रदो भवेत् ॥२८॥ यु
त्रमुक्तौ न वा शोकः पुनरावर्त्तिसंज्ञितः ॥ महानंदघनांभोधौ लयेन तन्मयो
रमेत् ॥२९॥ स्त्रीपुंषंढभिदा यत्र न च माया बलं तथा ॥ न च कालजवो यत्र त
त्राप्तिः शिवसेवनात् ॥३०॥ शिवः कल्याणरूपोस्ति निर्गुणो मायिनां प्रभुः ॥ अजो
पि सन्नव्ययात्मा चिद्घनः प्रेयसां प्रियः ॥३१॥ स्वेच्छया त्तवपुः पुंसां भजतामनुरा
गिणां ॥ अनुग्रहाय साधूनामसतामभवाय च ॥३२॥ याथात्म्यं तस्य को वेद परे

ब्र.सो. शस्यपरात्मनः॥ॐनमःशंभवायेतिवेदोप्युक्तानतिंगतः॥३३॥कालकर्मगुण
२४६ दीनांनियंतामाययापृथक्॥आसतांभातिविश्वात्मागुणात्मेत्यनिदंविदां॥३४
दशास्वपिपुराणेषुयस्यकीर्त्तिर्विराजते॥चतुर्ष्वपिचवेदेषुशिवएवामृतंविदां॥
३५॥शिवोगुरुःशिवोदाताभोक्ताशंभुःपरायणं॥मायामृगीनर्त्तकोयंशिवएव
सनातनः॥३६॥तस्माच्छिवपरंसर्वंयज्ञदानादिकर्मच॥तत्सर्वंशंभुसात्कृत्वा
मोदयंतीमृषीश्वराः॥३७॥ज्ञानावधिचकर्म्माणिकर्त्तव्यानीतिसर्वशः॥तन्म
ध्येव्यत्ययःस्याच्चेत्प्रायश्चित्तेनयुज्यते॥३८॥प्रायश्चित्तेकृतंकर्मविषमंसम २४६
तांव्रजेत्॥तस्मात्सर्वात्मनाकार्यंप्रायश्चित्तंशुभेप्सुभिः॥३९॥प्रायःश्चित्तोति
यःपुण्यंप्रायःश्चित्तंतदुच्यते॥पापाच्चवतिपुण्येनयुज्यतेयेनकर्मणा॥४०॥

प्रायश्चित्तंतदेवाहुरपरेशुद्धिमात्मनः॥प्रायश्चित्तविधिंविप्रावक्ष्यमाणंनिबोध
त॥४१॥नारदायचयत्प्रोक्तंपुरावैपद्मयोनिना॥भास्वतापिचयत्प्रोक्तमरुप
णायानुपृच्छते॥४२॥इमंदानविधिंकृत्वायःकरोतिमहादरात्॥स्वल्पंतदक्षयं
यातिविघ्नग्राहयविवर्जितं॥४३॥यस्यवैयादृशंपुंसोऽव्यसामर्थ्यमुच्यते॥ते
नतत्सदृशंकार्यमन्यथादेववंचनं॥४४॥शिवोजानातितत्सर्वंमाब्रह्मस्तंबकं
गंजगत्॥हृदयस्थोमहादेवउमयासहईश्वरः॥४५॥नपुत्रदारानकुलंनदे
होगेहंतथावैभवएनमव्यात्॥कंगावरोधेकफवातपित्तैर्दानेनशंभोःस्मर
रणंनृणांस्यात्॥४६॥यःशृणोतिसततंशिवनामप्रेमगद्गदतेयः॥योनुमोद
तिनरोनरकंतेनैवयांतिकिलपातकिनोपि॥४७॥विपलंपलमेकमेववाघ

ब्रसो॰ ष्टिटिकामात्रंतथाथवासदा॥ शिवशंकरवामदेवनामवचनंयतब्रुवतेसमु॰
२४५ क्तिभाक्॥४८॥ दानाध्यायंयःश्रृणोतिप्रतीतःपुण्यात्मासौशंकरेन्यस्तचेताः॥
लोकेकीर्त्तिंभक्तिमीशेसुभायुःसंप्राप्यैवंमुक्तिमंतेव्रजेत्सः॥४९॥ ॥इतिश्रीस्कं
दपुराणेब्रह्मोत्तरखंडेषोडशदानादिनिरूपणेषट्त्रिंशोध्यायः॥३६॥ ॥सू
तउवाच॥ ॥महाषोडशदानेषुविश्वचक्रंतदुच्यते॥ विश्वचक्रस्यदानंतुनृपः
कुर्यान्नचेतरः॥१॥ नाडीचक्रस्यदानंतुयोगीकुर्यान्नचापरः॥ ॥नाडीचक्रस्य २४५
दानंतुद्विविधंप्रोच्यतेबुधैः॥ अष्टसिद्धिप्रदंचैकमपरंमुक्तिदंशिवे॥२॥ जी
वमोक्षात्परंदानंनास्तीतित्रिभुवनत्रये॥ गुरोःकृपाभवेद्यस्ययस्येंद्रियगणोव
शः॥३॥ नाडीचक्रंजगत्पूज्यंप्राप्यतेतेनधर्मिणा॥ द्रव्येणविश्वचक्रंस्याद्योग

श्रो॰

भ्यासेनचापरं॥४॥ ॥ऋषयऊचुः॥ ॥एतत्तुदुर्लभंप्रोक्तंनाडीचक्रंपुराणवित्॥ भू
यःकथयनोनाडीचक्रदानंगुरुंतथा॥५॥ अपूर्ववदसेसूतप्रतिवाक्यरसायनं
॥ त्वंजीवशरदांसाधोशतानिबहुशःसुखं॥६॥ ॥सूतउवाच॥ ॥नाडीचक्रंप्रव
क्ष्यामियद्ज्ञानाज्जायतेशिवः॥ नाभेरधस्ताद्यस्कंदोयंकुरास्तत्रनिर्गताः॥७॥
७२०० द्वासप्ततिसहस्राणिनाभिमध्येव्यवस्थिता॥ तीर्यगूर्ध्वमधश्चैवव्याप्तंताभिः
समंततः॥८॥ चक्रवत्संस्थिताह्येताःप्रधानादशनाडयः॥ इडाचपिंगलाः
चैवसुषुम्णाचतथैवहि॥९॥ गांधारीहस्तिनीजिह्वापूषाचैवयथातथा॥ अ
लंबुषाकुहूश्चैवशंखिनीदशमीस्मृता॥१०॥ दशप्राणवहाह्येतानाडयःप
रिकीर्त्तिताः॥ प्राणोपानसमानश्चउदानोव्यानएवच॥११॥ नागःकुर्मोथक

कलोदेवदत्तोधनंजयः॥प्राणस्यप्रथमोवायुर्दशानामपिसत्तमः॥१२॥र
प्राणःप्राणयतेप्राणंविशन्नापूरणंप्रति॥नित्यमापूरयत्येषदेहिनामुरसि
स्थितः॥१३॥निश्वासोच्छ्वासकासैस्तुजीवनोनाममारुतः॥अधोगमनवान्ना
मापानोदुर्गंधिहारकः॥१४॥सर्वनाडीमधःप्रोक्तोमरणाद्दिविभागवान्॥अस्यं
द्यतधरंचक्रंनेत्रभागप्रकोपनं॥१४॥उद्वेजयतिकर्माणिउदानोनाममा
रुतः॥प्रतिदानंतथाकंगाध्यायताध्यानउच्यते॥१५॥समानंकुरुतेभक्ष्यम
न्नादिसमानकः॥शरीरस्याइमेपंचक्षुत्तृड्धर्माश्चरंतिहि॥१६॥उद्गारेनाग
इत्युक्तःकूर्मश्चोन्मीजनेस्थितः॥कृकलोभक्षणेप्रोक्तःदेवदत्तोविजृंभणे॥१७
धमैनंजयःस्थितोघोषेमृतंत्वहंनमुंचति॥नामांतरंप्रयात्येवंप्राणादिपंच

कंक्रमात्॥१८॥जीवःप्रयातिदशधानाडीचक्रंहितेनतत्॥संक्रांतिविषुवेचैव
अहोरात्रायनानिच॥१९॥अधिवासमृणंचैवउनरात्रंबलंतथा॥ऊनरात्रंभवे
द्धिक्काअधिवासोविजृंभिका॥२०॥ऋणंचात्रभवेत्कासोनिश्वासोबलमुच्यते॥उ
त्तरंदक्षिणंज्ञेयंवामंदक्षिणसंज्ञिकं॥२१॥मध्येतुविषुवंप्रोक्तंपुटद्वयविनिःसृतं
॥संक्रांतिपुनरस्यैवस्वस्थानयोगतः॥२२॥सुषुम्णामध्यमेह्यंगेइडावामेप्रति
ष्ठिता॥पिंगलादक्षिणेविप्राउर्ध्वप्राणोह्वहःस्मृतः॥२३॥अपानोऊंजनरात्रंस्यादे
कास्त्वर्गसार्थकः॥आयामोदेहमध्यस्थःसोमग्रहाणमिष्यते॥२४॥देहातीतत्र
मायाममादित्यभ्रमणंविदुः॥उदरंपूरयेत्तावद्वायुनायावदीप्सितं॥२५॥प्राणाय
मोभवेदेत्रापूरकोदेहपूरकः॥पिधायसर्वद्वाराणिनिश्वासस्वाससवर्जितः॥२६॥

ब्रह्मो. संपूर्णकुंभवन्निरुध्येत्प्राणायामःसकुंभकः॥मुंचेद्वायुंततस्तूर्ध्वंश्वासेचैकेनमंत्रवि
२४७ त्॥२७॥उत्क्रामयोगयुक्तस्तुवायुमूर्ध्वंविरेचयेत्॥उच्चरंतिस्वयंयस्मात्स्वदेहावस २१६००
स्थितःशिवः॥२८॥तस्मात्तत्त्वविदांचैवसएवजपउच्यते॥अयुतेद्वेसहस्रैकंत्राता
निषट्तथैवच॥अहोरात्रेणयोगीद्रोजपसंख्यांकरोतिसः॥२९॥अजपानामसं
गायत्रीब्रह्मविष्णुमहेश्वरी॥अजपांजपतेयस्तुपुनर्जन्मनविद्यते॥३०॥चं
द्राग्निरविसंयुक्ताआद्याकुंडलिनीमता॥हृत्प्रदेशेतुसाज्ञेयाअंकुराकारसं २४१
स्थिता॥३१॥सृष्टिन्यासोभवेत्तत्रसर्वैःस्वर्गावलंबनात्॥स्वंवंतंच्चिंतयेत्तत्र
त्रसर्वैःस्वर्गावलंबनात्॥स्वंवंतंच्चिंतयेत्तस्मैन्नमृतंदैत्रिकोत्तमः॥३३॥देह
स्थःसकलोज्ञेयोनिष्कलोदेहवर्जितः॥हंसहंसेतियोब्रूयाद्धंसोदेवःसदा

शिवः॥३४॥तिलेषुचयथातैलंपुष्पेगंधोयथास्थितः॥पुरुषस्यतथादेहेसबा
ह्याभ्यंतरंप्रभुः॥३५॥ब्रह्मणोहृदयेस्थानंकंठेविष्णुःसमाश्रितः॥भ्रातुर्मध्येस्थि
तोरुद्रोललाटेचमहेश्वरः॥३६॥प्राणाग्रेतुशिवंविद्यात्तस्यांतेतुपरात्परः॥पं
चधासकलःप्रोक्तोविपरीतस्तुनिष्कलः॥३७॥षण्मासात्सिद्धिमाप्नोतियोगयु
क्तोनसंशयः॥गमागमस्यज्ञानेनसर्वपापक्षयोभवेत्॥३८॥देवस्यदक्षि
णांमूर्तिंपंचलक्षंस्थितोजपन्॥जपांतेघृतहोमस्तुदशसहस्त्रिकोभवेत्॥३९॥
एवमाप्यायितोमंत्रोवश्योच्चाटादिकारयेत्॥ऊर्ध्वंशून्यमधःशून्यंमध्येशू
न्यंनिरामयं॥४०॥त्रिशून्यंयोभिजानातिमुच्यतेसध्रुवंद्विजः॥प्रसादंयोन
जानातिपंचमंचमहातरुः॥४१॥अष्टत्रिंशत्कलायुक्तंनसआचार्यउच्यते॥त

योंकारंचगायत्रीरुद्रादीन्वेत्तिसोगुरुः॥४३॥एवंविधेनगुरुणानाडीचक्रंप्र
दीयते॥तदाशिष्यस्यद्विविधाभुक्तिमुक्तिःकरेःस्थित॥४४॥नाडीचक्रंमहा
दानंदानानामुत्तमोत्तमं॥योददातिविनीतायसयातिपरमंमहः॥४५॥योद
दातिसुशिष्यायगायत्रींवेदमातरं॥वैदिकेनविधानेनदशांशःप्राप्नुयात्फलं
॥४६॥अंतेष्टिंव्रतबंधादिमंत्रहीनंकरोतियः॥लोभेननरकंयांतिजीवन्वै
ब्रह्महाभवेत्॥४७॥प्रणवःसर्ववेदानामादिकारणमुच्यते॥प्रणवेनवि
नामंत्रोनसिध्यतिकदाचन॥४८॥प्रणवंयोभिजानातिसयोगीःसहरीःपु
मान्॥ॐकारमभ्यसेत्तस्मान्मंत्रसारंचसर्वदं॥४९॥सर्वमंत्रप्रयोगेषुप्रण
वःप्रथमःस्मृतः॥तेनसंपरिपूर्णंयत्तत्पूर्णंकमनेतरत्॥५०॥ॐकारपूर्विका

स्तिस्रोमहाव्याहृतयोमलाः॥त्रिःपदाचैवसावित्रीविज्ञेयंब्रह्मणोमुखं॥५१॥यो
धीतेहन्यहन्येतांत्रिणिवर्षाण्यतंद्रितः॥सब्रह्मपरमभ्येतियदिस्याद्विजितेंद्रि
यः॥५२॥वाचामसंयमाद्विप्रोनिंदावांजायतेस्फुटं॥लिंगस्याविजयाद्योगीभ्र
ष्टोभवतिचांत्यजः॥५३॥रसास्वादेनरोगीस्याल्लब्धास्वादेनुलोलुपः॥त्वचास्व
देनमूढःस्यात्तस्मात्स्याद्विजितेंद्रियः॥५४॥मनोविजयतस्तस्यनिःफलाजाय
तेतुसः॥बुद्धेश्चाविजयेनैवब्रह्मज्ञानंनजायते॥५५॥शीघ्रपाठेनविकलोजाय
तेनात्रसंशयः॥स्वरहीनंपठेद्यस्तुकिंचित्फलमवाप्नुयात्॥५६॥गायत्रीनिःश
फलाप्रोक्ताशूद्रान्नैरनुजीवतः॥एकादशादिभुग्विप्रोनिःफलांकुरुतेसतीं॥
५७॥नवमादिमहादोषास्तेयदावेष्टितोद्विजः॥२॥पंदातुंससमुद्युक्तस्तेनकिंचि

ब्रह्मो. न्नसाध्यते॥५८॥शापोनिःफलतांयातिक्रोधमात्रंविशिष्यते॥तस्मात्सर्वप्रय
२४९ त्नेनसावित्रींप्रजपेत्सदा॥५९॥यस्याउच्चारमात्रेणत्रैलोक्यंवशमानयत्॥गा
यत्र्यास्तुप्रभावेनविश्वामित्रेणधीमता॥६०॥चतुर्दिक्षुश्चतुर्लक्षवर्षाणिवि
हितंतपः॥तदास्रष्टेहिसामर्थ्यंविश्वामित्रेसमभ्यगात्॥६१॥किंपुनःक्षुद्रका
र्येषुप्रयुक्तासफलाभवेत्॥एकाक्षरंपरंब्रह्मप्राणायामःपरंतपः॥६२॥सा
वित्र्यास्तुपरंनास्तिमौनात्सत्यंनविद्यते॥सप्तावर्त्तापापहरादशभिःप्रापये
द्दिवं॥६३॥विंशावर्त्तातुसादेवीनयतेहीश्वरालयं॥अष्टोत्तरंशतंजप्त्वातीर्णःसं २४९
सारसागरात्॥६४॥नगायत्र्याःसमंजाप्यंनव्याहृतिसमंतपः॥गायत्र्यापादम
प्यर्द्धंऋगर्द्धमृचमेवच॥६५॥ब्रह्महत्यासुरापानंसुवर्णस्तेयमेवच॥गुरुदारा

गमंचैवजप्येनैवप्रणश्यति॥६६॥गोघ्नःपितृघ्नोमातृघ्नोब्रह्महागुरुतल्पगः॥कृ
तघ्नःस्वर्णहारीचसुरापोलक्षजाप्यतः॥६७॥शुध्यतेनात्रसंदेहःपुरश्चरणतोद्वि
जाः॥शतंजप्त्वातुगायत्रीपापोपशमनीस्मृता॥६८॥सहस्रंजप्त्वागायत्रीह्युप
पातकनाशनी॥अभिदाकोटिजाप्येतद्देवत्वंप्रापयेत्तुसा॥६९॥ॐकारंपूर्वमुच्चा
र्यभूर्भुवःस्वस्ततःपरं॥गायत्रीप्रणवंचांतेजपेच्चैवमुदाहृतं॥७०॥विश्वामित्र
ऋषिश्छंदोगायत्रीसवितातथा॥देवतोप—येजाप्यविनियोगस्तुतेतथा॥७०॥
गायत्र्यास्तुतिलैर्होमःसर्वपापप्रणाशनः॥शांतिकामोयवैःकुर्यादायुःकामो
घृतेनतु॥७१॥सिद्धार्थकैःकर्मसिध्यैपयसाब्रह्मवर्चसी॥पुत्रकामस्तथादध्ना
धान्यकामस्तुशालिभिः॥७२॥क्षीणवृत्तिःशमीभिस्तुग्रहपीडोपशांतये॥धनका

ब्र॰सो॰ मस्तथाबिल्वैःश्रीकामःकमलैस्तथा॥७३॥आरोग्यकामोदुर्वाभिःस्त्रीकृतातेस्तए
२५० वहि॥सौभाग्येपसुगुग्गुनाविद्यार्थिपायसेनच॥७४॥अयुतेनोक्तसिद्धिस्याल्लक्षेण
मनसेप्सितं॥कोट्याब्रह्मवधान्मुक्तःकुलोद्धारीहरीर्भवेत्॥७५॥यद्वयज्ञमखो
वापिहोमायुतमखोघहत्॥किमत्रबहुनोक्तेनगायत्रीदैवतंपरं॥७६॥गायं
त्त्रायतेयस्माद्गायत्रीतेनचोच्यते॥प्रभातेब्रह्मरूपासामध्याह्नेशिवरूपि
णी॥७७॥सायंचवैष्णवीप्रोक्तात्रिकलाब्रह्मरूपिणी॥प्रकाशनात्मासावितुर्वाग्रू
पंवाकसरस्वती॥७८॥तज्ज्ञातीःपरमंब्रह्मभर्गःस्तेजोयतःस्मृतं॥भगस्यभ्राज २५०
तइतिबुहल्लंदसीरितं॥७९॥वरेण्यंसर्वलोकेभ्यस्तस्मात्सर्वैश्चधीमहि॥यस्मध्या
नप्रभावेनधियोयोनःप्रचोदयात्॥८०॥भर्गशब्देनगायत्र्याःसामर्थ्येसर्वदेरितं

॥भर्गःसदाशिवःसाक्षात्तेनसंजीवितोमनुः॥८१॥गायत्र्याचयदातप्तंतपोतप्त
मदारुणं॥प्रसन्नःशंकरस्तेनदत्तौभर्गपदंतदा॥८२॥गायत्रीभर्गशब्देनयोजि
ताबलवत्तरा॥बभूवसर्वदेवानामृषीणांवंदितातथा॥८३॥ऋषयऊचुः॥क
दातप्तंतपोघोरंगायत्र्याःशिवतुष्टये॥एतन्नःश्रोतुकामानांकथयस्वादरान्
सुत॥८४॥गायत्रीवेदमातासाश्रेष्टासर्वोत्तमोत्तमा॥तपःशंकरतुष्ट्यर्थंकिमर्थं
कृतवत्यसौ॥८५॥एवंतदाश्चर्यकृत्सूतअपूर्वंभाषसेनघ॥यास्वयंवेदमाता
सातत्तःश्रेष्टतरानुका॥८६॥॥सूतउवाच॥॥रहस्यंपरमंह्येतदवाच्यमपिकथ्य
ते॥श्रोतव्यंसाधुभिर्विश्वसावधानेनचेतसा॥८७॥मयाव्याससमुखात्पूर्वंश्रुतम
स्तितदेवहि॥सर्वंवःश्रावयिष्यामिगायत्र्यायत्कृतंतपः॥८८॥पूर्वंसत्ययुगेदि

ब्रह्मो० नागायत्रीवेदसूरपि॥निर्गताब्रह्मणोवक्त्रात्पद्मपत्रनिभेक्षणा॥८९॥कियत्कालंवे
२५१ दमध्येस्थिताःज्ञातानकैरपि॥कदाचिद्दैवयोगेनकेनचिज्ज्ञप्तुमादृता॥९०॥नत
स्मैफलसामर्थ्यंदातुंयोग्याभवद्यदा॥तदासौचिंतयामाससमनसाविजनेस्थिता॥९१
सामर्थ्यममनस्याद्वैत्परेषांपापनाशने॥तदामदीयंनामैतत्सार्थकंजायतेकथं॥९
॥इतिसंचिंत्यजननीवेदानांतपसीस्थिता॥हिमालयगतादेवीमनसोवाचसास्व
यं॥९३॥अहंकमाश्रयेदेवंयेनमेवांछितंभवेत्॥चतुर्वेदान्समाहूयतानुवाच २५१
तदेवसा॥९४॥॥गायत्र्युवाच॥॥कथयध्वंसुताःसर्वेऋग्मुखाद्भुतमेवमे॥कःश्रेष्ठ
सर्वदेवेषुवरदानपरोलघु॥९५॥यस्यस्मरणमात्रेणसाक्षाद्भूत्वायथेप्सितं॥वरं
ददातिलोकानामुपकारायसर्वदा॥९६॥कस्मिन्दयालुतादृष्टामायातीतश्चको

भवेत्॥आत्मारामोमहायोगीसमलोष्टाश्मकांचनः॥९७॥स्वल्पादृतेनतपसासद्य
ःस्तुष्यतिकोस्तिसः॥तंवदध्वंहिचत्वारःसांगायूयंपदक्रमैः॥९८॥भवद्भिस्तन्यते
कीर्तिर्बहुलाशास्यपुत्रकाः॥तमुच्यतांनिर्भयेनचेतसासर्वतोमुखं॥९९॥॥ऋ
ग्वेदाऊचुः॥॥सदेवमातःकिलपूर्वमासीद्ब्रह्मैवनान्यत्सहशात्स्वरूपं॥मायान
कालोनचकर्ममूलंदैवंनृणांयेनभवेच्चजन्म॥१००॥मायागुणानांनहिलेशमा
त्रंब्रह्मैवसर्वत्रसमंविभाति॥कस्तत्रन्यूनाधिकतांप्रयातिसदेवचाग्रेकिलभा
तिमातः॥१॥वयंत्वयासाकममुष्यचित्तेलीनाविधेःसप्रलयावसाने॥विधिश्च
लीनोंबुजकोशमध्येलीनंकजंपुरुषदेहमध्ये॥२॥नारायणोनामसपुरुषोपि
स्वनामरूपंपरिहारदूरं॥मायाकलापंबहुसूर्यकोटीप्रभामयंब्रह्मबभूवसद्यः॥

ब्र.लो. ॥३॥ब्रह्मैवनित्यंसुखबोधरूपमनंतपारंत्वजरामरंयत्॥एवंनिराकारसमंत्र
२५२ रंगंतमनादिमध्यांतमशेषबोधं॥४॥सदाशिवंनिर्गुणमक्षरंचपरात्परंचंद्रस
हस्रभासं॥नयत्रवाचांमनसोपिबुद्धेर्बलंगृहीतुंकिललेशमात्रं॥५॥गुणस्वरू
पावयमेवमातर्बलंनचास्माकमहोवलंबे॥किंचिद्वयंलक्षणयावदामःसाक्षा
त्क्षमानोकिलमातरेतत्॥६॥विज्ञानमानंदघनंदचिदेकरसंसदेवेदमगाध
लक्ष्यं॥तत्वादिवाक्यैःप्रतिगृह्यमागंपरंवरेण्यंशरणंप्रपन्ना॥७॥एकोहम
स्मिबहुधाभवामीत्युवाचचैतन्यकलातदाभूत्॥तयास्तरेमेगुणरूपयासोत २५२
भ्यांजगज्जातमिदंसमग्रं॥८॥याचित्कलासाकिलपार्वतीयंचैतन्यरूपःशिव
एवसाक्षात्॥तदात्मभावंकिलजग्मतुस्तौवागर्थयोर्योगमिवाद्विजेषु॥९॥

सर्वेषुवेदेष्वपिगीयमानौस्वभक्तचिंतामणिनामधेयौ॥मेयौनयौशास्त्रकलाक
लापैस्तावदेवनूनंचवयंविदामः॥१०॥यत्पादसेवाभिरतानरायेस्वर्ग्यंपदंतेल
घुमानयानाः॥ध्यानावधूताखिलपापसंघायांतिप्रतीताःशिवधामविप्राः॥११॥
अतोभजत्वंशिवपादमूलंशूलंकरेयस्यविराजमानं॥गानंप्रियंयस्यचसामजा
तंनातःपरंश्रेष्ठतरोन्यदेवः॥१२॥श्रीशंभवायेतिमनोभवाययशस्करायाथम
यस्कराय॥श्रीविश्वनाथायमहेश्वरायकुरुष्वतंमातरिहेश्वराय॥१३॥सूतउवाच॥
इत्याकर्ण्यवचोदेवीगायत्रीहर्षसंयुता॥चकारदुष्करंतत्रतपोऽयुतसमात्रयं॥१४॥
पंचसाहस्रवर्षाणिजलेस्थित्वासदाशिवं॥आकंठमग्नावातेनप्राणपारणतत्परा॥
॥१५॥मनसापूजयंतीसाप्रत्यक्षंनामवैशिवं॥ततोबहिर्गताभूयःसापंचाग्निसाध

ब्र.सो. निरता॥१५॥तावंत्येकचवर्षाणितेनापिनापशंकरं॥ततोजगामसादेवीहिमवच्छि
२५३ खरोत्तमं॥१६॥तत्रपंचाब्दसाहस्त्रंचचारदुश्चरंतपः॥ततोपिनापपरमंशिवदर्श
नमीश्वरी॥१७॥ततःसूर्येक्षणंकृत्वारात्रौचंद्रेक्षणंतथा॥तावंचवर्षाणितेनापि
नापशंकरं॥१८॥पंचवर्षसहस्त्राणिपादांगुष्टेनतिष्टति॥वातावानीमहादेवीदुः
श्चरंकुर्वतीतपः॥१९॥ततोज्वालासमुत्पन्नाचतुर्दशभुवंगता॥शिवःसंप्रार्थितो
देवैस्तूर्णंतत्रसमागतः॥२०॥प्रत्यक्षोभगवान्भूत्वाबभाषेतांजगत्पतिः॥वरंव
रयभद्रंतेयत्तेमनसिवर्त्तते॥२१॥एतादृशंतपोघोरंकेनापिनकृतंपुरा॥यया २५३
त्वयाकृतंदेवीममप्रीतिविवर्द्धनं॥२२॥ब्रूहित्वंनिर्भयंदेवीअदेयंचददामिते॥श्री
तोस्मिकुंदसंमातर्माविलंबेमतिंकृथाः॥२३॥वेदमातोवाच॥भजेसनातनंमु

दामुदाश्रमंसदाशिवं॥निरंजनंनिरामयंचयंमहाधियंसदा॥२४॥अपारसारसा
रसागरंगरंधरंपरंहरं॥दयाकरंवरंविदांचिरंतनामृतांबुधे॥२५॥विशेषदोषना
शनंवनंवसंतमीश्वरं॥मृगेंद्रचर्मधारिणंशिवंनमामिहारिणं॥२६॥विभोःकथामृ
तंत्वदीयमादरेणयःपिबेत्॥तदाप्रसन्नजायतेपुनर्भवेदसौशिवःस्वयं॥२७॥व्रतं
त्वदीयमादरेणयःकरोतिमानवः॥तस्यदासतांव्रजंतिपद्मजादिदेवता॥२८॥पा
हिसर्वतःशुभंकुरुष्वहस्तते॥तवास्मिदाससदासिकामहेशमामवाधुना॥२९॥भ
वत्पदांबुजंसदामदीयमानसेमुदा॥शुभास्पदंप्रयातुनाथवांछितंह्यदोमम
॥३०॥त्वदीयतेजसाविनानमेमनुर्विराजते॥यदाप्रयातिसन्निधिंतदानिधिप्र
दोभवेत्॥३१॥एतदेवमानसंमदीयमद्भिवैनिशी॥करोतिकल्पनांमुहुस्तदेवपू

रयेंदुभृत्॥३१॥इमंस्तवंचयःपठेत्रिकालमेककालिकं॥तदीयकामनांविभोप्र
पूरयाशुमाचिरं॥३२॥धनार्थिनेघनंधनंयशोर्थिनेतुलंयशः॥दयार्थिनेदयापरां
त्वदर्थिनेदिशामृतं॥३३॥मदीयवक्त्रसंपुटेद्विकोटिजिह्वयायुतं॥कुरुस्तवंत्व-
दीयमेवसादरंकरोम्यहं॥३४॥मदीयशेमुषीतलताततास्तुवैययाविभो॥गुण-
वलीत्वदीयकीर्तिवेशयाम्मिसत्फलैः॥३५॥भवभीममहेशशूलपाणेशशिभृ-
ज्जालदृगीशशर्वशंभो॥मदनांतकरुद्रमुक्तिदायिन्नवमांनाथभवाब्धिदुःख-
जालात्॥३६॥॥सूतउवाच॥॥एवंस्तुतोमहादेवःपार्वतीरमणःप्रभुः॥संतोषंप
रमंप्राप्तस्तोत्रैर्नानाविधैरपि॥३७॥भक्ताभीष्टप्रदोनित्यंसर्वदेवशिखामणिः॥
तांस्तुवाचकृपासिंधुर्घनगंभीरयागिरा॥३८॥॥श्रीसदाशिवोवाच॥॥धन्यासि

कृतकृत्यासिगायत्रीब्रह्मसंमते॥तवभाग्यस्यनांतोस्तियतस्तेनिर्मलामतिः
॥३९॥मयैसर्वैश्वरेदेवीजाताश्रद्धासमन्विता॥भक्तिश्चसर्वभावेनकृतामेह्य-
नपायिनी॥४०॥तपोघोरतरंतप्तंमनोवाकायकर्मभिः॥प्रसन्नोस्मिवरंदास्ये
पार्वत्यासहतेप्रिये॥४१॥तवमंत्रस्यसामर्थ्यंवेदेषुप्रथितंयथा॥भविष्यति
तथाकार्यंसंतुष्टेनमयाशुभे॥४२॥द्वाविंशद्वर्णसंयुक्तोमनुस्तेवर्ततेःमत्तः॥तव-
थापितस्मिन्मेनाम्नसर्वाभीष्टप्रदायकं॥४३॥सर्वपापहरंपुण्यंसर्वव्याधिविनाश-
नं॥महाज्ञानप्रदंशुद्धंतेजोरूपंसनातनं॥४४॥संयोजयिष्येदिव्यंचजपन्णांसर्व-
सिद्धिदं॥द्व्यक्षरंसर्ववेदेषुप्रतिपाद्यंचमेप्रिये॥४५॥ग्रहाणभर्गदंभर्गसवितुर्मंड
लाकृतिं॥येनतेमनुसर्वेषांजपयोग्योभविष्यति॥४६॥॥सूतउवाच॥॥इतिशंभुव

ब्र॰स्तो॰ वःश्रुत्वागायत्रीप्रीतचेतसा॥स्वीचकारतदाशैवंभर्गंनामतदात्मकं॥४७॥तदा
२५५ सर्वेमरगणायेचप्रथमनायकाः॥येचसर्वेऋषिगणाःसिद्धाःसर्वेमत्नात्रयाः
॥४८॥सिद्धविद्याधरगणाःसगंधर्वाःसहोरगाः॥किन्नरागुह्यकाःसर्वेदेवयोनि
गणाश्चये॥४९॥तेसर्वेमुदमापन्नागायत्रींवीक्ष्यनिर्मलां॥शीघ्रंचक्रुस्तदादिव्यां
पुष्पवृष्टिंदिवौकसः॥५०॥जगुर्गंधर्वपतयोनन्रतुश्चाप्सरोगणाः॥गायत्रीवर
दाजातासदाशिवप्रसादतः॥५१॥तदुत्कृष्टतपोजातंतत्रात्रामतेजमंडलं॥तेन
सर्वेनिरातंकाःसंजाताःस्वर्गवासिनः॥५२॥देवदेवोपिसपदिंगायत्रींवीक्ष्यसा २५५
दरं॥स्वरूपंसंप्राप्तंचक्रेतस्याःस्वसदृशंमुदा॥५३॥पंचवक्त्रंदशभुजंचंद्रशेखर
संयुतं॥भक्ताभिष्टप्रदंशुद्धंतत्वार्थप्रदमोजसा॥५४॥वरदाभयदंनित्यंत्रिनेत्रंत्रि

गुणात्मकं॥प्रातर्ब्रह्ममयंचैवमध्याह्नेरुद्ररूपकं॥५५॥सायंविष्णुप्रियंदिव्यंदिव्य
गंधानुलेपनं॥दिव्यायुधधरंदिव्यंवाहनंदर्शनंप्रियं॥५६॥चकारापांगसंगेनमहा
कारुणिकोविभुः॥अन्येवराश्चदेवेनप्रदत्ताःसर्वसिद्धिदाः॥५७॥इतितांवेदजन
नीमनुगृह्यसदाशिवः॥अंतर्ध्यानमगात्सर्वैःसाकंदेवोत्तमोविभुः॥५८॥गायत्र्यपि
तदापुत्रैस्तूयमानाऋषिश्वराः॥जगामसर्वगादेवीत्रिगुणंसूर्यमंडलं॥५९॥तदा
प्रभृतिसर्वेपितांभजंतिमुनीश्वराः॥यस्यस्मरणमात्रेणब्रह्महाशुद्धिमृच्छति॥
६०॥किंपुनर्लेशमात्रस्यपापस्यध्वंसकारिणी॥जितेंद्रियःसदाचारोब्राह्मणस्तां
भजन्भजेत्॥६१॥नापरंदैवतंलोकेगायत्र्यास्तुद्विजन्मनां॥शापानुग्रहसाम
र्थ्यंयत्प्रसादेनजायते॥६२॥कलौयुगेमहाघोरेपापिनांप्रियकारके॥बहुपापंयु

श्लो.
२५६

तिदुष्टेगायत्र्येवावतिद्विजान्॥६३॥दानंतुदैदैस्त्रामात्रेणमयाप्रोक्तमृषिश्वराः॥दा
नेनपापशांतिःस्याद्गुरूणामपिश्रद्धया॥६४॥पापानिबहुधालोकेविख्यातान्यपिसू
रिभिः॥तान्यनादृत्ययेमूढाःप्रायश्चित्तंनकुर्वते॥६५॥प्रातःसायंशिवंदृष्ट्वादत्वादा
नान्यनेकधा॥श्रुत्वाशिवकथांदिव्यांसर्वपापक्षयोभवेत्॥६६॥एतत्त्रितिपुरःस्मरं
शिवकथानामामृतंजीवनंश्रद्धापुष्टिकरंचजगतामाधारभूतंनराः॥येशृण्वं
तिनिरंतरंनिजगृहेवान्यगृहेसर्वदातेषांमोक्षमुपायनंदिशातिवैश्रीपार्वतीव
ल्लभः॥६७॥रेरेचित्तहरंपरंभजमुदासंसारपाथोनिधेःपारंयास्यसियत्रनेत्रनजि
नेखह्नोकमात्रेणहि॥शैवंयास्यसितत्सदंमृतिहरंवंद्यंमहेंद्रादिभिस्तस्माछिप्रतः
रंभजस्वहिभवंमानंदथामाकथाः॥६८॥ ॥इतिश्रीस्कंदपुराणेवृहत्श्लोतरखं २५६

डेनाडीचक्रदानगुरुगायत्रीमहिमानिरूपणोनामसप्तत्रिंशोध्यायः॥३७॥ ॥
ऋषयऊचुः॥॥किंनामपातकंप्रोक्तंविनश्यत्केनकर्मणा॥कतिधासंतिपापा
नांगतयस्तद्वदस्वनः॥१॥कायाद्भवतिकिंजिवात्मनसाबुध्ययाथवा॥इंद्रियैर्वा
कर्मयोगात्तच्छांतिःकेनजायते॥२॥सूतजानासिसर्वंत्वंकृष्णद्वैपायनास्यतः॥य
थावत्कथयास्मभ्यंयेनशंभुःप्रियोभवेत्॥३॥यःकर्मशुद्धोजगतीवेदोक्तविधिपा
लकः॥जितेंद्रियवयोयःस्यात्तस्यतुष्टोभवेच्छिवः॥४॥इतिपूर्वंश्रुतंतत्वंतस्मात्त्व
च्छामहेवयं॥लोकानामुपकारार्थमस्मदर्थंवदस्वच॥५॥ ॥सूतउवाच॥॥प्रायश्चि
त्तंप्रवक्ष्यामिशृणुध्वंमुनिपुंगवा॥सर्वेषामेववर्णानांशुद्धिमाहयथारविः॥६॥द्वि
विधंपापमित्युक्तंप्रकटंगुप्तमेवच॥प्रकटंप्रकटेनैवरहस्येनतथेतरत्॥७॥वेद

श्लो॰ २५७ शास्त्रार्थविद्वांसोधर्मज्ञाःशास्त्रार्थपारगाः॥कामक्रोधविनिर्मुक्ताःशांतात्मानोजितेंद्रि
याः॥८॥समाःशत्रुचमित्रेचहिंसालोभविवर्जिताः॥एकविंशतिसंख्याकाःसप्त
पंचत्रयोथवा॥९॥यंब्रूयुरुक्तसंख्याकाःधर्मतःस्यादितिश्रुतिः॥ब्रह्महामद्यपस्ते
योगुरुतल्पगएवच॥१०॥महापातकिनश्चैतेयश्चतैःसहसंवसेत्॥यस्तुसंवत्स
रस्त्वेभिःपतितैःसहसंवसेत्॥११॥यानशय्यासनैर्नित्यंजानन्वैपतितोभवे
त्॥ब्रह्महाद्वादशाब्दानिनियतात्मावनेवसेत्॥१२॥भिक्षाहारेणसततंधृत्वाश
वशिरोध्वजं॥एककालेचभक्ष्यंतेदोषंविख्यापयन्नृणां॥१३॥पूर्णेतुद्वादशेव
र्षेब्रह्महति॥अकामस्यस्मृताशुद्धिःकामतोमरणांतिकी॥१४॥अज्ञानाद्यदिजा
येतब्रह्महत्यानरस्यच॥गायत्रीलक्षजाप्येनशुद्धोभवतिनान्यथा॥१५॥चांद्रा

यणंतथाकृत्वायथाशुद्धिःप्रजायते॥ज्ञानपूर्वंहतोविप्रोयेनतद्वैवदाम्यहं॥१६॥
ज्वलंतंप्रविशेदग्निंभृगोःपतनमेवच॥१७॥कुर्यादनशनंवापिब्राह्मणार्थेत्यजे
दसून्॥गुर्वर्थेवात्यजेत्प्राणान्ब्रह्महत्यांव्यपोहति॥१८॥गत्वावाराणसींवापिका
लात्तत्त्यजेदसून्॥सर्वपापविनिर्मुक्तोयातिशैवंपरंपदं॥१९॥सुरापस्तुसुरांत
प्तामग्निवर्णांपिबेत्ततः॥शुद्धोभवतिनिर्दग्धस्तद्वर्णंवापयःपिबेत्॥२०॥गोमूत्रंवा
घृतंवापितत्पापान्मुच्यतेद्विजाः॥ब्रह्महत्याव्रतंवापिचरेत्तत्पापशुद्धये॥२१॥अभि
गम्यतुराजानंसुवर्णस्तेयवान्द्विजाः॥स्वकर्मख्यापयन्ब्रूयात्त्वंमांहंतुमिहार्ह
सि॥२२॥गृहीतंमुशलंराज्ञासकृद्धन्यात्तुतंस्वयं॥वधेतुमुच्यतेतेनकृच्छ्रैर्वाविविधैर्द्वि
जाः॥२३॥तस्यतस्यव्रतंकुर्यात्तत्पापविशुद्धये॥यस्ययस्यचसंपर्कात्तत्संयोगीभवे

प्रायो॰
२५८

तुसः ॥२४॥ तस्मात्तस्यव्रतेनैवतत्तत्पापाद्विमुच्यते ॥ स्नात्वाश्वमेधावभृथेसर्वेपात
किनोद्विजाः ॥ शुद्धेरंस्तत्क्षणादेवरविरित्यब्रवीद्वचः ॥ तस्मात्संगोपयेन्नैवपातकंय
त्कृतंस्वयं ॥२६॥ मातृष्वसांमातुलानींतथैवचपितृष्वसां ॥ भगिनीयंसमारुह्यकुर्या
त्कृच्छ्रातिकृच्छ्रकैः ॥२७॥ चांद्रायणंवाकुर्वीततस्यपापोपशांतये ॥ भ्रातृभार्यांभगि
नेयींयोगतोविकलःपुमान् ॥२८॥ चांद्रायणानिचत्वारिपंचवाकथितानिवै ॥ मातु
लस्यसुतांगत्वासखीभार्यांतथैवच ॥२९॥ अहोरात्रोषितोभूत्वातदाकृच्छ्रंसमाच
रेत् ॥ तेनतस्यापशुद्धिस्याद्यदिपुंसाकृतंस्वयं ॥३०॥ उदक्यागमनेचैवत्रिरात्रेणवि ২५८
शुध्यति ॥ ब्राह्मणोब्राह्मणींगत्वाकृच्छ्रमेकंसमाचरेत् ॥३१॥ कन्यकागमनेचैवचरे
च्चांद्रायणंव्रतं ॥ रेतःसिक्त्वाजलेयस्तुकृच्छ्रंसांतपनंचरेत् ॥३२॥ वेश्यायागमने

चैवप्राजापत्यंसमाचरेत् ॥ नान्यासांनिष्कृतिर्दृष्टाशास्त्रेषुपरमर्षिभिः ॥३३॥ संवत्स
रस्यचान्यासांगुरुतुल्यव्रतंस्मृतं ॥ यदितत्रप्रजोत्पत्तिर्निष्कृतिर्नविधीयते ॥३४॥ शू
द्राभवतिचेद्दृष्टाब्राह्मणेनयदातदा ॥ नतस्यागमनेपापंप्रजोत्पत्तौतथैवच ॥३५॥
रंगयागमनेचैवचरेत्सांतपनंव्रतं ॥ संवत्सरेणभवतिगुरुतुल्यसमोहिसः ॥३६॥
नटीशैलूषिकीचैवरजकीवेणुजीविनी ॥ कृत्वाचांद्रायणंकुर्यात्तथाचर्मोपजी
विनीं ॥३७॥ दीक्षितंक्षत्रियंहत्वाचरेद्ब्रह्महणंव्रतं ॥ राजपत्नींचयोगच्छेद्गुरुतुल्यस
मंभवेत् ॥३८॥ गुरुतुल्यगशुद्धिंतुकथ्यमानांनिबोधत ॥ याज्ञवल्क्यादिभिःप्रोक्तंर
ययाशुद्धोभवेन्नरः ॥३९॥ तप्तेऽयःशयनेसार्द्धमयस्यायोषितास्वपेत् ॥ गृहीत्वोत्कृ
त्यवृषणौनैऋत्यांचोत्सृजन्नतनुं ॥४०॥ प्राजापत्यंचरेत्कृच्छ्रंसमोवागुरुतल्पगः ॥ चां

ब्रसो· ध्यायणंत्रीणामासान्नमभ्यसेद्वेदसंहितां॥४१॥गुरूणामध्यविक्षेपोवेदनिंदासुहृद्
२५९ धः॥ब्रह्महत्यासमंज्ञेयंतद्धितस्यचनाशनं॥४२॥निषिद्धभक्षणंजह्म्यान्नुत्कर्षेणव
चोन्नृतं॥रजस्वलामुखास्वादःसुरापानसमंस्मृतं॥४३॥अश्वरत्नमनुष्यस्त्रीभूधेनु
हरणंतथा॥निक्षेपस्यचसर्वेहिस्वर्णस्तेयेनवैसमं॥४४॥सखीभार्याकुमारीषुस्वयो
निष्वंत्यजादिषु॥सगोत्रासुसुतस्त्रीषुगुरुतुल्पसमंस्मृतं॥४५॥पितुःस्वसारंमातुश्च
मातुलानींस्नुषांतथा॥मातुःसपत्नीभगिनीमाचार्यतनयांतथां॥४६॥आचार्यपत्नीं
स्वसुतांगच्छंस्तुगुरुतल्पगः॥भर्तृभार्यांतथाश्वश्रूंपितृव्यानींतथैवच॥४७॥अन्यामपि २५९
नमस्यांचगच्छंस्तुगुरुतल्पगः॥छित्वालिंगंवधस्तस्याःसकामायाःस्त्रियाअपि॥४८॥
गुरुतल्पगवत्कार्यमेतासांशुद्धिमिच्छता॥उपपातकान्यधुनावक्ष्यामिभवदग्रतः॥४९॥

गोवधोव्रात्यतास्तेयमृणानांचानपक्रिया॥अनाहिताग्नितापण्यविक्रियःपरिदेवनं
॥५०॥भृताद्ध्ययनादानंभृतकाध्यापनंतथा॥पारदार्यंपारिवित्त्यंवार्धुष्यंलव
णक्रियां॥५०॥स्त्रीशूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं॥नास्तिक्यंव्रतलोप
स्वसुतानांचैवविक्रयः॥५१॥धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनं॥पितृ
मातृपरित्यागस्तडागारामविक्रयः॥५२॥हीनदक्षिणयाजित्वंक्रतुविक्रयणं
तथा॥चातुर्विधभृतत्वंचधाडीचारेणजीवनं॥५३॥कन्यासंदूषणंचैवपरिविंद
कयाजनं॥कन्याप्रदानतस्यैवकौटिल्यंव्रतलोपनं॥५४॥आत्मभाविक्रियारं
भोमद्यपस्त्रीनिषेवणं॥स्वाध्यायाग्निसुतत्यागोबांधवत्यागएवच॥५५॥इंध
नार्थंद्रुमच्छेदस्त्रीहिंसौषधिजीवनं॥हिंस्रयंत्रविधानंतुव्यसनान्यात्मविक्रयः॥५६

ब्राह्मणेन सुवर्णहरणं यदि कृतं तदा देहांतप्रायश्चित्तं नास्ति अतो यथावर्ण ॥ ३४

ब्रह्मो. २६० शूद्रप्रेष्यं हीनसख्यं हीनयोनीनिषेवणं ॥ तथैवानाश्रमेवासः परान्नपरिपुष्टता ॥
५७ ॥ असच्छास्त्राधिगमनमाकरेष्वधिकारता ॥ भार्याया विक्रयश्चैव नीलिवापो द्विजे
न च ॥ ५८ ॥ त्रिगव्यविक्रयश्चैषामेकैकमुपपातकं ॥ उपपातकशांत्यर्थं प्रायश्चित्तं वि
धीयते ॥ ५९ ॥ स्वर्णहा च यथावर्णा तथा त्रयी निषूदकः ॥ चरेद्व्रतमहत्वापि घाता
र्थं चेत्समाहितः ॥ ६० ॥ द्विगुणं सवनस्थेषु ब्राह्मणे व्रतमादिशेत् ॥ तेन पापविशुद्धिः स्या
त्पश्चात्तापात्तु नीघ्रतः ॥ ६१ ॥ पश्चात्तापात्समं नास्ति कायशोधनमुत्तमं ॥ पश्चात्तापि न
रः सद्यो वदतीतत्क्षणेन तत् ॥ ६२ ॥ ऋषय ऊचुः ॥ ॥ पश्चात्तापः कया रित्या ज्ञायते २६०
सूत तद्वद ॥ लोकानामुपकारार्थमस्माकं च विशेषतः ॥ ६३ ॥ रोमांचितानि गात्राणि कु
र्वंती त्वद्वचांसि नः ॥ धन्योसि कृतकृत्योसि मूढोत्तारयनौरसि ॥ ६४ ॥ ॥ इति श्रीस्कंद

पुराणे बृहद्ब्रह्मोत्तरखंडे प्रायश्चित्तविधिनिरूपणे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ सूत
उवाच ॥ ॥ श्रूयतां वर्णयिष्यामि पश्चात्तापस्य लक्षणं ॥ येन श्रवणमात्रेण पापेन
र्णां नधीर्भवेत् ॥ १ ॥ एकदा नारदो योगी पर्यटन्नगमुपागतः ॥ यत्रास्ते नैषधो राजा न
लनामामरप्रभः ॥ २ ॥ अयोध्यायाः पतिश्चैव दमयंत्याः पतिर्नृपः ॥ सिंहासनगतः
श्रीमान्मेरुमूर्ध्नि यथा शशी ॥ ३ ॥ धर्ममूर्तिरिव प्रख्यः शिवव्रतपरायणः ॥ भस्मांग
भालतिलकः शिवाराधनतत्परः ॥ ४ ॥ प्रसन्ननेत्रनलिनः सत्यवान्ब्राह्मणप्रि
यः ॥ उग्रदानी च मानी च ज्ञानी ध्यानी विशेषतः ॥ ५ ॥ समुद्र इव गंभीरः प्रतापेन य
था रविः ॥ क्षमया सम तो भूव्या धनेनैव धनेश्वरः ॥ ६ ॥ मरुत्वानिव तेजस्वी वायुव
द्दुर्ग्रहः परैः ॥ यद्गुणान्वक्तुमीशोपि न भवेच्छास्त्रपारगः ॥ ७ ॥ सामदानेन भेदेन

निग्रहेण वसुंधरां ॥ वशीकृत्य महीपालो नलो यत्र विराजते ॥ ८ ॥ स्वेच्छया रणयन्वी
णां महतीं नारदो मुनिः ॥ तूर्णं समागतस्तत्र सभायां यत्र वै नलः ॥ ९ ॥ दूरात्समाग
तं दृष्ट्वा नारदं मुनिपुंगवं ॥ सिंहासनात्तूर्णमुत्थाय दंडवत्प्रणिपत्य च ॥ १० ॥ पाद्य
मर्घ्यं तथा धेनुमर्थिकृत्य विधाय च ॥ रत्नसिंहासने दिव्ये बहुमानं निवेश्य च ॥ ११
॥ प्रणतः प्रांजलिर्भूत्वा सम्यगानतकंधरः ॥ प्रेमगद्गदया वा[णी]ं निषधेश्वरः ॥ १
२ ॥ धन्योस्मि कृतकृत्योस्मि भवतां पाददर्शनात् ॥ स्वैरं गते रुदारस्य निस्पृहस्य
विशेषतः ॥ १३ ॥ गृहीणां कूटधर्माणां मंदिरे किं प्रयोजनं ॥ तस्मादत्र गतिर्नूनं भ
वतां मघनाशिनी ॥ १४ ॥ यदा चित्ते धृतः पूर्वं भवद्भिरहमादरात् ॥ तदैव शुद्धिम
गमन्मामकं सानुगं कुलं ॥ १५ ॥ अद्यप्रभृति मे नूनं शिवं सर्वत्र मंडले ॥ भविष्य

ति न संदेहः संपदे पादलांछिता ॥ १६ ॥ महापापोपपापानां शांतिस्यात्साधुदर्शनात्
॥ तीर्थात्परतरं मन्ये भाग्वतं चानुदर्शनं ॥ १७ ॥ साधुनां दर्शनं पुण्यं तीर्थभूता हि साधव
॥ तीर्थं पुनाति कालेन सद्यः साधुसमागमः ॥ १८ ॥ अतः परं न मे नूनं दुर्लभं जग
तीतले ॥ यतो मदीयोयमिति ध्यात्वा मरुहमागतः ॥ १९ ॥ सूत उवाच ॥ इत्थं समा
कर्ण्य वचो नलस्य प्रसन्नचेता विधिसूनुराह ॥ धन्योसि राजंस्तव वंशमध्ये सर्वैव
दान्या महदादराढ्याः ॥ २० ॥ नृप त्वया साधुकृतं च तुर्षु देवेषु राजीषु विवाहकाले
॥ दौत्यं गतः स्वाम भिमानभूमिं त्यक्त्वा च भैम्यार्थमुपागतेषु ॥ २१ ॥ तदा प्रभृत्येव
त्वदीयनाम प्रसिद्धिमागाज्जगतीतलेस्मिन् ॥ प्रभातकाले तव नामधेयं स्मरंति
मर्त्या हि भवंत्यपापाः ॥ २२ ॥ श्रीहाटकेशः किल हृष्टुकामो गंतास्म्यहं यत्र शिवः शिवा

श्लो० च॥ त्वदेशरीतिं विमलां च दृष्ट्वा त्वां दर्शनं दातुमिहागतोस्मि॥२३॥ संसारमध्येन्नृपवर्-
२६२ त्तमानः कुरुष्व राज्यं ममताविहीनः॥ शिवं प्रशांतं फणिराजभूषं भस्मांगरागं भववभं-
गहेतुं॥२४॥ स्वचर्कैर्भिस्त्वं परितोष्य राजन् भजस्व नित्यं भवमिंदुमौलिं॥ अतः परं चा-
कृतं परं न किंचित्कर्मैव येनेशगतिर्भवेतत्॥२५॥ जन्मांतरे यच्च कृतं भवेत्तत्पा-
पं प्रभवेद्भस्मसमं यदाश्या॥ तं सर्वपूज्यं जगतामधीशं श्रीपार्वतीशं भज भावयुक्तः
॥२६॥ समूलपापक्षयकृच्छिवोस्ति प्रसिद्धमेतच्छ्रुतिराह राजन्॥ गुणप्रवाहो परमो
नराणं यत्पादपद्माहृतचेतसां स्यात्॥२७॥ यस्य स्मृत्यत्वनामोक्त्या तपोयज्ञक्रिया- २६२
दिषु॥ न्यूनं संपूर्णतां याति तं भजस्व भवं मुदा॥२८॥ यत्पादसंश्रया राजन्मुच्ये-
त भवबंधनात्॥ तं दृष्टुकामो गच्छामिहाद्य केशं प्रति नृप॥२९॥ सम्यक् राज्यं कुरु-

ष्व त्वं शिवं ध्यात्वा हृदि स्वयं॥ यस्य स्मरणसामर्थ्यात्पापदुःखान्तरिष्यति॥३०॥ सूत उ-
वाच॥ इत्युक्तवति देवर्षौ नलो नलिनलोचनः॥ नारदं प्रत्युवाचेदं प्रेमगद्गदया
गिरा॥३१॥ नल उवाच॥ इदानीमस्मि देवर्षे पूतात्माहं समंडलः॥ त्वयाहं शि-
क्षितः साधो करिष्ये त्वद्वचो मुदा॥३२॥ परं चैकं प्रपच्छामि त्वां गुरोः करुणानिधे॥
प्राप्य कल्पद्रुमं कोपि यथेच्छं याचते न किं॥३३॥ वक्ता त्वत्सदृशो यत्र संदेहः किं स्थि-
तो भवेत्॥ प्राप्ते सूर्योदये नृणामंधकारः करोति किं॥३४॥ लब्धे चिंतामणौ देवं को-
किन्यर्थयते तकः॥ पियूषपूरिते कुंभे लब्धे किं रोगिणोऽपरैः॥३५॥ जन्मांधेन यथा
वंती ९२ प्राप्ते दिव्यनेत्रे स्वभावतः॥ सप्तद्वीपं पृथ्वी साध्वी च किं न पश्यति॥३६॥ तस्मात्त्वत्सदृशं
पात्रं महासंदेहनाशनं॥ पुमान्प्राप्य न पृच्छेत तद्वृथा जन्म वै तस्य वै॥३७॥ सानुकूलेहि

ब्र.लो. स्वगुरौयःशास्त्रंनाधिगच्छति॥तस्यपातकराशीनांनाशोनेत्यनुमीयते॥३८॥स्व
२६३ हस्तोपार्जितेद्रव्येस्वधर्मेणस्वीकृते॥यःप्रयच्छतिनोविप्रान्सपापीत्यनुमीय
ते॥३९॥स्वाधीनेस्वकलत्रेपिपरदाररतोहियः॥तस्यापिपापराशीनामंतोनास्ती
तिभासते॥४०॥वेदाभ्यासंद्विजस्त्यक्त्वासवेश्यायाःसुरांपिबेत्॥तस्यपापानिकिं
वक्ष्यामिविधिसंभव॥४१॥गृहेसर्वाणिवस्तूनिकनकादीनियस्यवै॥तस्यचौ
र्ययदीप्रीतिस्तस्यपापंपुरानकिं॥४२॥यस्यग्रामोपकंठेहितीर्थंगंगासमंयदि॥ २६३
स्वगृहेकूपजंस्नानंयःकरोतिसताद्दशः॥४३॥विद्यांप्राप्यानवद्यांगीगुरुकन्योपि
योद्विजः॥छात्रेभ्योनाददेज्ञानंसोपिपापिपंक्तिंवकिंस्थितः॥४४॥भूत्वादेवाश्चयो
राजादंडेनपीडयन्प्रजां॥शुभांदारांपरस्यापिशुभान्परहयांस्तथा॥४५॥गृहस्थे

त्रतथाद्रव्यंवासांसिकरिणस्तथा॥वाहनानिविचित्राणिधेनुमाहिष्यमाविकं॥४६॥
व्यर्थाभिशापमात्रेणगृहीत्वैतानियोनृपः॥कांगतिंप्राप्नुयाद्राजासंदेहोयमपिहृदि
॥४७॥कर्मणांगतयोदेवविविधाःप्रतिभांतिमे॥केवैकुर्वंतिदुष्कर्मतेनराःस्वर्गमाप्नु
युः॥४८॥केचित्कृत्वाशुभाचारंस्वधर्मंनविहत्यच॥दुर्दशांमहतींप्राप्ताश्चगराजाद
योमलाः॥४९॥धर्मश्चांतेविवर्द्धेतनाधर्मोहिकदाचन॥तस्मादनेकसंदेहसंदेहंत्व
मपाकुरु॥५०॥अष्टादशान्यपिदेवर्षेपातकानिवदस्वमे॥तच्छांतिमपिदेवर्षेमुक्त्यु
पायसमन्वितां॥५१॥ब्राह्मणामेप्रियानित्यंवैष्णवास्तुसततंहृदि॥विप्राश्रीवचनान्मे
वैश्राणाराज्यंप्रियाधनं॥५२॥नविप्रात्परमंपात्रंसंसारतरणंप्रति॥वेदशास्त्रव्रतोदे
नमूढान्मार्गेनिवेषतः॥५३॥नारदउवाच॥॥संक्षेपेणचराजेंद्रश्रोतुमीहाभवेद्य

ब्रसो. दि॥तदात्वांबोधयिष्यामिप्रदोषोमेपगच्छति॥५४॥शिवप्रदोषवेलायांदर्शनंत्रि
२६४ वयोर्नरः॥यःकुर्यात्तस्यपापानिविलयंयांतितत्क्षणात्॥५५॥नप्रदोषसमं
राजन्व्रतमस्तीहभूतले॥प्रदोषेत्रिवमभ्यर्च्यशिवसान्निध्यमाप्नुयात्॥५६॥
एकंपराध्यंमेजातंतथाविंशद्युगानिच॥प्रदोषव्रतत्वचर्यायांतस्मादेकंदिनंगतं
॥५७॥ब्रह्मलोकेमहानासीत्कल्पाहोब्रह्मणाकृतः॥तत्रस्थानान्तदाराजन्वार
णेमेदिनंगतं॥५८॥तस्मिन्दिनेमयात्यक्तंहाटकेशस्यदर्शनं॥सर्वस्वेनविही
नोहमितिचित्तेवधारयन्॥५९॥तूर्णंतत्रगतोराजन्यत्रवैहाटकेश्वरः॥क्षम्यतां २६४
क्षम्यतांदेवशिवशंकरहत्पते॥६०॥ममापराधंसंजातंक्षम्यतांजगदीश्वर॥एवमु
क्त्वारुरोदाहंविह्वलेनैवचेतसा॥६१॥तदाश्रीपार्वतीकांतःस्वगुरूर्मामुवाचह॥मारो

दिस्त्वंहिदेवर्षेप्रदोषेसम्मतोसिमे॥६२॥प्रदोषव्रतहानिस्तेनजातेतिसुनिश्चितं॥त
स्मात्त्वंसंक्षेपतोराजन्वदामिभवदृयतः॥६३॥महापापंतथाचोपपातकंकुरुतेनरः॥
विधानात्पापशुद्धिःस्यात्पश्चात्तापेनवैद्रुतं॥६४॥पापंकृत्वाचयोमूढोगुप्तंरक्षति
चेतसि॥प्रत्यहंवृद्धिमायांतिगुप्तंबीजंयथाभुवि॥६५॥पापंप्रत्यक्षतांनीतेलयमाप्नो
तिपातकं॥नृपसेनांयथाचौरोदृष्ट्वायातिवनांतरे॥६६॥ब्रह्महामद्यपःस्तेयीस्वर्ण
हृत्तत्समागमी॥एतेपंचमहापापातन्मध्येप्रथमंशृणु॥६७॥ब्रह्महाब्राह्मणःकश्चि
त्पर्यटन्पृथिवीतले॥पश्चात्तापेनसंयुक्तस्तीर्थंप्रतिजगामसः॥६८॥यत्राहिंपी
विरूपाक्षस्तत्रैवसःसमागतः॥प्रसिद्धोदक्षिणेदेशेयत्रास्तिपरमेश्वरः॥६९॥तत्पू
जार्थंसमायातोराजाकश्चित्सुधार्मिकः॥चंद्रमौलिप्रियोनामश्रीशैलाद्यःसमा

ब्रह्मो· २६५ गतःस्तिपरमेश्वरः॥६९॥तत्पूजार्थंसमायातोराजाकश्चित्सुधार्मिकः॥चंद्रमौलि
प्रियोनामश्रीशैलाद्यःसमागतः॥७०॥सेनयासहधर्मात्मातत्राहिंपीमहेश्वरं॥पू
जयामासविप्रेंद्रैर्वेष्टितोवेदपारगैः॥७१॥ब्रह्महत्याकृतायेनसोपितत्रसमागतः
॥स्थापयन्कर्मलोकेषुभिक्षाशीचशिरोध्वजः॥७२॥प्रवेशंकृतवांस्तत्रप्रदोषेशि
वमंदिरे॥तदानीवारितोविप्रैस्तत्रस्थैर्वेदपारगैः॥७३॥निर्वास्यतांब्रह्महायंपा
पात्माशिवसन्निधिं॥कथंप्राप्नोतितत्संगादस्माकंपातकंभवेत्॥७४॥निर्वासितेब्र
ह्महणिपूजारंभोभवत्तदा॥पूजांकृत्वातदाराज्ञाप्रदोषेशंकरस्यच॥७५॥क्षमापनस्यवे २६५
लायांश्रुतःशब्दोमहीभृता॥तूष्णींतिष्ठतसर्वेत्रशृणवतुशब्दमादरात्॥७६॥त्रिवारं
शिवपाहीतिकोवदत्तंमंदिराद्बहिः॥शिवनिर्माल्यविप्रेणश्रुतःशब्दोधुनामया॥७७॥

कोयमस्तीतितंचात्रशीघ्रमानीयभोजनाः॥एवंसंपूजयिष्यामित्रिरुक्तोयेनवै
शिवः॥७८॥जनैर्निवेदितंराज्ञेब्रह्महायंनचापरः॥अत्रासावप्रविष्टत्वाद्बहि
र्वेहतिमंदिरात्॥७९॥ब्रह्मघ्नशब्दमाकर्ण्यसचैलंस्नानमाचरेत्॥तस्मादस्यक
थालापंत्यक्त्वाभजहरंनृप॥८०॥इतिसर्ववचःश्रुत्वानृपःशिवपरायणः॥इंदुमौ
लिरुवेचेदंवाक्यंवेदविदोद्विजान्॥८१॥ब्रह्महानभवेच्चायंयेनत्रिरुक्तईश्वरः॥
महापापयुतश्चापिपूतात्मानात्रसंशयः॥८२॥यूयंवेदविदांश्रेष्ठावेदार्थपरिपं
थिनः॥कथंनज्ञायतेसर्वंशिवनामफलंमहत्॥८३॥अस्माकंदृढविश्वासोभव
त्येवनसंशयः॥शिवेतिवचनंयोवैभाषतेससदाशिवः॥८४॥शिवेत्युच्चारणाद्दे
वमहापापौघपंजरं॥भस्मीभवतितस्याशुमुक्तिमिच्छतिशंकरः॥८५॥तस्मात्त्वं

ब्र.लो. पूजयिष्यामि पूतात्मा सौ न ब्रह्महा ॥ येन प्रदोषवेलायां त्रिवारं शिव ईरितः ॥८६॥
२६६ तमानयेति राज्ञोक्ते दासैः संप्रापिते सति ॥ क्रोधांधमतयो विप्रा नृपमूचुस्तदा न-
न ॥८७॥ ब्राह्मणा ऊचुः ॥ ब्रह्महत्यासमं नास्ति पृथिव्यां पातकं परं ॥ शिवेति पर-
नादेव कथं भस्मीभवेन्नृप ॥८८॥ वेदाः सांगाः प्रयत्नेन प्रपठ्यं चेन्महीपते ॥ तथा-
पि शंकरोस्माकं हृदुनो स्फेटयत्यसौ ॥८९॥ एतद्द्विप्रस्य चांगे वै कुष्टः स्वल्पोस्ति भूप-
ते ॥ वर्षत्रियं तु संजातं रौद्याशंकरपूजनैः ॥९०॥ तथापि न गतः कुष्टो ब्रह्महा मु-
च्यते कथं ॥ सर्वैराराध्यते शंभुः परं तु नो प्रसीदति ॥९१॥ पुत्रार्थं च धनार्थं च दारार्थं २६६
वै सदाशिवं ॥ पूजयामास यत्नेन वेदोक्तेनैव कर्मणा ॥९२॥ तथापि शंकरोस्माकं वां-
छितं न प्रयच्छति ॥ ब्रह्महायं कथं मुक्त एतन्नो श्रद्दधामहे ॥९३॥ तव शंभौ भवेद्भूद्वापू-

चिन्नेतदा वयं ॥ करिष्यामो पणं चात्र सत्वया पूर्यतामिति ॥९४॥ बाढं तस्मिन्नुक्तवति
पंद्रमौलौ नरेश्वरे ॥ तदा यदुच्यते विप्रैस्तच्छृणुष्व नराधुना ॥९५॥ विप्रा ऊचुः ॥ शि-
वप्रसादाभिमुखं वृषोयं स्थितः सचेतः स्पष्टमुखोभवेद्वै ॥ पाषाणरूपस्तृणधान्यमत्ति
पश्चात्तु रीषं यदि मुच्यतेसौ ॥९६॥ तदा पणः पूर्णतरं प्रयाति स ब्रह्महा नेति च पुण्य-
ण्यरूपः ॥ त्रिवेलमात्रं शिवनामजल्पात्पूतो यमेतत्खलु यत्त्वयोक्तं ॥९७॥ एव-
मुक्ते तदा विप्रैः राजा बिल्वदलं करे ॥ गृहीत्वा शिव सत्योसीत्युक्त्वा क्षिप्तं शिरोपरि
॥९८॥ तदानीं वृषभः श्रीमान्वृषरूपो व्यनादयत् ॥ तृणं जग्राह वक्त्रेण भूत्वा तु प्रां-
ङ्मुखः स्वयं ॥९९॥ चणका भक्षितास्तेन पीतं जलमशेषतः ॥ गोमयं च कृतं पश्चा-
त्तदाद्भुतमिवाभवत् ॥१००॥ देवदुंदुभयो नेदुः खात्पेतुः पुष्पवृष्टयः ॥ जगुर्गंधर्वप-

ब्रह्मो. २६१

तयोनन्तनुश्चाप्परोगणाः॥१॥पूतोयमितिसर्वत्रब्रह्महाप्राप्तसत्कृतिं॥दिनपंचप्रमा
णेनब्रह्महत्यास्थितातनौ॥२॥षष्टेतुदिवसेराजन्शैवराजसमागमात्॥चंद्रमौ
लिप्रसादेनशैवंधामजगामसः॥३॥जन्मजन्मांतरेणापिब्रह्महाचनगच्छति॥सा
पंचदिवसेनैवशिवेत्युच्चारणात्कृता॥४॥पश्चात्तापोमहानासीत्तस्यविप्रस्यवैयत
॥तदाशिवालयप्राप्तोसत्यंमुक्तोनसंशयः॥५॥ब्रह्महामुच्यतेपापाद्यदिश्रद्धापुरःस
रं॥सत्योयंशंकरःसाक्षादित्येवंचेतसाधृतः॥६॥तस्मिन्शिवालयेराजन्नद्यावद्वि
षःस्वयं॥प्रत्यङ्मुखनपाविप्रपणबंधेनतिष्ठति॥७॥येतत्रदर्शनेयांतितेषांवि
स्मयकारकः॥शिवात्प्रत्यङ्मुखोनंदीकथंतिष्टेच्छिवालये॥८॥तत्राहीपिविरूपाः
क्षसन्निधौयोभिगच्छति॥प्रत्यङ्मुखंवृषंदृष्ट्वामहापापैःप्रमुच्यते॥९॥अथान्यपि २६१

राजेंद्रकथयामिकथानकं॥मायापूर्योद्विजःकश्चित्संजातोवेदपारगः॥१०॥तस्यपु
त्रत्रयंजातंकन्यैकाशुभलक्षणा॥भिषकवृत्तिमुपादायजीवनंचकरोतिसः॥११॥
दारैःसंयोजिताःपुत्राःप्रथग्भूतास्त्रयोपिच॥स्वयोपिच॥स्वस्त्रीपंचत्वमापन्ना॥
परांचिंतामवापसः॥१२॥विनाश्रमेणतस्थेयमितिबुध्याविचारयन्॥पुत्राणांयो
षितःस्त्रियःस्वस्वामीसेवनेरताः॥१३॥नमांपश्यंतिभुक्तंवासुखिनंवाथदुःखिनं॥
पंचहायनिकापुत्रीकथंपाकंकरोतिसः॥१४॥भिषजोमेकथंनित्यंपाकस्यावसरो
भवेत्॥विनितामेमृताभार्याभिन्नगेहोस्मिसांप्रतं॥१५॥विनाभार्यांनदुःखंमेजानं
तिपुत्रयोषितः॥यस्यभार्यागृहंतस्यगतदारस्यकिंसुखं॥१६॥यस्यभार्यागृहेनाः
स्तिपुत्रोवापिसुलक्षणः॥अरण्येतेननगंतव्यंयथारण्यंतथागृहं॥१७॥इतिसंचिं

ब्रसो. त्यबहुधागतोग्रामांतरंद्विजः॥केनचिद्दैवयोगेनभार्यामापसुलक्षणीं॥१८॥तत्रै
२६८ ववसतिंचक्रेकस्यसुरस्यपुरेद्विजः॥१९॥स्वसुतांतत्रचाहूयकस्मैचिद्द्विजसूनवे॥द
त्वावेदोपदिष्टेनसुखमास्तस्त्रियासह॥२०॥एवंकालव्यतिक्रांतेकदाचिद्दैवयोग
तः॥गतदीपेगृहेरात्रौशय्यांकेगतवान्द्विजः॥२१॥सहसातत्रसंसुप्तांस्वसुतांना
वबुध्यत॥वयसास्वस्त्रियातुल्यांनिद्रयाविकलेंद्रियां॥२२॥शयनीयेसुनिद्रा
णांस्वभार्यावयवैस्समां॥स्वभार्याबुद्धिमाश्रित्यशयनेबुद्धिमादधे॥२३॥पुनरु
त्थायविप्रोसौश्वासरोगीविचारयत्॥मयास्मिन्दिवसेश्वासनाशनंसासवंशुभं २६८
॥२४॥विस्मृत्यत्रायनंकस्मात्क्रियतेहंभजामितं॥इत्थंविचार्यविप्रोसावासव
ग्रहणेगतः॥२५॥दीपाभावेभ्रांतियोगात्यक्त्वाश्वासासवंभिषक्॥एककोण

गतंचासौमदिरापात्रमग्रहीत्॥२६॥समास्वाद्यपपौतत्ररात्रौभ्रांतिंगतोयदा॥पु
नःशय्यांसमासाद्यसुतासंगमवापसः॥२७॥पाकस्थलगताभार्याभोज्यमुत्पा
द्यकिंचन॥निरुद्धमागतांनिद्रांनवेदप्रियमागतं॥२८॥दीपोनिर्वाणतांयातोविद्व
तद्वारिमंदिरे॥दैवेनोत्पादितंयोगंकःसमर्थोव्यपोहितुं॥२९॥तातहमितिबुध्या
सायदोवाचविशंकिता॥तदाभिषक्परावृत्तःकिंकृतंदुष्कृतंमया॥३०॥कुतोयं
मेबुद्धिमोहोयथामद्येनजायते॥श्वासासवंपरित्यज्यपीताकिंवारुणीमया॥३१॥
हाहतोस्मीतिचुक्रो[illegible]ष्यगतोसौवारुणींप्रति॥दीपंचकारतत्कांतायासुता॥
पाकवेश्मनि॥३२॥[illegible] मयातुवारुणीपीतासुतासंगस्तथाकृतः॥अज्ञानेनकृ
तंचैतत्कागतिर्मे [illegible] भविष्यति॥३३॥भिषजोपिसुतासाध्वीविललापसुदुः

श्लो. खिता॥कागतिर्नौभविष्यतीतिकदाप्रातर्भविष्यति॥३४॥महापापसमायुक्तौतौग
२६९ तौब्राह्मणांतिकं॥आवाभ्यांचकृतंपापमज्ञानेननसंशयः॥३५॥दंडःसद्यो
हिनौदाप्योयेनस्यात्तांगतेनसौ॥क्षणोयुगायतेविप्राःसद्यःकार्याप्रतिक्रिया॥
३६॥देहोयंगर्हितोविप्रावेदमार्गविहंसतो॥इतिब्रूतमहाभागाःशरणंवः
समागतौ॥३७॥नोपादनिक्षेपमियंधरित्रीसोढाकथंदुष्टशरीरभाजो॥ज्व
ालाकलापैःकथमग्निदेवोह्युपेक्षतेनौकवलावसानं॥३८॥निजैर्मयुखैरवि
रत्रभीतःपापादिवेतिप्रतिकूलवर्त्मा॥नोदेतिकिंपापशरीरसंगंनवांछति २६९
प्रातरभूत्किलैतत्॥३९॥नारदउवाच॥इत्थंविजल्पतोराजन्स्तयोधर्म
सभायतः॥धर्माधिकारिणःसर्वेसंख्यायाचैकविंशति॥४०॥तत्रकश्चित्तदा

प्राहधर्मशास्त्रपुरःसरं॥स्वदेहस्यप्रमाणेनपिप्पलेकाष्ठमुत्तमं॥४१॥समानी
यस्वमानेनच्छिद्रंकृत्वास्वकांतनुं॥प्रवेश्यभस्मसात्कार्यस्वसुतांयोभिगच्छति
॥४२॥भृगोःपतनमित्येकेप्रवदंतीमनीषिणः॥गरादानंतथाचैकेजगुर्धर्मा
धिकारिणः॥४३॥यद्यस्योक्तंपुराविद्भिःप्रायश्चित्तंमतंद्विजैः॥तदंगीकृत्यतेर
प्रोचुःसर्वेधर्माधिकारिणः॥४४॥तदागौतमआयातोह्यकस्माद्धर्मसंसदि॥पृ
ष्टाज्ञापंतयोर्ज्ञात्वापितुःपुत्र्याःस्तथैवच॥४५॥प्रोवाचगौतमोराजन्सर्वान्
धर्मसमागमत्॥निरीक्ष्यलक्षणंसर्वंतयोश्चित्तसमुद्भवं॥४६॥गौतमउवा
च॥अहोह्येतौनयोग्यौस्तोमहादंडनिवेशने॥पाश्चात्तापेनगलितंपूतंचचित्तं
तयोरपि॥४७॥समक्षंदर्शयिष्यामिव्रतंशुद्धिकारणं॥शुद्धावेतौनसंदेहःप

ब्र.लो. श्चात्तापोमहान्यतः॥४८॥सीसंचतुःपलंतत्रमहद्दुग्धंकृतंतदा॥द्वाभ्यामद्धी
२७० ईतःपीतंभस्मीभूतंमृतोनतौ॥४९॥अग्नितौवलवान्राजन्पश्चात्तापोप
दातयोः॥तेनभस्मानौभवप्राजश्वेनुतुल्यंसीसंचतुःपलं॥५०॥तदाजयजया
कारःसर्वत्रासीन्महीतले॥आकाशात्पुष्पवृष्टिश्चवाद्यघोषयुताभवत्॥५१॥
योवह्निःसस्वयंशंभुर्यःशंभुर्वह्निरेवसः॥सकथंतापसंयुक्तोभस्मसात्कु
रुतेनघा॥५२॥अष्टमूर्त्तिस्वयंसाक्षाच्छिवएवावतिप्रजाः॥अष्टमूर्त्यासृजन्
विश्वंसंहरन्कल्पआगते॥५३॥साक्षाच्छिवएवावतिप्रजाः॥अष्टमूर्त्स्थावरंजंग २७०
मःसर्वंनशिवात्पृथगिष्यते॥तस्यापिभिषजःपूर्वंशिवेप्रीतिरभूद्द्विजाः॥५४॥
तत्प्रभावात्तयोरासीत्पश्चात्तापःसुदारुणः॥केनचित्कर्मयोगेनचैतज्ज्ञातम

संशयः॥५५॥स्वर्णहृत्मद्यपस्तेयीकश्चिद्दन्योभवद्द्विजः॥वेश्यासंगंचकारासौ
वेदविद्यापराङ्मुखः॥५६॥तस्यापिकथयाम्यद्यपंचपापरतस्यच॥इतिहासंनृ
पश्रेष्ठश्रूयतांमहामादरात्॥५७॥॥सूतउवाच॥॥एतद्वःशृणुयान्नित्यंभक्ति
भावेनयःपुमान्॥तस्यपापानिनश्यंतियथासूर्योदयेतमः॥५८॥गुप्तंवा
प्रकटंपापंमेतच्छ्रुत्वाचयोनरः॥पुण्यंयःकुरुतेस्वल्पंतदनंतायकल्पते॥५९॥
गुप्तंपापंविदित्वायोगोदानंचकरोतिसः॥मुच्यतेसर्वपापेभ्योभवपूजापराय
णः॥६०॥प्रयोगंशृणुयादादौस्वर्णदत्वायथाबलं॥द्विजातयेथगांदत्वाशिवपूजां
समारभेत्॥६१॥शिवपूजाप्रभावेनमुक्तिंगच्छतिमानवः॥शिवपूजासमंनास्ति
महापातकशोधनं॥६२॥तज्ज्ञयानवदन्पापंदत्वागांचतथैवच॥मिथ्येतियोव

ब्र.सो. दिन्मूढः स नरो नरकं व्रजेत् ॥ ४३ ॥ एतत्पुराणं किल दिव्यचक्षुः सर्वोपकाराय
२३१ विनिर्मितं यत् ॥ यश्चित्तशुद्ध्या शृणुयान्नरो यो नारी च तौ धन्यतरौ नृलोके ॥ ४४
॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे महापातकनिरूपणं नाम एकोनच
त्वारिंशतमोऽध्यायः ॥ ३९ ॥ ॥ ऋषय ऊचुः ॥ ॥ किमुवाच ततः सूत नैषधं प्रति
नारदः ॥ पंचपातकयुक्तो सौ कां गतिं गतवान्विभो ॥ १ ॥ एतन्नः शुश्रूषमाणानां
पापपारमपिछतां ॥ कथयस्व प्रसादेन येन सौख्यं लभामहे ॥ २ ॥ ॥ सूत उवाच ॥ ॥
नारदः पुनराहेदं श्रूयतामृषिपुंगवाः ॥ यस्यावधानतः सद्यो न पापं कुरुते नरः २३१
॥ ३ ॥ ॥ नारद उवाच ॥ ॥ ब्रह्मावर्तैकदेशे तु स्तंभतीर्थे वसन्पुरा ॥ ब्राह्मणः शिव
शर्मेति प्रसिद्धः पृथिवीतले ॥ ४ ॥ पंचपुत्रा हि तस्यासन्ते च चत्वार उत्तमाः ॥ धर्मा

र्थकाममोक्षाणामवतारा इवेति ते ॥ ५ ॥ शंभुर्विभुः प्रभुश्चैव स्वयंभूश्च चतुर्थकः ॥
इलाहः पंचमो ज्ञेयो यो दुर्बुधिर्निजालयं ॥ ६ ॥ ऋग्वेदादिकृदभ्यासाश्चत्वारः सूर्यव
र्चसः ॥ शिवसेवापरा नित्यं पंचमो न तथाकरोत् ॥ ७ ॥ परपुत्रेति चैवोक्तः पित्रा मा
त्रा स्वबंधुभिः ॥ तदा महदुदरे पीडा महती तिरुदन्नथा ॥ ८ ॥ पाणिभ्यां पिड्यते नेत्रे
मिथ्यालापं करोन्मुढः ॥ तन्मात्रा चौषधं चारु पीडाघ्नं तस्यै प्रदीयते ॥ ९ ॥ संध्यावंद
नवेलायां गृहं नैवाभिगच्छति ॥ स्नानार्थं चोपहूतश्च ज्वरव्याजं करोति सः ॥ १० ॥ स
पीडा मे मस्तके मातर्बहुधा प्रतिबाधते ॥ स्नानं नैव करिष्यामि पादशौचे मतिर्न
मे ॥ ११ ॥ शय्यागतः करिष्यामि भोजनं चारु मेर्पयत् ॥ चारुणी चैव वासांसि महं
देहि न चेतरान् ॥ १२ ॥ एवं दुष्टाद्विको जातः परं तु न परत्य सौ ॥ पितासंताडितोप्या

श्लो. २७२ सीद्बहुवादान्वदंस्तदा॥१३॥एतेकेपठितावालाःस्वज्ञातौमत्समापितः॥वेदघोषे
नमेप्रीतिःशास्त्राभ्यासेतथैवच॥१४॥अधीत्यवेदान्वैसांगान्कस्याग्रेकथयाम्यहं
॥दीनंवदनमादायव्याख्यांनैवकरोम्यहं॥१५॥संध्याकालेमहाप्रीतिःशयनेमेभि
जायते॥स्त्रीशंभोजनंभोक्तुंसवस्त्रंममशोभते॥१६॥एवमुक्तवतिवस्त्रःपुत्रे
तज्जनकोनलः॥किंकरोमिक्वगच्छामिकस्माद्दुष्टोभवत्सुतः॥१७॥गच्छंतेकिंसमु
द्भूतोव्यतिपातस्ययोगतः॥आधानसमयेकिंतुविष्टेर्वक्रोभविष्यति॥१८॥ज्वा
लाक्रांतेचलग्नेयंसंजातःपापबुद्धियुक्॥अतःपरंपरित्याज्योनेवासौममबा २७२
लकः॥१९॥बालत्वादुष्टवचनंभाषतेमद्भयान्नवै॥शिवशर्माजगामासौनांतंवै
कल्पजालके॥२०॥मयाकिंक्रियतेचात्रयद्भावितद्भविष्यति॥इष्टव्याबहवःपु

त्रायद्येकोपिगयांव्रजेत॥२१॥नेष्टव्याबहवःपुत्रायद्येकोपिसुरांपिबेत॥इत्येवंमु
निनांवाक्यंपरार्धंमेत्युपस्थितं॥२२॥एवंवैशोचतस्तस्यषड्वर्षाणिव्यतिक्रमात
॥प्राप्तेवैषोडशेवर्षेइलाभूद्द्विजबालकः॥२३॥नगरेभ्रमणंकुर्वन्वेश्यामेकांसु
दर्शनां॥तत्सामीप्यंजगामासौनिशिद्वारिस्थितांद्विजः॥२४॥तत्रालापंचकारोच्चैः
षड्जधैवतपंचमैः॥रागस्वरैस्तुपद्माक्षीवेश्यावशीचकारसः॥२५॥सापितंचारु
सर्वांगंसुवेषंरागशालिनं॥युवानंसधनंदृष्ट्वाप्रत्युत्थानंचकारह॥२६॥कोऽ
सित्वंचारुसर्वांगःसर्वाभरणभूषितः॥सद्योमेहृदयंहृत्वास्थितोसिमदनप्र
भः॥२७॥आगच्छमंदिरंतूर्णंविजनंवर्ततेधुना॥तवसंगमसंतुष्टाशिवामेसं
तुरात्रयः॥२८॥एवंतयोक्तेसौविप्रश्शरणंप्रविवेशह॥सिंहासनंमहादिव्यंब

त्राजस्मरविह्वलः॥२९॥सापितत्रगतातूर्णंसर्वंतांवृत्तपूर्वकं॥कामिनंतंवशीकृ
त्यस्थितैकासनगातदा॥३०॥हस्तमंसेविनिक्षिप्यविटत्योरःस्थलंमुदा॥चुंचुंबच
पराप्रीत्यावद्धन्नभोसिमहानिति॥३१॥परस्परंमहाप्रीतौवेश्याविप्रसुतौतदा॥
चक्रतूरागसंलापौकामार्त्तौमधुरध्वनि॥३२॥॥वेश्योवाच॥॥यःकरोतिमधुरा
धरपानंवारुणीरसविवर्द्धितगानं॥कादृदातिवनिजमानसंविहायविधि
नारतिदानं॥३३॥स्वग्रहेहिकजहोहिनरस्यकांतयाभवतिभोगपरस्य॥जन्म
नाभवतिचेद्गृहकृत्येरोषमेतिजननारतिकृत्ये॥३४॥आवयोस्तुनतथासुखहानि
र्ज्ञायतेप्रतिलवंनविरागः॥यत्ररागस्त्वनारतिलाभस्तत्रकिंभवतिप्रीतिवि
भंगः॥३५॥यौवनंयदिगतंतवदेहात्किंकरोषितदनंतरमेवं॥स्वर्गसौख्यमतु

लंरतिलोभात्स्वत्रियारप्यामृताहिलभंते॥३६॥धिग्धिगस्तुनरस्यसुजन्मयोगतो
नशायनंललनाद्यं॥वेष्टिताननजबाहुलतावैकामिनीकनकसुंदरदेहे॥३७॥सु
धासारंपित्वानिशिशशिकलाकांतिविलसत्सुधासौधेरम्येपररमणसंगेनसुरतौ
॥चलत्वेंखारूढापतनभयकांतांकगमिताइतिमांसप्रेमवदतिसुरतेसामरवधू
॥३८॥॥इडाभ्रूरुवाच॥॥धन्यास्मिकृतकृत्यास्मिममप्रीतिकरासिवै॥दृष्ट्वातेदर्शनं
जातंधन्योस्मिनात्रसंशयः॥३९॥तवेदंदर्शनंरात्रौकुतःस्याद्द्विजनेमम॥शुभा
मेशकुनाःकांतेकारितस्तैःसमागमः॥३९॥धन्योमत्सदृशोनास्तियेनतेदर्शनं
कृतं॥दरिद्रस्ययथाद्रव्यंतथामेतवदर्शनं॥४०॥कतिबालेदिनानित्वंमतिक्रां
तापुरेमले॥कथंमयानदृष्टासिनिर्भाग्येनचसुंदरी॥४१॥अतःपरंशुभंजातं

प्रसो
२७४

स्यास्येहंतवमंदिरे॥एतद्गृहंसमीचीनंरतियोग्यंविराजते॥४२॥त्वयाकापिकृत
कांतोनोवातद्वदसांप्रतं॥आवयोःसंगमोबालेमणिकांचनतांगतः॥४३॥अ
ष्टादशाब्दिकोहंवैत्वंतुषोडशवार्षिकी॥समीचीनःसमायोगोविधिनाप्रतिपा
दितः॥४४॥अनायासात्स्वयंप्राप्तास्तुवेषास्तुपरिच्छदाः॥अतस्त्वांपरित्यज्याहं
कयामिवरवर्णिनि॥४५॥वेश्योवाच॥नमेकांतोस्तिनभ्रातानमातानपि
तासखा॥त्वमेवमेपरंकांतरूपेणप्रतिभासिमे॥४६॥मद्गृहेविपुलंद्रव्यंत्वद्गृ
हेपिभविष्यति॥आवयोरतिसंयोगाद्दिनान्येवतुरात्रयः॥४७॥गच्छतुसर्वथाना
यत्तुजत्विंतांसुखीभव॥तवकेसंतिदायादाभार्याचापितरौतथा॥४८॥मयाय
थारपक्कांतंतथाचेत्स्वंकरिष्यति॥तदावयोर्महाप्रीतिप्रवाहोवृद्धिंगमिष्यति॥४९ २७४

तेनोक्तंश्रूयतांकांतेचत्वारोभ्रातरोमम॥वैदिकारतिमूढास्तेनजानंतिहिमुंविधिं
॥५०॥अहंतुबालभावेनबोधितोपिनचाहतः॥यदिवेदोदितंकुर्यांतदातेक्वस
मागमः॥५१॥त्रिकालंजलमध्येहंयदाशौत्यंभजामिचेत्॥तदाषंढतरोभूत्वा
क्वसुखंव्रजतेवपुः॥५२॥वेदमार्गेमहाकष्टंव्रतानांकारणेप्रिये॥दुःखव्याजेन
तत्सर्वंनादृतंपितृभाषितं॥५३॥कांतामेस्तिगृहेबालासुरूपाचारुदर्शना॥सा
पिव्रतपराजातासापित्यक्तामयाधुना॥५४॥एकस्मिन्दिवसेकांतेरतिलोभेन
चातुरः॥एकादश्यांगतःशय्यांतयाहंचनिवारितः॥५५॥धर्मशास्त्रेणमांबो
धंकृतवत्यतिसामया॥भुक्तापरंतुवैरोषस्तद्दिनान्नसमागतः॥५६॥संध्यायं
वंदनंनित्यंतथैवाध्ययनंप्रिये॥कःकरोतिहिमूढात्मात्यक्तास्त्वत्सदृशीवधूः॥

ब्रलो॰ २५५

॥५७॥वाद्यांतत्वयासमंबालेविचरिष्येयथासुखं॥पाटीरकुंकुमंचारुविलेपनक
तेप्रिये॥५८॥आनयिष्येमहार्घ्याणिवस्त्राणिवस्त्राणिभूषणानिच॥रंस्येत्वयास
मंकांतेपुष्पशय्यांविधायच॥५९॥अयमेवहिनःस्वर्गोनरकंनैवविद्यते॥किंप्रि
येबहुनोक्तेनतवदासोस्मिसांप्रतं॥६०॥नारदउवाच॥इत्थंवेश्यारतोविप्रो
मद्यंपीत्वातयासह॥द्रव्याभावेभवत्सोपिस्वर्णहानात्रसंशयः॥६१॥तस्यांचज
नयामासपंचपुत्रान्सुदारुणान्॥तन्मध्येलघुपुत्रस्यचकारशिवशंकरः॥
६२॥इतिनामतदातुष्टःप्रत्यहंब्रुवतीस्फुटं॥शिवशंकरएह्येहिदेहिचालिंगनंम २५५
म॥६३॥वत्समोनास्तिमेपुत्रस्त्रैलोक्येसुखदायकः॥शिवशंकरत्वद्वक्त्रंचंद्राभं
प्रतिभासते॥६४॥कालोजगामतस्यैवंपुत्रंलालयतस्तदा॥मृत्युवेलाभवत्त

॥५७॥वाद्यांतत्वयासमंबालेविचरिष्येयथासुखं॥पाटीरकुंकुमंचारुविलेपनक
तेप्रिये॥५८॥आनयिष्येमहार्घ्याणिवस्त्राणिभूषणानिच॥रंस्येत्वयासमंकांतेपु
ष्पशय्यांविधायच॥५९॥अयमेवहिनःस्वर्गोनरकंनैवविद्यते॥किंप्रियेबहुनो
क्तेनतवदासोस्मिसांप्रतं॥६०॥नारदउवाच॥इत्थंवेश्यारतोविप्रोमद्यंपीत्वा
तयासह॥द्रव्याभावेभवत्सोपिस्वर्णहानात्रसंशयः॥६१॥तस्यांचजनयामास
पंचपुत्रान्सुदारुणान्॥तन्मध्येलघुपुत्रस्यचकारशिवशंकरः॥६२॥इतिना
मतदातुष्टःप्रत्यहंवदतीस्फुटं॥शिवशंकरएह्येहिदेहिचालिंगनंमम॥६३॥
वत्समोनास्तिमेपुत्रस्त्रैलोक्येसुखदायकः॥शिवशंकरत्वद्वक्त्रंचंद्राभंप्रतिभा
सते॥६४॥कालोजगामतस्यैवंपुत्रंलालयतस्तदा॥मृत्युवेलाभवत्तस्ययम॥

श्रस्तो. २७६

दूतासमागताः॥६५॥यमदूतांस्तदादृष्ट्वाचतुःशस्त्रधारिणः॥क्रूररूपान्दीर्घवक्त्रा
न्रक्तश्मश्रून्भयंकरान्॥६६॥फणिरज्जुधरांश्चापिधिक्कारंकुर्वतोमुहुः॥शीतज्व
रसमाक्रांतःपपातःपृथिवीतले॥६७॥नजगामस्थिरंचेतस्तस्यदूतस्यदर्शनात्॥
प्राणाःप्रयाणसमयेकंठदेशेसमाश्रिताः॥६८॥रुरोदाश्रुमुखोदीनोदृष्ट्वावैरूपांपुर
स्थितां॥कालःसमागतःकांतेतवसंगेस्थितस्यमे॥६९॥रक्षकान्नभयाद्वीतंवद
भासीयतोमम॥त्वामृतेनविजानामिदैवतंपरमंशुभे॥७०॥चतुर्वर्षसहस्राणि
त्वत्संगाद्विगतानिमे॥पुत्रामेक्वगताकांतेसर्वेरक्षंतुमेभयात्॥७१॥पितरौमेप २७६
रित्यक्तौबांधवाश्चतथावधूः॥वेदाभ्यासःपरित्यक्तःपूर्वपातकयोगतः॥७२॥र
क्षमांचारुजघनेदुष्टेभ्योभयमागतं॥तदासाप्रत्युवाचेदंवेश्याचेलाम्बुवंप्रति

॥७३॥मृतौमेजनकौमाताभ्रातावैचैवसुहृत्तमाः॥कोपिकमात्पिनोरक्षेकालवे
गात्कथंचन॥७४॥कामभोगेनमेनाथकालोवेगेनवैगतः॥नज्ञातंमरणंनूनमा
वाभ्यांनिकरातं॥७५॥त्वद्वियोगेनमेनाथमरणंहिभविष्यति॥कपुनःसंगतिः
कांतेकुंभीपाकेभविष्यति॥७६॥इडाभ्रूरुवाच॥यदिवेदाःप्रमाणास्युर्धर्मशा
स्त्राणिसर्वशः॥आवयोःसंगमःकांतेकुंभीपाकेभविष्यति॥७७॥शिवशंकरश
र्माणंसुतंचाहूयभामिनी॥अत्रमेदर्शनंतस्यस्यात्तत्कर्तुमिहार्हसि॥७८॥त
योक्तःसंगतोनाथकिंचिद्ग्रामांतरंप्रति॥आगमिष्यतिचेत्तत्रादर्शनंतेभविष्यति
॥७९॥इत्युक्तेमुक्तकंठेनरुरोदज्वरपीडितः॥कंगावदवरोधवेलायांसस्मारशिवशं
करं॥८०॥शिवशंकरमांविहायकिंक्वगतोसीतिनिदह्यतेधुना॥बहुदुःखभया

ब्रस्रो॰ २७९

तुरं पतीरं परिपातु त्वरयैहि मां प्रति ॥८१॥ त्वमिहैषि यदाच्युतं तदाभयभीतिभीवि

ताखयं सुत ॥ सकलं किल भूमिमंडलं मम मिथ्या तव दर्शनं विना ॥८२॥ ॥सूत उ

वाच ॥॥ इत्येवं जपमानो सौ गगने गिरमशृणोत् ॥ मा भैस्त्वं शिवभक्तेति समाग

च्छति शंकरः ॥८३॥ तदा समागतः शंभुः साक्षाद् द्विजयासमं ॥८४॥ केनचिद्दैवयो

गेन पर्यटन् पार्वतीपतिः ॥ साक्षात्समागतस्तत्र यत्रासौ पतितो भुवि ॥८५॥ प्रा

णप्रयाणवेलायां स्मृतो हं पुत्रनामतः ॥ नामाभासेन ते नूनं मुक्तिं दास्यामि नि

र्भयां ॥८६॥ ॥नारद उवाच ॥॥ दूता अपि शिवं दृष्ट्वा पलायां चक्रिरे ततः ॥ यमं नि

वेदयामासुर्वृत्तांतं सकलं तदा ॥८७॥ यमः संहृष्टरोमा भूच्छिवपादावनुस्मरन् ॥

नामाभासतया मुक्तिं यो ददौ करुणार्णवः ॥८८॥ एवं विलक्षणं शंभोश्चरितं प्र

शिवदूते रिताः पुण्यपा यमदूताः भयंकराः ॥

२७९

तिभासते ॥ कः पारं वेद शंभोश्च तच्चरित्रस्य वै नग ॥८९॥ ॥नग उवाच ॥॥ एवं यः पा

पिनं शंभुः स्वनामाभासमात्रतः ॥ मुक्तिं ददौ वा पूर्वस्य केनचित्पुण्ययोगतः ॥

॥॥ नारद उवाच ॥॥ अनेन तु तृतीये राजन् भवे शंकरपूजनं ॥ शिवरात्रिसमायोगे कृतं

चाभूत्समागमात् ॥९०॥ ब्रह्महत्या कृता पूर्वमनेनज्ञानपूर्वकं ॥ तदर्थं द्वादशा

ब्दानि चरितं व्रतमुत्तमं ॥९१॥ मुनीनां योनिमथापन्नो गतजन्मनि स द्विजः ॥ सा रमे

यतनौ तेन कृतमेकादशीव्रतं ॥९२॥ शिवरात्रिव्रतं चापि कृतं यात्रा समागमा

त् ॥ तीर्थानि यात्रया सार्द्धं कृतानि कतिचित्तदा ॥९३॥ तेन पुण्यस्य योगेन शिव

शंकरनामतः ॥ मुक्तिं जगाम विप्रो सौ नात्र कार्या विचारणा ॥९४॥ कर्मणां गत

यो राजन् स्फुटं न ज्ञायते नृभिः ॥ मायाजवनिकाछन्नैः पूज्यः शंकर एव तैः ॥९

ब्रह्मो॰ २७८

राजापिराजभृत्योवायःकश्चननरोपिवा॥कृतंश्शुभाशुभंकर्मभुनक्त्यत्रनसंश
यः॥९६॥तस्मात्सर्वात्मनाराजन्प्रदोषेशंकरंमुदा॥शांतिनिवारेविशेषेणपश्यज
त्वंपार्वतीपतिं॥९७॥यस्यस्मरणमात्रेणकर्मबंधःप्रहास्यसि॥विनाचोग्रेणपु
ण्येनदेहशुद्धिर्नजायते॥९८॥वेदोक्तंनत्यजेत्कर्मप्राणैःकंठगतैरपि॥वेदावदं
तिकिंराजन्पापार्थंवचनंकदा॥९९॥कृच्छ्रचांद्रायणादीनिव्रतानिविधिपूर्वकं
॥शिवसंतोषणार्थायकर्त्तव्यानितिमेमतं॥१००॥यानिविष्णोर्व्रतानीहशिवभ
क्तःसमाचरन्॥सद्योमुक्तिमवाप्नोतिशिवव्रतपरायणः॥१॥योविष्णुःसस्वयं २७८
ब्रह्मायोब्रह्मासस्वयंहरः॥गुणातीतःस्वरूपेतुनगुणानांहिमुख्यता॥२॥निर्गु
णःशंकरःसाक्षान्निर्गुणश्चस्वयंहरिः॥जगदर्थंगुणीभूत्वासृजत्यवतिहंतिच

॥३॥तस्मात्सदाशिवंविद्धितंनिर्गुणंचपरात्परं॥कैवल्यदंषड्गुणेशंभज
भावेननृपते॥४॥भक्त्यातुसगुणंदेवंवशीकृत्यतरेन्नरः॥देहांतेमुक्तिमाप्नो
तिनात्रकार्याविचारणा॥५॥अष्टांगयोगनिरताध्यानाभ्यासेननित्यशः॥
योगीनोमुक्तिमापन्नागंगायांदेहपाततः॥६॥नान्योमुक्तिरुपायोस्तिनृणां
धर्मार्थकामिनां॥प्रायश्चित्तैःकृतैराजन्देहशुद्धिर्हिजायते॥७॥देहशुद्धौस्व
चेतोहिनिर्मलंजायतेनृप॥निर्मलेनैवचित्तेनश्रद्धाभवतिनिश्चला॥८॥तया
शिवकथाप्रीतिजन्मजन्मनिजायते॥कथाश्रवणतोराजन्भवेभक्तिर्हिव
र्द्धते॥९॥भक्त्युद्रेकतयाराजन्मुक्तिस्तस्यकरेस्थिता॥मातुःपयोधररसंपुन
र्नास्वादयेत्कदा॥१०॥नलउवाच॥सम्यगुक्तंत्वयायोगीन्संदेहोमेनिराकृतः

॥ परंतु पापिनां चिह्नमन्यजन्मानुगं न वा ॥११॥ ब्रह्मघ्नमद्यपादीनां प्रायश्चित्तानु
वर्तिनां ॥ किं द्वयोन्यां भवेज्जन्म तेषां चिह्नानि मे वद ॥१२॥ नारद उवाच ॥ महा
पातकजान्घोरान् नरकं प्राप्य दारुणान् ॥ महापातकिनो भूम्यां मृत्यां पापभोग
क्षजत्यतः ॥१३॥ खरशूकरश्वोष्ट्राणां मृगव्याघ्रचतुष्पदां ॥ पतंतो योनिमापन्नाः
पुनः पापोदरंभराः ॥१४॥ ब्रह्मघ्ना राजशार्दूलजायंते नात्र संशयः ॥ तेषां चिह्नानि
तान्येव ब्रह्महत्यावतां नृप ॥१५॥ मार्ज्जारबकसर्पाणां सुरापो योनिमाप्नुयात् ॥
कृमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात् ॥१६॥ तृणगुल्मलतात्वं च क्रमशो गु
रुतल्पगः ॥ कदाचिद्दैवयोगेन मानुष्यत्वे भवंति ते ॥१७॥ ब्रह्महा क्षयरोगी स्यात्
श्यावदंतस्तु मद्यपः ॥ कुनखी स्वर्णहा राजन् दुःश्चर्मा गुरुतल्पभाक् ॥१८॥ यो

येनैनं संविशात्येषां स तल्लिंगोभिजायते ॥ प्रायश्चित्तं तु कर्तव्यं यस्य पापस्य पापस्य
पापस्य यत्स्मृतं ॥१९॥ अथोपपातकानां च लक्षणं वच्मि तेऽग्रतः ॥ यत्कृत्वा नैव कु
र्वंति पातकं येन रोत्तमः ॥२०॥ अन्नहर्त्तामयावी स्यात् मुकस्त्रापहारकः ॥ सजी
वग्रहदाहि स्यात् कुष्ठरोगी न संशयः ॥२१॥ स्त्रीहंता षंढतां याति गर्भघ्नो बुद्धिवर्जि
तः ॥ बालहा पुत्रच्च चहीनः स्यात् स्त्रीपुंसोरेकलक्षणं ॥२२॥ पितृहोलूककाकोस्य
त्मातृहांधः प्रजा ॥ जायते ॥ मातृपितृस्तु यो भक्त उत्तमो भुक्तिमुक्तिमान् ॥२३॥ भ्रा
तृहा कलत्रः स्या॰ तत्सेवी स्वर्गमाप्नुयात् ॥ स्वसृहा दीर्घरोगी स्यात्तत्सेवी रा
ज्यभाक् भवेत् ॥२४॥ भूकरो मातृभ्रातृघ्नस्तद्भक्तः प्राप्नुयाद्धनं ॥ यामातृहा भ
वेद्वंध्यस्तद्भक्तः पितृलोकभाक् ॥२५॥ श्वश्रूहा केशकंती स्यात् तत्सेवी चिरजि

भ्र॰मो॰ २८० विनः॥गुरुहातुपिशाचस्यात्तत्सेवीशिवलोकगः॥२६॥ज्ञातिहाजगरःप्रो॰
क्तस्तत्सेवीविधिवद्व्रजः॥स्वर्णहास्तुचिहस्ताःस्यात्तद्रक्षोमहिमाप्नुयात्॥२७॥मा
तृस्वसृघ्नग्रुस्याद्विप्रोपिदुःप्रतिग्रही॥तत्पालितुपुरावित्स्याद्ब्रह्मलोकेमहीयते
२८॥वैश्यहातुदरिद्रीस्याद्न्योपिदानवर्जितः॥तयोपालीभवेत्स्वर्गीक्षत्रापिसु
धनोभवेत्॥२९॥शूद्रहाजीवघातीस्याद्न्योपिव्रतवर्जितः॥तत्पालकोभवे
द्दिव्यश्चक्षुरतिदिवंव्रजेत्॥३०॥वर्णिहाम्लेच्छजातीस्याद्न्योपिमदिरोदरः॥त
त्पालीजनलोकिस्याद्दीर्घजीवितथाधनी॥३१॥राक्षसोवनदाहिस्याद्रण्येविज २८०
नेवने॥विप्रस्त्रीद्रव्यहृद्व्यपिस्याद्वनेब्रह्मराक्षसः॥३२॥ततोमुक्तोभवेद्व्यालस्ततो॰
भिद्गोभवेन्नरः॥विप्रस्त्रीद्रव्यरक्षाणांपालकोमथुरांवसन्॥३३॥यामुनंचपयः

पिबामुक्तिमाप्नोतसंशयः॥गृहस्थंब्राह्मणंहत्वाकालसूत्रादिहाव्रजन्
॥३४॥खरयोनिंसमासाद्यमानुष्येश्वपचोभवेत्॥तत्सेवीतुनृपश्रेष्ठब्रह्म॰
लोकेमहीयते॥३५॥वानप्रस्थस्यहंतारोरौरवादिहमागताः॥शतजन्मसु
दारिद्र्यानिःप्रजाश्चभवंतिते॥३६॥वानप्रस्थस्ययेभक्तास्तेभूत्वाद्वारकोद
रे॥अंतेदृष्ट्वाहरिंयांतिवैकुंठंचततःशिवं॥३७॥दंडिनांचैवहंतारःशाज्म॰
स्माइहआगताः॥षष्टिवर्षसहस्राणिविष्ठायांक्रमयोभवत्॥३८॥ततश्चपच
तांयांतिशतजन्मनितेपुनः॥म्लेच्छयोनिंततःप्राप्यशतजन्मानितेथवै॥३९
॥जालंधरास्ततोभूत्वाशताईजन्मतःपरं॥नीचयोनित्वमापन्नावेश्यानु॰
चरतांगताः॥४०॥चर्मकारास्ततोभूत्वादशजन्मनिवैततः॥रजकास्तेभवं

श्लो.
२८१ तीहतथैवजन्मपंचकं॥४१॥भ्रमतांबहुकालेनतेषांश्रीकरुणानिधिः॥शं
करःकरुणांकुर्यात्तदामुक्ताभवंतिते॥४२॥सत्संगात्पापिनोदुष्टादुराचारा
विनिंदकाः॥त्यक्त्वामलंभवंत्येवपूतात्मानोनसंशयः॥४३॥साधुसंगःकथा
श्रेत्राद्दुत्तमोभवतिध्रुवं॥सत्कथाश्रवणेनैवसत्संगान्मुक्तिभाक्भवेत्॥४४॥
दंडिनांचैवयेभक्ताःकौपीनाच्छादतत्पराः॥तेषांस्थितिर्ब्रह्मलोकेपुनरावर्
जिताभवेत्॥४५॥नदेयंकांचनंतस्मैदंडिनेयदिदीयते॥निरयंनिवसेद्द
त्वाप्रतिग्राहितथैवच॥४६॥दंडिनोदूरतोदृष्ट्वाप्रणमेद्दंडवद्भुवि॥भिक्षामृते २८१
गृहीगेहेनोकुर्युर्दंडिनःस्थितिं॥४७॥तद्भार्यांनैवपश्येतभीतवत्त्वविशन्गृहं
॥धेनुदोहनमात्रेणस्थित्वादंडीव्रजेद्गृहात्॥४८॥पादद्वकप्रणवध्यानीह्येका

कीविजनेवसन्॥आयुःप्रतिक्षमाणोसौयतिःशिवमयोभवेत्॥४९॥अथान्यद
पिवक्षामिपापीनांलक्षणंपृथक्॥पुण्यानांचैवतत्संगाद्दुच्यतेस्वल्पपापिनां॥५०
गुरुपुस्तकहद्विरोऽकवयोभवतिध्रुवं॥गुरुसेवापरंस्त्राज्ञोविद्याप्रपद्दिवंव्र
जेत्॥५१॥मुकःश्रवणहृकघ्रातस्त्रीधेनुविप्रदुःखदः॥तत्सेवाभिरतस्यांतेगो
केस्वस्थितिर्भवेत्॥५२॥अग्निदोगरदश्चैवशास्त्रपाणिर्धनापहः॥क्षेत्रदारहरश्चै
वषडेतेह्याततायिनः॥५३॥तेक्रमाल्लोहितोदंचतपनंकालसूत्रकं॥कुंभीपाकंर
शाल्मलिंचसंप्राप्यहाव्रजन्पुनः॥५४॥कुष्टीचपांडुरोगीचापस्मारीचज्वरीस
क्षयी॥क्रमेणैवप्रजायंतेषडेतेह्याततायिनः॥५५॥पिशुनःपूतिगंधस्यात्तैल
हत्तैलविक्रयी॥शास्त्राघातंचयःकुर्याद्व्यासःकारुकोभवेत्॥५६॥न्यायान्यायंच

ब्रह्मो॰ २८२

यः कुर्याद्बको भवति वै जले ॥ सुगंधहस्तेयो वै नूनं छुछुंदरो भवेत् ॥ ५९ ॥ मुखको
धान्यहारि स्याद्धान्यहारि च भारवाट् ॥ पशुहृत्त्वजतं याति फलचौर्यात्तु वानरः
॥ ६० ॥ मधुहृच्च भवेद्दंशो गोहृत्क्रोधात्वमाप्नुयात् ॥ सिद्धान्नहरणाद्राजन्मक्षिका
ः स्यातजन्मभिः ॥ ६१ ॥ घृतहारी स्नेहपादिक्षारहृत्स्त्रियपादवान् ॥ स्वत्वहृद्वाल रोगी
स्यात्यात्रहृत्काकरेक्षणः ॥ ६२ ॥ पंचरत्नहरो राजन्पंगुरेव प्रजायते ॥ भुक्त्वा नर
कदुःखानि तदानी तु दिवं व्रजेत् ॥ ६३ ॥ तुलसीपिप्पलं बिल्वं चूतं चाशोकमे
व च ॥ वटं चामलकीं चैव तथान्यांश्च महाद्रुमान् ॥ ६४ ॥ सरसेतुविभागं च वा॰ २८२
पिभागं च वापिरूपादिकं तथा ॥ देवालयं मठं धर्मशालीं देववनादिकं ॥ ६५ ॥ ये
हन्युर्दुर्धियस्ते पि षष्टिवर्षशताधिकं ॥ निरये निपतंत्येते गोघ्नाश्चैव विशेषतः

॥ ६६ ॥ प्रदर्शनार्थमेतन्नेमयोक्तं स्तेयकर्मणि ॥ द्रव्यप्रकारा हि यथा तथैव प्रा॰
णिजातयः ॥ ६७ ॥ यथाकर्मफलं प्राप्य तिर्यक्त्वं कालपर्ययात् ॥ जायंते लक्षणैर्भ्र
ष्टा दरिद्राः पुरुषाधमाः ॥ ६८ ॥ ततो निःकल्मषीभूताः कुले महति भोगिनः ॥ जायं
ते विद्ययोपेताः शिवोयज्ञनमनिस्मृतः ॥ ७० ॥ विहितस्याननुष्ठानान्निंदितस्य च
सेवनात् ॥ अनिग्रहाच्चेंद्रियाणां नरो निरयमृच्छति ॥ ७१ ॥ तस्मात्तेन हि कर्त्तव्यं प्राय॰
श्चित्तं विशुद्धये ॥ श्रद्धोभूत्वा यजेच्छंभुं कथां श्रुत्वा शिवस्य च ॥ ७२ ॥ एवमस्यां तरा॰
त्मा च लोकश्चैव प्रसीदति ॥ ७३ ॥ महापापोपपापानां नाशनं शिवपूजनात् ॥ श
विधिना क्रियमाणं च बिल्विदलसमन्वितं ॥ ७४ ॥ किमत्र बहुनोक्तेन श्रद्धायस्य
शिवेपरा ॥ स एव शंभुरूपोस्ति न जना नात्र नास्ति संशयः ॥ ७५ ॥ कुरु राज्यं महाभाग

ब्र॰सो॰ भजभावेन वै भवं॥अंते मुक्तिमवाप्नोति शिवपादाभिवंदनात्॥३६॥मया पि
२८२ भक्तियोगस्तु पूर्वं प्राप्तो विधेर्मुखात्॥तेन विश्वेश्वरे देवे भक्तिर्मे निर्मलानघ॥
३७॥यथाहं ब्रह्मणा दिष्टो भक्तियोगेन नृपेश्वर॥ तथैवाहं सदा कुर्यात्त्वां प्रतं कु
रु तां शिवे॥३८॥इत्युक्त्वांतर्दधे सद्यो वीणां विरणयंस्तदा॥नारदो गगने गच्छन्
महादकेशं महेश्वरं॥३९॥इदं यः श्रद्धया युक्तो यः पठेच्छिवसन्निधौ॥तस्य पा
पौघशांतिः स्याच्छृणुयाद्वापि यो नरः॥४०॥इदं पवित्रं परमं रहस्यं यः श्रावये
द्द्विजमुख्यान् जनौघान्॥तांस्तारयित्वा भवसागरात्स दासः प्राप्नुयाद्भक्तिमि २८३
हेशयोः स्फुटं॥४१॥ ॥इति श्रीस्कंदपुराणे बृहद्ब्रह्मोत्तरखंडे पंचपातकीमो
क्षनिरूपणो नाम चत्वारिंशोऽध्यायः॥४०॥ ॥ऋषय ऊचुः॥ ॥भक्तियोगमथै

तन्नौ नी वदस्व त महामते॥सारात्सारतरं ब्रूषे भवभक्तिभरान्वितं॥१॥ तृ
प्तिर्नाद्याप्यभूदस्मात्छ्रुत्वा चैव पुनः पुनः॥जानासि त्वं भगवतो माहात्म्यं त्रि
पुरद्विषः॥२॥उपासितो यतः सम्यक् भगवान्बादरायणिः॥ तत्प्रसादात्त्व
या लब्धं ज्ञानं तत्पारमेश्वरं॥३॥दुर्लभं सर्वशास्त्रेषु मुनीनां च महात्मनां॥ य
त्प्रसादेन नो सूत किं स्यात्तद्वदाधुना॥४॥सूत उवाच॥ ॥यदुक्तं ब्रह्मणा पूर्वं ना
रदाय महात्मने॥प्रीतेन मनसा तेन तच्छृणुध्वं द्विजोत्तमाः॥५॥सत्यलोके
सुखासीनं ब्रह्माणं तेजसां निधिं॥ऋषिभिर्मुनिभिः सिद्धैर्वेदैः सांगैरुपासि
तं॥६॥संगीयमानं गंधर्वैः स्तूयमानं मरुद्गणैः॥दृष्ट्वा प्रणम्य विधिवन्नारद
स्तमयाब्रवीत्॥७॥ ॥नारद उवाच॥ ॥देवदेव जगन्नाथ चतुर्मुख सुरोत्तम॥

ब्रह्मो. २८५

भक्तियोगस्यमाहात्म्यंदेवदेवस्यशूलिनः॥८॥ब्रह्मोवाच॥प्रणम्यशंकु
रंशांतमप्रमेयमनामयं॥परंज्योतिरनाद्यंतंनिर्गुणंतमसःपरं॥९॥भक्ति
योगंप्रवक्ष्यामिशृणुनारदसुव्रत॥भक्तियोगस्यमाहात्म्यंयथाशंभोर्मया
श्रुतं॥१०॥भक्तिर्भगवतःशंभोर्दुर्लभाखलुदेहिनां॥कथंचिद्यदिसालब्धा
तेषांनैवास्तिदुर्लभा॥११॥भक्त्यैवप्राप्यतेराज्यमैंद्रत्वंमत्पदंचयत्॥विष्णु
त्वमपिमुक्तिंचनूनंप्राप्नोतिनारद॥१२॥शुभानामशुभानांचकर्मणांराशि
संचयं॥करोतिभस्मसाद्भक्तिर्भवस्याग्निर्यथैधनं॥१३॥भवेन्म्लेछापियदिवा २८५
भवभक्तिसमन्विताः॥नतत्समश्चतुर्वेदीनाग्निष्टोमादियज्ञकृत॥१४॥अपि
पापानिघोराणिसप्रकुर्वन्नरोयदि॥लिप्यतेनसपापौघैर्भक्तिर्भवतिचेच्छिवे॥

॥१५॥शिवभक्तामहात्मानोमुच्यंतेतेनसंशयः॥अपिदुःकृतकर्माणःप्रसा
दाच्छूलिनोमुने॥१६॥सकृत्पूजयतेयस्तुभगवंतमुमापतिं॥अश्वमेधा
दधिकंफलंभवतिनारद॥१७॥आजीवितंचचलंज्ञात्वापद्मपत्रइवोदकं॥मृतेदु
रंतान्नरकपतनभीतःकुर्याच्छिवेमतिं॥१८॥शिवेमतिंप्रकुर्वाणःसंसारादतिभी
षणात्॥मुच्यतेमुनिशार्दूलमातिःशर्वेतिदुर्लभा॥१९॥भवव्यालमुखस्था
नांभीरूणांदेहिनांमुने॥तस्माद्विमोचकःस्तेषांमहादेवइतिश्रुतिः॥२०॥भक्ति
शिवेयदिभवेन्नतस्यकस्यचिद्भयं॥भवार्णवंतरत्येवप्रसादात्परमेष्ठिनः॥२१॥
स्वर्गार्थिनांमुमुक्षूणांब्रह्मत्वमपिकांक्षिणां॥भक्तिरेवविरूपाक्षेनान्यःपंथा
इतिश्रुतिः॥२२॥आदिमध्यांतरहितेपिनाकिनिजगत्पतौ॥सदामनीषिभिःका

र्योभक्तिरेवहिनारद॥२३॥सर्वमन्यत्परित्यज्यभक्तोभवहरेमुने॥भक्तोभ
विष्पतिक्षिप्रंतस्यशंभोरनुग्रहात्॥सर्वश्रेष्टइतिज्ञात्वाशिवेभक्तिःस
दाकुरु॥२४॥यस्यप्रसादलेशेनब्रह्मत्वंप्राप्तवानहं॥विष्णुत्वमपिविष्णुश्च
सशिवःकैर्नसेव्यते॥२५॥शिवेदानंशिवेहोमःशिवेस्नानंशिवेजपः॥अक्ष
यानिफलान्येषामित्याहभगवान्शिवः॥२६॥कुरुक्षेत्रेवसतोयत्फलंतु
नैमिषेतथा॥प्रयालैंगेचप्रभासेचगंगासागरसंगमे॥२७॥रुद्रकोट्यांगया
यांचशालिग्रामेमहेश्वरे॥पुष्करेभारभूतेचगोकर्णेमंडलेश्वरे॥२८॥तत्फलं
दिवसेनैवभक्त्याशिवार्चनाद्भवेत्॥नास्तिलिंगार्चनात्पुण्यमधिकंभुवनत्र
ये॥२९॥लिंगेर्चितेखिलेविश्वमर्चितंस्यान्नसंशयः॥माययामोहितात्मानो

नजानंतिमहेश्वरं॥३०॥अनुग्रहाद्भगवतोज्ञानंत्येवहिनारद॥यत्पूजितंशि
वंदृष्ट्वाप्रणमेद्भक्तिभावतः॥३१॥पुंडरीकस्यसंज्ञस्यफलंभवतिनिश्चितं॥पृ
थिव्यांयानितीर्थानिपुण्यान्यायतनानिच॥३२॥शिवलिंगेवसंत्येवतानिस
र्वाणिनारद॥तस्माल्लिंगंसदापूज्यंभक्तिभावेननिश्चितं॥३३॥सःस्नातःस
र्वतीर्थेषुसर्वस्मादधिकश्चसः॥यस्तुलिंगार्चनंदृष्ट्वादेवानन्यांश्चपूजयेत्॥
३४॥रत्नंविहायमूढात्मायथाकाचमपेक्षते॥शंभुरूपेणतानर्चेत्सधन्योना
त्रसंशयः॥३५॥चतुर्दश्यामथाष्टम्यांपौर्णिमास्यांतथैवच॥अमावास्यांचयो
भक्त्यापूजयेदिंदुशेखरं॥३६॥सस्नातःसर्वतीर्थेषुगयागोदादिषुध्रुवं॥सपुण्
यात्मासधर्मात्मासर्वयज्ञेषुदीक्षितः॥३७॥शिवलोकमवाप्नोतिदेहांतेदुर्ल्ल

ब्र.लो. भंमुने॥शिवार्चनरतोनित्यंमहापातकसंभवैः॥३८॥दोषैःकृतैर्नलिप्येत
२८६ पद्मपत्रमिवांभसा॥दर्शनाच्छिवभक्तानांसकृत्संभाषणादपि॥३९॥अतिरा
त्रस्ययज्ञस्यफलंभवतिनारद॥ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चैवांत्यजा
दयः॥४०॥शिवभक्ताःसदापूज्याःसर्वावस्थांगतोपिवा॥नास्याचारंप्रतीक्षे
त्तन्नकुलंनकुलंनव्रतंतथा॥४१॥त्रिपुंड्रांकितभालेनपूज्यएवहिनारद॥
कर्मणामनसावाचायःस्तुभक्तान्विनिंदति॥४२॥निरयान्निःकृतिर्नास्ति
तस्यमूढात्मनोमुने॥शिवभक्तान्वर्जयित्वासर्वेषांशासकोयमः॥४३॥यः २८६
पुनःशिवभक्तानांशिवएवनचापरः॥नशिवाश्रमिणोमौंजीनदंडोनकमं
डलुं॥४४॥नैंकाषायवासांसिभक्तिरेवात्रकारणं॥तस्मात्पूज्याश्चमान्याश्च
व

सचारास्तुविशेषतः॥४५॥यदिभक्ताःपशुपतौपापकर्मसुयेरताः॥यमस्य
वदनंतेपिनैवपश्यंतिनारद॥४६॥येपुनःशांतमनसःशिवभक्ताजितेंद्रि
याः॥मर्त्याधर्मसमासाद्यविज्ञेयास्तेगणेश्वराः॥४७॥मृतस्यजीवतोवापि
शिवभक्तस्यनारद॥यमाद्भयंनतस्यास्तिराज्ञश्चैवतुकाकथा॥४८॥आख्या
यंकथयिष्यामिशृणुनारदयत्पुरा॥उज्जयिन्यांनृपोह्यासीन्नाम्नासत्यध्व
जोमुने॥४९॥धर्मात्मासत्यसंकल्पःप्रजापालनतत्परः॥भुक्त्वासमस्ताम
वनींकालेनाथदिवंगतः॥५०॥यवसुश्रुतइतिख्यातःपुत्रस्तस्यमहात्मन
ः॥महाकालार्चनरतस्तन्निष्ठस्तत्परायणः॥५१॥नधर्मेणप्रजाःशास्तिराज
धर्मबहिःकृतः॥असाधून्संपरित्यज्यसाधून्वैहंत्यसौनृपः॥५२॥प्रजा

श्रसो॰ नोकुशलंनास्तिसर्वत्रपरिपंथिनः॥यत्तांश्चयज्वनोदृष्ट्वास्वेच्छाविध्वंसयंति
२८ तान्॥५२॥गतेवर्षसहस्रेतुराज्येतस्मिन्वसुश्रुते॥मृत्युकालोथसंप्राप्तोदेहि
नामतिभीषणः॥५३॥पापिष्ट इतिसंमत्वासंप्राप्तायमकिंकराः॥शिवभक्त
हृतिप्राप्तास्त्रीनेत्राःशूलधारिणः॥५४॥शिवदूतैःसमानीतंविमानंसर्व
कामिकं॥यमदूतास्त्वतिक्रूराःपाशदंडासिपाणयः॥५५॥आहर्तुमुद्यताःस
र्वेनृपंतंयमकिंकराः॥गणेश्वरास्ततःक्रुद्धादृष्ट्वातान्यमकिंकरान्॥५६॥
नीतोशिवपुरंदिव्यंपुनर्गवर्तिदुर्लभं॥निराकृतास्ततःसर्वेयमदूताःप्र २८
दुद्रुवुः॥५७॥अथतेकिंकराःसर्वेयमंगत्वेदमब्रुवन्॥अयंपापिष्ठभयदंता
भग्नशास्त्राविचेतसः॥५८॥॥यमकिंकराऊचुः॥॥शृणुधर्मययावृत्तमीश्वर

स्यगणेश्वरैः॥सर्वेनस्मांस्ताडयित्वानीतःपापोवसुश्रुतः॥६०॥नयज्ञैर्मज
तेदेवान्नविप्रान्नातिथीनपि॥नधर्मेणप्रजाःपातिकथंशिवपुरंगतः॥६१॥
तत्त्वधर्मविजानासिधर्मदंडधरोभवान्॥तस्माद्ब्रवीहिभगवन्ज्ञात्वाज्ञाका
रिणोवयं॥६२॥एवंतेषांवचःश्रुत्वाधर्मराट्सूर्यनंदनः॥वचःप्रोवाचगंभीरं
किंकरान्प्रतिनारद॥६३॥॥यमउवाच॥॥देवासुरमनुष्याणांसर्वेषामपिप्रा
णिनां॥शास्ताहंनास्तिसंदेहःशिवभक्तमृतेकिल॥६४॥माहात्म्यंशिवभक्ता
नांकोवाविंदतितत्त्वतः॥तेषांनियंताभगवान्महादेवोनचापरः॥६५॥शिव
भक्तामहात्मानःसदाशर्वार्चनेरताः॥अप्याश्रमावाहिनावाहिनावात्यजं
तान्प्रयत्नतः॥६६॥वर्णोवर्णाश्रमाचारउअपितेनविवर्जिताः॥शंकरेयदि

भक्ताः सान्त्वनाम्याः पूज्या एव हि ॥६६॥ भवद्भिः परिहर्त्तव्याः शिवभक्ताः प्रयत्न
तः ॥ पापकर्मण्यपि रतास्तेषामंतो न विद्यते ॥६७॥ बिभेमि शिवभक्तेभ्यः सिंहा
दिव यथा मृगाः ॥ श्वेतस्याहरणे पूर्वं महादेवेन घातितः ॥६८॥ ततः प्रभृत्यहं त्रा
स्तातद्भक्तानां न किंकराः ॥ योसौ वसुश्रुतो राजा न प्रजापालयन् यदि ॥६९॥ त
यापि शंकरे भक्तिर्मनोवाक्कायकर्मभिः ॥ बिल्वैः समर्चयेन्नित्यमेकांते भ
वभक्तिमान् ॥७०॥ तथा प्रसादाद्देवस्य पापं स्पृशति तं कथं ॥ सकृत्यत्रयति
यो देवं महाकालं तमीश्वरं ॥७१॥ गणेश्वरैः समंतव्यो भवद्भिरिति किंकराः
॥ यः सदार्चयते देवं महाकालं त्रिलोचनं ॥७२॥ सर्वपापविनिर्मुक्तो याति
शैवं परं पदं ॥७३॥ एवं यमस्य वचनं श्रुत्वा ते यमकिंकराः ॥ तूष्णीमासाद्य

ते सर्वे वै बभूवुर्विगतज्वराः ॥७४॥ तस्मात्पूज्यो महादेवस्तद्भक्तश्च विशेषतः
॥ भक्तानां पूजनाच्छंभुः प्रीतो भवति नारद ॥७५॥ शिवस्य नित्यतत्रस्य किंनामन्
क्रियते जनैः ॥ यत्कृतं शिवभक्तानां तेन प्रीतो भवेच्छिवः ॥७६॥ देवान् सर्वान्
परित्यज्य भज नारद शंकरं ॥ भक्तियोगोयमुदितो महद्ध मस्तु न संशयः ॥७७॥
भवभक्तियोगमतुलं हृदि धृत्वा कुरु कर्मजालमखिलं गतमूलं ॥ गिरिजासमे
तमजितं धृतशूलं बहुपुष्परत्ननिचयैर्यजस्व नो ॥७८॥ सूत उवाच ॥ श्रुत्वा
चेमं भक्तियोगं भवस्य दानं दाद्यन्मानवो यो भवार्थं ॥ भक्तिं सोपि प्राप्य शंभोः प्र
याति भुक्त्वा भोगान् पुत्रदारादियुक्तान् ॥७९॥ संक्रांतौ वाम्राद्धकाले प्रभाते ती
र्थे यो वा श्रद्धानः पवित्वा ॥ सोपि त्र्यक्षे भक्तियोगं विधाय प्राप्नोत्यंते शांभवं धा

ब्रसो० मनूनं॥८॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवभक्तियोगनि-
२८९ रूपणंनामएकचत्वारिंशोऽध्यायः॥४१॥ ॥ऋषयऊचुः॥ ॥श्रुतंकथयय-
त्तेसूतप्रतिवाक्यंसुधोपमं॥मास्त्वस्माकंवियोगस्तेशैवाःकथयतःकथा
॥१॥पंचाक्षरस्यमहिमात्वयादौपरिकीर्तितः॥ततःकल्माषपादस्यकथा
गौतमवादतः॥२॥गोकर्णस्थापनंपश्चाद्रावणागमनादिकं॥मोजवस्य
यात्रायांशिवरात्रिकथानके॥३॥चांडाल्यामोक्षणंचैववादेवैमानिकैः
सह॥कल्माषमोक्षणंचैवशिवसन्निधिमात्रतः॥४॥शिवस्याभासपूजायांचो २८९
ज्जपिन्यांबलवादता॥शिवपूजामहात्म्येचब्राह्मणीशिवदर्शनं॥५॥ब्राह्मणी
तनयौचैवौशांडिल्यविधिकारकौ॥ततःप्रदोषमहिमाश्रुतोध्यायचतुष्टये॥

॥६॥सोमवारव्रतेचैवचंद्रांगदकथातथा॥तस्यपातालगमनंतथैवागमनं
विभो॥७॥पातालवर्णनंतत्रश्रुतंविस्मयकारकं॥सीमंतीनिघुग्मपूजातत्र
स्त्रीत्वंद्विजस्यच॥८॥जन्मांतरंतयोश्चैवशिवसेवकवर्णनं॥भद्रायुश्चरितंच
ऋषभान्मंत्रवर्णनं॥९॥शैवंकवचमाख्यानंयद्दत्तंराजसूनवे॥राज्यंभद्रा
युषःप्रोक्तंवनांतेशिवदर्शनं॥१०॥शिवयोगीकथायांचपद्मसेनकथाशुभा॥वा
मदेवकथायांचभस्मनोमहिमातथा॥११॥त्रिपुंड्रमहिमाचैवभिक्षुश्रद्धाशिवोप
रि॥मर्कटाख्यानंरुद्राक्षमहिमातथा॥१२॥पराशरोक्तरुद्रजपमहिमापुत्रजी-
वनं॥शारदास्वपतिप्राप्तिरुमामाहेश्वरेव्रते॥१३॥कथाश्रवणमाहात्म्याद्राक्षस
स्यचमोक्षणं॥तिथीनांनिर्णयःसूतसंव्रतःसमुदाहृता॥१४॥महादानविधिश्चैव

श्लो॰ २९०

वनादिचक्रगुरोस्तथा॥ गायत्र्या महिमा चैव प्रायश्चित्तविधिस्ततः॥ १९॥ नल
नारदसंवादे पातकी लक्षणं गतिः॥ निर्णयः पंचपापानामुपपातकसंयुतः॥ २
०॥ इत्येष भूमेक्षिप्तं प्रोक्तं पुत्र शंकरनामतः॥ लक्षणं पापिनां प्रोक्तं जन्मांतरस
मुद्भवं॥ २१॥ भक्तियोगसमाख्यातो ब्रह्मनारदवादतः॥ शिवे भक्तिर्भवेद्येन तथो
क्तं च स्फुटं हि नः॥ २२॥ इदानीं श्रोतुमिच्छामो मंत्रराजेन संयुतं॥ किं वस्तिति स
मर्प्यस्याच्छिवोपरि च तत्फलं॥ २३॥ केन वा मंत्रराजेन किमर्प्यं शंभवे सदा॥ धा
न्यारोपे फलं ब्रूहि पुष्पारोपे शिवोपरि॥ २४॥ उत्तरोत्तरतः पुण्यविशेषकेन जा
यते॥ प्रमाणं धान्यपुष्पाणामारोपे किं फलं महत्॥ २५॥ यत्तु नस्त्वकथायां नः
एतन्नांतरगतं वद॥ धन्योसि कृतकृत्योसि जीवेत्त्वं शरदां शतं॥ २६॥ सूत उ॰ २९०

पंचाक्षरेण मंत्रेण धान्यं पत्र फलानि च॥ यः प्रयच्छति शर्वाय तदनंतफ
लं स्मृतं॥ २७॥ सप्तकोट्यधिकः प्रोक्तः स्वयं पंचाक्षरो मनुः॥ पंचाक्षरस्तु शू
द्राणां विप्राणां प्रणवाधिकं॥ २८॥ स्त्रीणां पंचाक्षरः श्रेष्ठः स्त्रीणां ब्रह्मभुवाम
पि॥ शैवाद्धि प्राप्य मनुं प्राप्यते नैव शिवमर्चयेत्॥ २९॥ ब्रह्महत्यासमं पापं पं
च वर्णो निवारयेत्॥ सकामो वाथ निष्कामः पुमान् शंकरमर्चयेत्॥ ३०॥ अरु
णोदयवेलायां तस्मादुत्थाय सत्वरः॥ विभूतिं धारयेद्भाले पंचाक्षरमुखेन रः॥ ३१॥
स्वासने स्वगुरुं स्मृत्वा जपाजापं विधाय च॥ गुर्वष्टकं पठित्वा तु पठेत् श्लोक
त्रयं त्विदं॥ ३२॥ प्रातर्नमामि भवभीतिहरं महेशं पादारविंदयुगलं विधिविष्णु
वंद्यं॥ भक्तौघचित्तविलसद्धृदमरंनगेंद्रकन्याकरार्चिततलं विमलस्वरूपं॥

ब्र.सो. ॥२९॥प्रातर्भजामिगिरिजार्द्धधरंहरंतंभालेक्षणंसकलसौख्यकरंसुरेशं॥अ
२९१ सेंद्रनारदहरिप्रमुखैःसुसेव्यपादांबुजंवृषगतिंशुभपंचवक्त्रं॥३०॥प्रातः
स्मरामिकमलायतलोचनंतंश्रीचंद्रशेखरधरंकमलासनस्थं॥नागेंद्रहा
रवलयंगजचर्मपृष्ठंतंशंकरंसकलरोगविनाशदक्षं॥३१॥इदंश्लोकत्रयं
पुण्यंपठित्वाशैवउत्तमं॥सर्वपापविशुद्धात्माशिवसायुज्यमाप्नुयात्॥३२॥
ततःशौचविधिंकृत्वाधर्मशास्त्रानुसारतः॥देवालयतडागादिसामीप्यपरि २९१
वर्ज्यच॥३३॥द्वादशांगुलमादायकारंजंदंतधावनं॥यथाकालोद्भवेनैवमुख
शुद्धिंसमाचरेत्॥३४॥ततःस्तीर्थंसमागत्यपादौप्रक्षाल्ययत्नतः॥नाभिमात्रे
जलेगत्वातीर्थान्यावाह्यमंत्रवित्॥३५॥नासिकानयनेकर्णौपिधायवदनांबु

जं॥करांगुलीभिराचांतःप्रमान्पंचाक्षरंजपन्॥३६॥निमज्ज्योन्मज्ज्यतत्रैव
मंत्रस्मरणपूर्वकं॥तीरेंजलित्रयंदत्वाकृत्वावैतीर्थतर्पणं॥३७॥धौतव
स्त्रद्वयंचारुधृत्वात्रिपुंड्रकं॥पंचाक्षरेणसर्वत्रकर्तव्यंनात्रसंशयः॥३८॥य
स्मिन्तीर्थेचयेदेवाःशिवाद्यास्तान्प्रपूज्यतान्॥विश्वस्यदर्शनंकृत्वागृहमा
गत्यसत्वरः॥३९॥पूजासंभारमादायशिवसान्निध्यमाश्रयेत्॥आदौगणप
तिंनत्वाहनुमंततः॥४०॥वृषस्यपूजनंकृत्वानत्वाकीर्तिमुखंततः॥चंडद्व
यंप्र[illegible]णम्याथगौरीपूजांसमाचरेत्॥४१॥ततस्तुस्वासनेस्थित्वाभूतोत्सा
दनपूर्वकं॥दिग्बंधंचविधायाथसर्वंपंचाक्षरेणवै॥४२॥प्राणायामत्रयंकृ
त्वातथारुद्राक्षधारणं॥सहस्रंवाततोर्धंवातदर्धमथापिवा॥४३॥एकंस्व

श्लो. २९२

त्रिरस्मिन्नाथभस्मनोद्धूल्यस्ववपुः॥ बिल्वपत्रकरेधृत्वासुमुखादिततःस्मरेत्॥४४॥
देशाकालौचसंकीर्त्यशिवपूजनमारभेत्॥ शूद्रस्तुब्राह्मणद्वाराकृत्वावैशिवंय
जेत्॥४५॥ अन्यथादुःखमाप्नोतिदेहद्रव्यादिसंभवं॥ दारिद्र्यमाप्नुयाच्छीघ्रंत
स्माच्छूद्रस्तुनस्पृशेत्॥४६॥ षडक्षरेणमंत्रेणद्विजःकुर्याच्छिवार्चनं॥ शूद्रेण
येक्रियतेविप्रैस्तत्पंचाक्षरसंभवं॥४७॥ पुराणोक्तैःपृथक्मंत्रैःपूजयेच्छिव
मादरात्॥ वेदोक्तैश्चविधानेनविप्राःकुर्युःशिवार्चनं॥४८॥ नर्मदायांसमु
द्भूतंबाणलिंगंतदुच्यते॥ वाणासुरेणतपसाप्रार्थितंलोकहेतवे॥४९॥ २९२
बाणलिंगंमहाश्रेष्ठंसर्वलिंगेभ्यएवच॥ ततोर्च्यंमुनिभिःसर्वैरिंद्राद्यैश्च
सुरोत्तमैः॥५०॥ चारणैःसिद्धगंधर्वैरप्सरोभिश्चपन्नगैः॥ मानवैश्चविशे

षेणनार्मदंलिंगमर्च्यते॥५१॥ तस्योपरिचयत्किंचिच्छिवमंत्रेणधीमता॥ तद
नंतफलंप्रोक्तंपुष्पंवाधान्यमेवच॥५२॥ उद्दिश्यमनसायंवैपुमान्स्थिरम
तिःशिवे॥ समर्प्यपुष्पधान्यादीन्तमाप्नोतिश्रद्धया॥५३॥ शिवपूजाविधौप्रो
क्ताबहवःपुष्पसंचयाः॥ तेषांकार्यपरत्वेनकार्यंशंभोःसमर्चनं॥५४॥ के
तकींचंपकंत्यक्त्वादुष्टंपुष्पादिकंतथा॥ सर्वैःसंपूजयेच्छंभुमुमाकांतसपु
त्रकं॥५५॥ सकामःसंख्ययाकुर्यात्पुष्पादीनांशिवार्चनं॥ निःकामोवासका
मोवाबिल्वैःसंपूजयेद्धरं॥५६॥ लक्ष्मीकामःसदाकुर्याल्लक्षबिल्वैःशिवार्चनं॥
॥पंचयुक्तंचसर्वत्रफलदायकमुच्यते॥५७॥ विद्याकामोजातिपुष्पैर्लक्षसं
ख्यैःसमर्चयेत्॥ पुत्रकामःसदाकुर्याद्दूर्वाभिःशिवपूजनं॥५८॥ आयुःकामी

श्लो॰ नीरैः कुर्याच्छंखवीपुष्पैः शिवार्चनं ॥ सेनापत्यस्वकामीतु धत्तूरकुसुमैः शिवं ॥६
२८३ ०॥ संपूज्य श्रद्धयानूनं सेनापत्यमवाप्नुयात् ॥ अगस्त्यपुष्पैः संपूज्य नरो भक्ति-
समन्वितः ॥६१॥ शंकरं पितॄणां सोपि कैलाशे कुरुते स्थितिं ॥ आयुःकामोपि-
वा कुर्यादागस्त्यैः शिवपूजनं ॥६२॥ बंधूकैः शिवपूजनमभ्यर्च्य सर्वज्ञो गान
वाप्नुयात् ॥ दर्भैः शिवं समभ्यर्च्य शत्रुक्षयमवाप्नुयात् ॥६३॥ तथा मरीचकैः शै-
वैवसार्वभौमं नयेत्क्षणात् ॥ पंचामृतेन संपूज्य सर्वसौख्यमवाप्नुयात् ॥६४॥
दुग्धेनायुश्च विपुलं दध्ना सौभाग्यमेव च ॥ घृतेन बलमाप्नोति मिष्टान्नं मधु- २८३
नार्चयेत् ॥६५॥ पुत्रं शर्करया चैव वंशापूतं च तथाप्नुयात् ॥ तिलैश्च प्राप्नुयाल्ल-
क्ष्मीयवैरायुष्यमेव च ॥६६॥ तांबूलैर्धनसामग्रीं गोधूमैः सर्वसंपदं ॥ मुद्गैर्म-

होदयं चैव कांगवैः कीर्तिमेव च ॥६७॥ चणकैः पशुसंघातं सप्तधान्यैः सुतो-
दयं ॥ माषैः शत्रुविनाशं च रोगनाशमवाप्नुयात् ॥६८॥ असितैर्वा सितैर्वापि
सिद्धार्थैर्योर्चयेद्धरं ॥ इहलोके त्रिवर्गं वै जित्वा चांते शिवं व्रजेत् ॥६९॥ समेतैः
सप्तधान्यैश्च राज्यं चैवाप्नुयान्नरः ॥ स्वर्णपुष्पैश्च साम्राज्यं मोक्षं च कमलब्रजैः
॥७०॥ कणवीरैर्जयः प्रोक्तो दुर्जयोपि नृणां हि यः ॥ यद्यदिष्टतमं लोके तत्तद्बिल्वै-
रवाप्नुयात् ॥७१॥ कस्तूर्यादिसुगंधेन तथा श्रीखंडकेसरैः ॥ पूजितः सर्वदा शंभु-
र्दद्यादात्मपदं मुदा ॥७२॥ आरक्तचंदनं चारुलिंगं येन शिवोपरि ॥ गजं संप्रा-
प्नुयाद्राजा वक्त्रभत्वं तथाप्नुयात् ॥७३॥ सितेन भस्मना शंभुं लेपयेद्भक्तिपू-
र्वकं ॥ स एव पुरुषः श्रेष्ठज्ञानमाप्नोति शंकरात् ॥७३॥ तुलसीमंजरीभिश्च ये चै

अलो॰ २९४ यंतीसदाशिवं॥अतुलंलभतेज्ञानंधनंचायुर्यशःसुतान्॥७४॥मुचकुंदेन
यःपूजांशंभवेकुरुतेमुदा॥सएवधनदेनैवतुल्यतांयातिसर्वथा॥७५॥माध
वीमल्लिकाभ्यांचयःपूजयतिशंकरं॥आयुरारोग्यमैश्वर्यंसंप्राप्नोतिनसंश
यः॥७६॥बकुलैःपूजयेद्यस्तुगावोदुह्यंतितद्गृहे॥सभायांविजयस्तस्यशता
युर्भवतिध्रुवं॥७७॥पुन्नागैरर्चयेद्यस्तुतस्यबुद्धिःस्थिराभवेत्॥आनृण्यंजा
यतेतस्यसर्वत्रविजयीभवेत्॥७८॥श्रीफलेनचयःपूजांकरोतिशंकरस्य
चेत्॥महागौरीप्रसादात्स्यंभवत्येवनसंशयः॥७९॥क्रमुकैःपूजनंशंभोर्यः २९४
करोतिनरोत्तमः॥अश्वास्तस्यगृहेनित्यंनृत्यंतिमंदिरेस्थिराः॥८०॥गोघृतेन
चदीपेनयःकरोतिशिवार्चनं॥देवानांसदृशंरूपंसप्राप्नोतिनसंशयः॥८१॥

गोस्तन्यात्पूजनंशंभोर्यःकरोतिमुदान्वितः॥षट्त्रिंशद्वर्षसाहस्रंनाकना
यकतांव्रजेत्॥८२॥धात्रीपुष्पैःसमभ्यर्च्यशंकरंसर्वशंकरैः॥सनरःपापम
ह्यभोगान्प्राप्यदिवंव्रजेत्॥८३॥पारिजातैःसमभ्यर्च्यमहादेवमुदान्वि
तः॥प्रसन्नःशंकरस्तस्यकैलासस्थानमादिशेत्॥८४॥एवंबहुविधंशंभोःपू
जनंविद्यतेनघाः॥तत्रसर्वत्रयजतःश्रद्धैवफलदायिनी॥८५॥नास्तिश्रद्धास
मल्लोकेकारणंशिवपूजने॥तस्माच्छ्रद्धायुतेस्वल्पंदत्तंशंभावनंतकं॥८६॥श्रद्ध
याधार्यतेधर्मःश्रद्धयाधार्यतेतपः॥श्रद्धयाधार्यतेपूजातस्माच्छ्रद्धागरीय
सी॥८७॥यद्दत्तंश्रद्धयाहीनंतपस्तप्तंहुतंचयत्॥तदेवविफलंसर्वंतामसैरू
पसेवितं॥८८॥तस्माद्धोमुनयःसर्वेशृणुध्वमेववचोधुना॥शंकरःसर्वदासेव्यः

श्लो. २९५ श्रद्धयास्थिरचेतसा॥८९॥तत्राहंवर्णयाम्येकमितिहासंपुरातनं॥वाराण
स्यांमहाराजःकाशीराजोभवत्पुरा॥९०॥विश्वनाथस्यपूजायांतस्यचित्तंच
लालसं॥प्रत्यहंदशसाहस्रैःस्वर्णजैर्यजतःशिवं॥९१॥लक्षसंख्याहितंका-
नांसपादान्नित्यमस्यवै॥अमात्यःकुरुतेनूनंशिवपूजनकर्मणि॥९२॥अ-
हंकारोमहानासीत्तस्यकाशीपतेऽन्वहं॥अहंकर्तास्मिपूजायामादृशोना-
स्तिपूजकः॥९३॥एवंप्रतिदिनंराजाहंकुरुस्मशिवार्चनं॥एवंचकुर्वतस्तस्य
बहुकालोन्वगात्किल॥९४॥एतस्मिन्नंतरेविप्रःकृष्णभक्तइतिश्रुतः॥गौ- २९५
तमस्यचशिष्योभूत्सर्वत्रसमदर्शनः॥९५॥निर्लोभीसदयःशांतःपरमार्थै-
कजीवनः॥गुरुभक्तिरतोनित्यंतथैवविष्णुपूजकः॥९६॥शिवभक्तिरतोनित्य

मभेदेनशिवाजयोः॥निर्धनःसत्यवादीचभिक्षाशीस्नानतत्परः॥९७॥गंगास्ना
नंचकुरुतेसंपूज्यमणिकर्णिकां॥यथाविधिंनजानातिश्रद्धावान्केवलंहिस
॥९८॥यथागुरुपरिःश्रद्धातथाविष्णुपरिध्रुवं॥तथाशंभुपरिश्रद्धावर्ततेत
स्यनित्यदा॥९९॥सविश्वनाथस्यचपूजनार्थंयत्किंचिदादायविलेपद्रव्यं॥
सतुविपाच्चःप्रययौसहर्षःयत्रास्तिविश्वेश्वरमादिदेवः॥१००॥सविश्वनाथं
प्रणिपत्यभक्त्यादृष्ट्वाचभांरंनृपपूजनोत्थं॥तत्रार्प्यशीघ्रंसचविष्णुभक्तोलिं
गस्थमर्चांजनितंहिसर्वं॥१॥विलोक्यपूजाविधिमस्यराज्ञःसुवर्णपुष्पाहित-
दिव्यकांतिं॥उवाचतत्यायहसन्महेशःकिमीदृशास्तेशिरसिभरोस्ति॥२॥
कृष्णभक्तउवाच॥॥नमस्तेनाथभगवान्करुणाकरईश्वर॥शिवशंकरसर्वा

ब्रह्मो० त्मन्पाहि लोकं भवार्णवात् ॥३॥ स्वर्णपुष्पैर्भवाः किं ते शोभाधिकं सदाशिव ॥
२९६ मदन्नपत्रचूर्णेन शोभा नाशोस्ति किं तव ॥४॥ किं ते पूर्णस्य नैवेद्यै राजदत्तैरनेक-
शः ॥ मस्तकं कागवीमुष्यात्त्वन्नो नास्ति महेश्वर ॥५॥ तद्वा जितैर्महेशाद्य किं ते तुष्टि-
र्भविष्यति ॥ मन्मुखाद्धूलनादेन तुष्टोन भवसे शिव ॥६॥ त्वं पूर्णोसि सदा नूनं
जीवमोक्षैककारणं ॥ किं ते पूजासहस्रेण किं ते ह्यस्तभोभरैः ॥७॥ किं ते गोकोटि-
दानेन पूर्णस्य परमस्य च ॥ न्यूनाधिकं न ते नाथ कर्त्तुं शक्तास्ति तत्खलु ॥८॥
॥सूत उवाच॥ एवमाभाष्य बहुधा कृष्णदासो महामनाः ॥ शिवस्य पूजनार्थाय २९६
निंबकाष्टं करे गृहीत ॥९॥ तुंबिपात्रेण चोत्साय जलधारां शिवोपरि ॥ चकार-
परया भक्त्या निंबकाष्टस्य तैललेपनं ॥१०॥ भिक्षान्नकणैः समभ्यर्च्य शंकरं सर्वे-

तो मुखं ॥ कृत्वा गल्लनिनादं च जगाम भवनं प्रति ॥११॥ एवं पूजाविधिं कृ-
त्वा कृष्णभक्ते गते सति ॥ सेवकाः काशिराजस्य समाजग्मुः शिवांतिकं ॥१२॥ अ-
दृष्ट्वा वैभवभक्तेन राज्ञः पूजा विनाशितां ॥ यानस्थितां क्षणं शंभोर्मस्तके रा-
राजवल्लभा ॥१३॥ राज्ञे निवेदयामासुः सर्वां कोस्ते हितैषिणः ॥ विनाशिता-
महापूजा स्वर्णपुष्पादिभिः कृता ॥१५॥ ॥काशिराजसेवका ऊचुः ॥ शृणु-
राजन्महान्यायं करोति शिवमंदिरे ॥ कृष्णभक्तास्ति कोप्यत्र श्रुतमस्मा-
भिरध्वनि ॥१६॥ तव पूजाविनाशं च करोत्यन्वहमेव सः ॥ क्षणेन मात्रं न सा-
तिष्ठेद्गल्लकनाबहुभिर्धनैः ॥१७॥ अन्यतो वर्त्तते विप्रः कृष्णभक्तो नृसंशयः ॥ त-
स्मात्तं दर्पहर्त्ता त्वमस्मिन्राष्ट्रे विराजसे ॥१८॥ ॥सूत उवाच॥ श्रुत्वैवं वचनं त-

दानरपतिःश्रीकाशिराजःक्षुधान्वितांगःशिवपूजनोद्यतमतिःसंदष्टदंतच्छदः
कोयंदुष्टतमोदरिद्रनिचयेनालिंगितोभूयसामांवेत्तिनदुराशयोस्यजगतःशा
स्तारमाद्यंनृपं॥१९॥येनेयंशिवमस्तकोपरिगतापूजाकृतापूजाकृतादूरत
स्तस्मात्त्वंममदेव्रातोऽशुभमतिंदूरीकरिकेष्वधुना॥गच्छध्वंद्रुतमेवसेवकगणाः
ःसंताड्यवाक्यादिभिस्त्वंदुष्टंममवाग्भासनादिममथोबध्यानयध्वंजधु॥२०॥इत्ये
वंजल्पमानस्यतस्यचास्तंगतोरविः॥प्रातःकालेसमुत्थायतद्गत्वाश्रुगताद्द्विजाः
॥२१॥यःशृणोतिनरोभक्त्यानितरांशिवपूजनं॥तस्यहस्तेऽचलालक्ष्मीर्मोक्षश्चा
युर्भवेध्रुवं॥२२॥श्रावणेतुविशेषेणयःकरोतिशिवार्चनं॥बिल्वैर्वातंडुलैर्वापिसं
ख्ययासशिवंव्रजेत्॥२४॥ब्रह्मणाविष्णुनावापितथेंद्रेणचवापुनः॥वर्षपुगेण

तत्पुण्यसंख्यांकर्तुंनशक्यते॥२५॥येनवैसंख्ययालिंगेधान्यमर्पितमादरात्॥
मासेनभस्मितत्पुण्यसंख्यावाण्याभवेन्नहि॥२६॥तस्मात्संख्यान्वितंधान्यंफलं
पत्रमथांबुवा॥अर्पितंशंभवेलिंगेतदनंतायकल्पते॥२७॥ ॥इतिश्रीस्कंदपुरा
णेवृहद्ब्रह्मोत्तरखंडेपूजाफलनिरूपणेद्विचत्वारिंशोऽध्यायः॥४२॥ ॥ऋषयऊ
चुः॥ ॥एतत्कथनःसाधोकाशिराजेनधीमता॥किंकृतंत्वागासनेतस्यपूजाये
नविनाशिता॥१॥सूतउवाच॥ ॥तद्गत्वास्त्वरयागत्वाशिवमंदिरमुत्तमं॥निली
यसंस्थिताःसर्वेकृष्णभक्तस्तदागतः॥२॥राज्ञश्चपूजनंपश्चात्मध्याह्नेप्रहरेस्व
रे॥विष्णुभक्तःसमायातोराज्ञःपूजार्पिताभुवि॥३॥स्वयंपूजांविधायाथयदान्नृ
पतिभक्तिमान्॥तदाकाशीश्वरंभक्त्यासमाजग्मुःससंभ्रमं॥४॥अहोदुष्टावि

ब्र॰सो॰ शेषज्ञः बालिशाधर्मदुर्भगा॥ नजानास्मिमहाद्रव्यैः कृतांपूजांनृपस्यतां॥५॥ दुश्च
२९८ नांशासनंराज्ञानक्रियेतेकथंभुवि॥ त्वमुन्मार्गेगतोचासित्वत्फलंप्राप्स्यसेधुना
॥६॥ अस्मिन्प्रशासतिकाशीशेनृणांचामोक्षगामिनां॥ निर्गच्छमंदिराछंभोः किम
र्थंकुरुतेमुदा॥७॥ इत्येवंलपमानानांतेषांवाक्यानिशास्त्रिणां॥ विगणय्यस्थि
तस्तत्रमृगवाचंयथाहरिः॥८॥ प्रत्युवाचमुदायुक्तोविष्णुभक्तः प्रतापवान्॥ रा
जभृत्यान्हतप्राज्ञान्चकारक्षणमात्रतः॥९॥ विष्णुभक्तउवाच॥ किंवोराज्ञा
कृतापूजातदहंकारमात्रतः॥ आगताः स्थाचमांयुयंनिषेद्धुंशिवपूजने॥१०॥ सा २९८
नुकिंप्रेयसीजाताराजपूजाशिवस्यवै॥ मत्पूजनंनजानातिशंकरोभक्तवत्सलः॥
११॥ तस्यकिंपूजयादुष्टामहत्यास्वर्णकल्पया॥ स्वल्पेनपूजनेनैवतस्यकिंस्याद्दरि

द्रता॥१२॥ सदापूर्णस्यतृप्तंतस्यसदाज्ञानघनस्यच॥ सनातनविभुतश्चसदापूज्य
स्यदैवतैः॥१३॥ परात्परस्वरूपस्यपरमात्मनईशितुः॥ हत्पतेः सर्वतत्वस्यचि
त्सुखास्यपरात्मनः॥१४॥ मायाधीशस्यजगतोधिपस्यचप्रजायते॥ काशीवि
श्वेश्वरस्यास्यनगर्यांकोन्यईश्वरः॥१५॥ शास्तायंविश्वनाथस्यदंडपाणिमहाभुज
ः॥ सेवकः सर्वदुष्टानांकाशीपूर्यामधिष्टितः॥१६॥ तस्माद्दत्वंराजानंकाशिराजंच
सेवकाः॥ विष्णुभक्तः करोत्येवंपूजानाशंचसर्वदा॥१७॥ इदंचापिप्रवक्तव्यंराज्ञे
नंहिसेवकाः॥ प्रसन्नंकुरुकाशीशमध्वरैर्बहुभिर्द्रुतं॥१८॥ ममदारिद्र्ययुक्त
स्यकुतोद्रव्यसमागमः॥ जानातिशंकरः साक्षाद्धनहीनंचमांसदा॥१९॥ शिव
स्यमस्तकेपूजाक्षणमात्रंनतिष्टति॥ स्वल्पावाप्यधिकाद्रव्यैःसहतेनसदाशि

ब्र॰खं॰ २९९ वः॥२०॥ तस्मान्मयासमुत्तीर्यपूजाभारंनृपकृतं॥ यथाविभवसारेणक्रि
यतेशिवपूजनं॥२१॥ कर्त्ताहरोहरोदाताहरोहर्त्ताचपालकः॥ माताधाता
विधाताचसर्वेषांजननंगतांध्रुवं॥२२॥ यदिपूजाविधौराज्ञोममत्वंवर्त्ततेह
दि॥ सदाप्रवृत्तस्तंतानेयोमहायज्ञादिसाधनैः॥२३॥ राजादानैःप्रजाःस्नानैर्वि
प्रामंत्रैर्विशेषतः॥ रंकानमनमात्रेणपूजयन्शिवसन्निधौ॥२४॥ तस्माज
द्धिमधुनाराजसम्मनिमाचिरं॥ निवेद्यवचनंतस्मैयज्ञावितंडविष्यति॥२५॥
इत्याकर्ण्यवचोविप्राःसेवकास्तेययुःक्षणात्॥ काशिराजंनिवेद्येनतंसंस्थिताः
स्वगृहंप्रति॥२६॥ काशिराजस्तदाकर्ण्यरथमास्थायसत्वरः॥ तत्राजगामयत्रा २९९
स्तेविष्णुभक्तःशिवांतिके॥२७॥ रथादुत्तीर्यतरसाआरुह्यशिबिकांततः॥ मार्गेग

च्छतिकाशीशोविष्णुदासोपिसंगतः॥२८॥ सेवकैर्दर्शितःसोयंतवपूजाविधात
कः॥ आगतःदुष्टदेहोसौतुंबिपात्रकरेवहन्॥२९॥ राजातंप्रत्युवाचेदंरेरेमुर्ख
द्विजाधम॥ कथंमत्पूजनंदुष्टनाशितंशिवमस्तकात्॥३०॥ याकृतास्वर्णर
त्नेणसाकथंनाशिताधम॥ तवदारिद्र्ययुक्तस्यस्वर्णैःकिंभवतीदृशी॥३१॥
प्रतिज्ञांकुरुदुष्टात्मन्यदित्वंमवपूजकः॥ आदौत्वंवाथमाचादौशिवःसाक्षा
द्भवेद्यदि॥३२॥ प्रतिज्ञातंमयात्वद्यशिवःसाक्षान्मदर्चनात्॥ भविष्यतिप्रस
न्नोसौतावद्यज्ञैर्यजाम्यहं॥३३॥ त्वमपिद्रुतमेतद्धिकुरुचेद्भक्तिरस्तिते॥ नोचे
द्गच्छपयोदृष्टेर्ममाकुरुचापलं॥३४॥ सूत उवाच॥ एवंश्रुत्वावचोराज्ञोविष्णु
भक्तोतिरोषवान्॥ बभाषेप्रतिराजानंहस्तमुत्क्षिप्यसादरं॥३५॥ शिविकेयंन

पाभातिशाबुवाहिनीकायया॥ शांबूवहंतिचत्वारस्तथात्वांहिवहंतिमे॥३६॥ शाबो
नवदतीवाक्यंवदसित्वंयथानृप॥ मिथ्योक्तंवचनंसाधोशाबवाक्यंहितद्भवेत्
॥३७॥ शावस्पर्शोनकर्त्तव्यस्तद्वत्तवचसांमया॥ वक्तवंशानिबद्धेयंशिबिकायंवि
शोषकः॥३८॥ त्वंमांकिंनिंद्यसेराजन्राजाभूत्वानराधम॥ त्वयायच्चप्रतिज्ञातं
सांबशंकरतोषणे॥३९॥ मयापितत्प्रतिज्ञातंगच्छामिशिवमंदिरं॥ त्वमपिगच्छरा
जेंद्रकुरुयज्ञाद्द्विजेरितान्॥४०॥ इत्युक्त्वासगतोनूनंविष्णुभक्तःशिवांतिके॥ उप
वासान्चकारासौनित्यंपूजाविधायच॥४१॥ काशिराजोपिनिलयेस्वेचकारमहा
मखान्॥ समाहूयमहाविप्रान्यज्ञज्ञान्विजितेंद्रियान्॥४२॥ एवंसप्तदिनान्या
सन्तयोरर्चयतोःशिवं॥ विष्णुभक्तस्यसंभूतंह्युपवासाष्टकंमुदा॥४३॥ नवमे

दिवसेज्ञातंगौतमेनमहर्षिणा॥ आहूयविष्णुभक्तंतंप्रत्युवाचाथगौतमः॥४४॥ ह
ठात्कारस्त्वयाशंभुर्वशंपकस्यभवेदिह॥ नकार्याहंकृतिःशंभोसर्वदाहिमुमुक्षु
णा॥४५॥ यथामिलितसंभारैःशिवंसंपूज्यसादरं॥ संतुष्टःसततंभूयाद्यदिक
ल्याणमात्मनः॥४६॥ उपवासंपरित्यज्यपुष्पैर्धान्यफलैःशिवं॥ समर्चययथाबु
द्धिशिवस्तेनास्तिसौम्यभाक्॥४७॥ ॥विष्णुभक्तउवाच॥ ॥ बाढमुक्तंत्वयाहंवैक
रिष्येवचनात्तव॥ त्वय्येवप्रसन्नेविष्णुःचशंभुर्मेस्तिदयापरः॥४८॥ ततोभिक्षाटणं
कृत्वाभैक्ष्यमादायसत्वरं॥ नैवेद्यार्थंशिवस्यातेचकारांतर्पटंयदा॥४९॥ तदावि
प्ररूपश्रीशंभुर्भैक्ष्यंभुक्त्वाहिसत्वरं॥ अंतर्दधेमहालिंगेसोत्रजग्धासपात्रकं॥५०॥
अंतर्पटंकृतेहूरंस्यानेदृष्टंनकिंचन॥ उत्थायचहसन्भक्तोप्रोवाचसःकृतांजलिः

॥५१॥ धन्योस्मि भगवन् शंभो येनाहं त्वं सपात्रकं ॥ भक्ष्यं भक्षितवान्नाथ सनासना
योहं कृतस्त्वया ॥५२॥ उपोषितोपि विकृतं न प्राप भक्तिमान्यतः ॥ एवं दिनत्रयं
जातं भैक्ष्यं भक्षति शंकरे ॥५३॥ चतुर्थे दिवसे शंभुः पुनरेव समागतः ॥ दधिपात्रं
विहाय शेशो ह्यंतर्द्धिमापतत्क्षणे ॥५४॥ विष्णुभक्तेन वै तत्र गच्छन् दृष्टः शिवस्तदा ॥ द
धिपात्रं करे धृत्वा दृष्ट्वा गाढ्वाक्यमुच्चरन् ॥५५॥ दधिभांडं त्वया नाथ कस्मात्यक्तं कृ
पालुना ॥ इत्युक्ते वचने तेन वृक्षे च स्वान शंकरः ॥५६॥ स्वजनात्पतितः शंभुस्त
दा भक्तः समागतः ॥ उत्थापितश्च तेनासौ शिवो विष्णुरभूत्क्षणात् ॥५७॥ विष्णुरू
पेण तं भक्तमालिलिंग स्वयं हरः ॥ चतुर्भुजो गदापद्मशंखचक्रधरो हरिः ॥५८॥
वरं वृणीष्व भद्रं ते विष्णुरूपोस्म्यहं शिवः ॥ विष्णुनाथ इति ख्यातो विष्णुमे हृदये

स्थितः ॥५९॥ विष्णुपूजा कृता येन तेनाहं पूजितः सदा ॥ मत्पूजा च कृता येन तेन
विष्णुर्हि पूजितः ॥६०॥ उभयोरंतरं नास्ति मम विष्णोर्विधेरपि ॥ तस्माद्वरं वृणीष्व
दै देवानामपि दुर्लभं ॥६१॥ ॥ विष्णुभक्त उवाच ॥ ॥ नमः सहस्रशीर्षाय नमः पा
दसहस्रिणे ॥ नमः आख्यासहस्रिणे ॥६२॥ विष्णवे शंभवे तुभ्यमनंताय नमो न
मः ॥ नमो लक्ष्मीपते तुभ्यं गिरिजाकांत ते नमः ॥६३॥ वराणामिह दातारौ त्रातारौ
च भवार्णवात् ॥ युवामेव न संदेहः परं तु याचयाम्यदः ॥६४॥ मम हृत्स्थं न जाना
सि सर्वेषां हृदि संस्थितः ॥ मम योग्यं यद्दात्यत्र तत्कुरुष्व जगत्प्रभो ॥६५॥ इत्युक्त
वति वस्मिन्वै विमानं गरुडान्वितं ॥ आजगाम ततस्तस्मिन्नारुरोह स भक्तिमान् ॥६
६॥ तद्विमानं गतं यत्र काशिराट् यजते शिवे ॥ जयशब्दं तदा कृत्वा विमानस्थं स्वमं

श्लो० रूपे॥६७॥ विष्णुभक्तो गतो नूनं शंभोः कैलासवर्त्मना॥ इत्येवं तप्यमानश्च वैराग्य
३०२ मुपजग्मिवान्॥६८॥ स सौधभवने स्थित्वा कांतामाहूय सत्वरः॥ उवाच वचनं राज
रोषाकुलदया गिरा॥६९॥ काशिराज उवाच॥ शृणु कांते परं गुह्यमस्मच्चित्तं गतं
सुदा॥ मदङ्गं गतमेवास्ति तस्मात्तु ह्यं वदामि ते॥७०॥ यदर्थं क्रियते यज्ञो मया पू
जान्वहं प्रिये॥ तेनाहं वंचितोस्म्यद्य विष्णुभक्तः प्रसादनात्॥७१॥ स्वर्गतो विष्णुभ
क्तोयमादौ शिवसमर्चनात्॥ य आधुनीक आम्नाय मिति ज्ञातं शिवेन हि॥७२॥ द
शसाहस्रवर्षाणि मम जातानि शूलिनः॥ पूजनेन न चासौ म्यदृष्ट्यावलोकते ३०२
॥७३॥ मम माता पिता शंभोरधिको न तथा सुतः॥ तत्कृते सर्वसामग्री राज्यास्य
मम वर्त्तते॥७४॥ शुभं धान्यं शुभं वस्त्रं शुभं पुष्पं तथा फलं॥ श्रीखंडं केसरं च

कुंकुमं मालाथ राजती॥७५॥ कस्तूरी शर्करा चारु वितानं मणिमंडितं॥ ध्वजा
पताकाः सौवर्णाः कलशाः पात्रसंचयः॥७६॥ गावो महिष्यः सदुग्धा अश्वा मातं
गा राजयः॥ रथाः पदातयः सर्वे दासदासीजनास्तथा॥७७॥ छत्रं चामरयोर्युग्
मं वालव्यजनमेव च॥ पादुके हेमखचिते तथा मौक्तिकमालिका॥७८॥ भूषणे
षु च यच्चारु वस्त्रेषु च गृहेषु च॥ उद्यानेषु च यच्चारु तथा गिरिवनादिषु॥७९
॥ त्रैलोक्येषु च यच्चारु तदहं चेतसा स्मरन्॥ समर्पयिष्ये भर्गाय शंभवे सांबरू
पिणे॥८०॥ मत्समो नास्ति श्रीशंभोः पूजकोत्रेति चिंतयन्॥ तेनाहंकारमात्रेण
किं न शंभुः प्रसीदति॥८१॥ तस्मादहं प्रवक्ष्यामि यज्ञेस्मिन् जातवेदसं॥ ज्वाला
कुलं महादीप्तं हुते न द्विजपुंगवैः॥८२॥ राज्यं ददामि पुत्राय सुकुमाराय तेन घे

सहचारिणि मे भूयाय दिष्टा तव वर्त्तते॥ सर्वथास्मिन्महायज्ञे पतिष्येहं न सं
शयः॥ अपमानेन यो जीवेत्स एव पुरुषाधमः॥८४॥ इत्युक्त्वा तूष्णीमासीनेन नृ
पेतत्र च तत्प्रिया॥ प्रत्युवाच विचार्यैवं हृद्रा कमलमालिनी॥८५॥ कमलमा
लिन्युवाच॥ राजन्शृणु वचो मह्यमहं दास्यस्मि ते नृप॥ परंतु मम पुत्रोस्ति
मात्रो द्वितीयकः॥८६॥ तत्रासक्तिर्मम विभो महती वै वर्त्ततेधुना॥ त्वय्य प्रति
माशीति मम नाथ न संशयः॥८७॥ स्यातुं गंतुं न चेच्छामि सती दक्षं यथा शिवं॥ य
थात्वं वदसे राजन्तत्करोमि न चान्यथा॥८८॥ इति प्रियाया वचनं निशम्य काशी
पतिः स्वार्थपरं विदित्वा॥ आहूय चान्यां ललनामुवाच साप्येवमेवं वचनं जगाद॥
॥८९॥ तथा तृतीयां वचतुर्थी मेणी दृष्टं तथा पंचमिमा महाराजा॥ षष्ठीं तया सप्त

९५ मिकां च बालां सासप्तमी भूपमुवाच युक्तं॥९०॥ हे नाथ मां शीघ्रमितो नय त्वं यत्रा
स्ति यज्ञो मुनिभिर्व्रतो सौ॥ अहं प्रवक्ष्यामि सह त्वयैवं बाला न पत्यास्मि वधूत्व
हीया॥९१॥ किं जीवितं मे त्वयि संस्थिते त्र भोगेन किं मे महदादरेण॥ धन्यास्म्यह
ते चरणारविंदं द्रक्ष्येयतो वैगमनं त्वदीयं॥९२॥ पिता न माता न च बंधुव
र्गेत्रातुं क्षमो मे न तवा त्रवर्गाः॥ मृतेः स्वपत्यौ कुलजांगनाया न कोपि रक्षां वि
धये समर्थः॥९३॥ इत्थं नृपस्तद्वारुंक र्ण्य योषिद्वाकं सुधोपमं॥ स्नात्वा शीघ्रं ग
तो राजा लघुभार्यासमन्वितः॥९४॥ प्रणम्य च ऋत्विजां सर्वे तत्पूजां विनिवर्त्य च
॥ प्रतिपूजां गृहीत्वा सो सफलः सह भार्यया॥९५॥ बध्वांजलिनेनां च— मेणि दृष्टे दे
षं च दोषाप्रतिगृह्य पत्न्याः॥ सम्यक् समं कुंड तले ध्वरस्य पपात कांतासहिते

ब्रसो.
३०४

नृपोग्रे॥९६॥अज्ञानपातंनृपतिंसहस्रास्तथाद्विजोलोकगणाश्चसर्वे॥हाहेति
वाक्यंविकलेंद्रियास्तेप्रोचुस्तदाशंभुरिहाविरासीत्॥९७॥श्रीपार्वतीशःकरु
णाकरोसौसांबोथयज्ञोत्रमकंडवत्त्री॥भुजैरनेकैःपतितंसकांतंजग्राहराजा
नमदग्धदेहं॥९८॥मामेतिरोषाद्भुवनैकनाथंप्रतीश्वरंवाक्यमुदाहरंतं॥तंका
शिराजंप्रतिगृह्यहस्तैःसांबःशिवोवाक्यमुदाजहार॥९९॥सांबशिवउवाच॥
हेराजन्यकुलावतंससहसामाकार्षीरेवंहठंसंज्ञातोहमिहत्वयामलधियावै ३०४
राग्यसंशुद्धया॥एकेनैवमुहूर्त्तकेनमनसाध्यातोस्म्यहंकेवलंतेनैवात्रसहाव
यातवतनुत्राणायचाद्यागतः॥१००॥मद्भक्तोसिमदर्चनैकनिपुणोलोकप्रति·
ष्ठाकृतेत्वंमांस्वर्णसुवर्णपुष्पनिचयैराराधसेकेवलं॥तस्मादत्रविलंबमेवकृ

तवान्साहंकृतोयत्रयैमद्भक्तैःप्रभवेनचार्त्रिलवंलेशोयंममैवाग्रहः॥१॥
अंबयातेधृतावाचात्वंधृतोसिकरैर्मया॥अतःकिंपरमंदुःखंजातोस्म्यग्नि
मुखान्नृप॥२॥त्वंवरंवरयाद्ययत्तेमनसिवर्त्तते॥अदेयमपिदास्यामि
यतस्त्वंभक्तिमान्मयि॥३॥मुहूर्त्तमात्रमधुनास्मृतोहंचेतसात्वया॥सांब
स्तेनसमायातस्तुभ्यंदातुंयथेप्सितं॥४॥साहंकारेणराजेंद्रनकर्त्तव्यंमद
र्चनं॥येनेदृशीव्यथाजाताचेतसितवमानद॥५॥राजोवाच॥नतोस्मि·
तेनाथपदारविंदंवंद्यंमुनींद्रैरखिलैःसुरेंद्रैः॥नागैर्नगेंद्रैरपिसिद्धसाध्य
गंधर्वराजन्यकुलैश्चयक्षैः॥६॥तवपूजानजानामितथाभक्तिंमहेश्वर॥ऽ
एतदेवात्रजानामित्वंत्रातासिमृडप्रभो॥७॥साहंकारेणयद्द्रव्यंपुष्पप

श्लो० ३०५

त्रंफलंपृय॥ तदस्तुनिरहंकारंत्वत्प्रसादात्सदाशिव॥ १०८॥ अतः परंचयद्यो
ग्यंममास्तिभवसांप्रतं॥ तत्कुरुत्वंमहादेवयतोसिभक्तवत्सलः॥ १०९॥ सूत
उवाच॥ एवमुक्तवतितस्मिन्कृपालोसौमहेश्वरः॥ आहूयनंदिनंहृष्टः प्रो
वाचांबिकयासह॥ ११०॥ आनयाशुमहद्दिव्यंविमानंचत्वरान्वितं॥ तत्रामुंवैश्य
राजानंकैलाशंनयमाचिरं॥ १११॥ इतिशिववचनंनिशाम्यनंदीशुभतरमाशु
विमानमानिनाय॥ नृपवरमधिवेश्यजातहर्षोशिवसदनंप्रतिपन्नवान्मुरु ३०५
पं॥ ११२॥ शंभुरपिसहांबोसोयज्ञस्थानद्विजपुंगवान्॥ वरान्दत्वारुद्रकुंभे
ष्वंतर्द्धानमवापह॥ ११३॥ एवंबहुविधाःशंभोःपूजाप्रोक्तामुनीश्वरैः॥ श्रद्धा
याःकारणंविप्राःसर्वत्रशुभकर्मणि॥ ११४॥ विमानंविष्णुरूपधरस्यहि॥ यतो

गच्छतितत्रैवकाशीशःप्रापतत्क्षणात्॥ ११५॥ समकालंगतौद्वौतौविष्णुभक्तनृ
पौतदा॥ कैलाशंगतवान्राजावैकुंठंवैष्णवोत्तमः॥ ११६॥ शिवस्यचरितंविप्राः
महाकौतुककारकं॥ श्रुतंभवद्भिरधुनाकिमिच्छास्त्यपरानघाः॥ ११७॥ सोहंव
क्ष्यामियत्नेनव्यासमुखात्छ्रुतं॥ अष्टादशपुराणानिसेतिहासानिसर्व
शः॥ ११८॥ ऋषयऊचुः॥ एतच्छ्रुत्वावणजंपुण्यवद्वेदविदांवर॥ परेषांरु
चयेतातयुष्माभिर्ज्ञातव्यासतः॥ ११९॥ श्रवणस्यफलंज्ञात्वातेसर्वोयत्नंकरोति
हि॥ शर्कराभक्षणंयेनकृतंतांसंत्यजेत्कथं॥ १२०॥ स्वरूप्यावस्त्रमादत्तेऽस्त्रंध
नपात्रमेवच॥ तत्तुक्षयिष्णुलोकेचनक्षयिष्णुकथाश्रवः॥ १२१॥ फलश्रुतिंनरो
ज्ञात्वायत्नंयत्नंकरोतिसः॥ ज्ञानंप्राप्यततःसोपिमुच्यतेचरणत्रयात्॥ १२२॥

श्लो॰ तस्मात्कथयभोसूतरूच्यर्थंजगतांफलं॥यस्यश्रवणमात्रेणशिवःसंनिर
३०६ धिमाप्नुयात्॥२३॥सूतउवाच॥दत्वादानानिबहुशःकृत्वायज्ञाननेकशः
॥यत्पुण्यंलभतेमर्त्यैस्तदेवश्रवणाद्ध्रुवं॥२४॥सदृष्टःकालसर्पेणसर्वदा
मृत्युनास्फुटं॥समुक्तःपरिसत्येनयेनैतच्छ्रुतंयदि॥२५॥सर्वतीर्थेषुसः
स्नातःसर्वयात्राकरश्चसः॥मणिकर्ण्यांतुसस्नातोयेनैतच्छ्रुतंयदा॥२६॥त
प्त्वातपांसिचोग्राणिप्राप्यतेयन्महत्फलं॥श्रवणादस्यशास्त्रस्यतत्फलंप्राप्नु
यान्नरः॥२७॥अधीत्यचतुरोवेदान्सांगान्यत्फलमाप्यते॥इमंग्रंथंसमाक ३०६
र्ण्यतत्फलंलभतेनरैः॥२८॥गयायांश्राद्धदानाच्चयथातृप्यंतिपूर्वजाः॥तथैव
श्रवणान्नॄणांतृप्यंतिपितामहाः॥२९॥तेश्रुतसर्वपुराणानिश्रुतानिस्थिरबुद्धिभि

भिः॥एतद्येनश्रुतंविप्रास्तेषांमुक्तिर्नसंशयः॥३०॥श्रुतानितेनधर्म्माणिधर्मशास्त्र
स्त्राण्यनेकशः॥महाधर्मैकजननंमहार्थप्रतिपादकं॥३१॥प्रीणंत्यमर्त्याःसर्वेपि
ब्रह्मविष्णुःशिवादयः॥मुनयःपरिमोदंतेमार्द्यंतिसनकादयः॥३२॥नकश्चित्तत्र
प्रभवेदमंगलसमुद्भवः॥यश्चेदंशृणुयान्मर्त्योयश्चेदंश्रावयेत्सुधी॥३३॥दरिद्री
लभतेद्रव्यंकामिकामानवाप्नुयात्॥धर्मीधर्ममवाप्नोतिश्रुत्वैतन्नात्रसंशयः
॥३४॥वंध्यास्त्रीलभतेपुत्रमंतेशिवपुरंव्रजेत्॥मोक्षार्थीचधनार्थीचसर्वेपिस
द्गतिंव्रजेत्॥३५॥इदमायुष्यमारोग्यमिदमेवपरंपदं॥इदमेवपरंज्ञानंश्रुतंये
नमहात्मना॥३६॥काशीवाससमंचैतन्नात्रकार्याविचारणात्॥३७॥ऋषयऊचुः॥
श्रुतंसर्वंमहाबुद्धेज्ञातंचसकलंहृदि॥काशीवाससमंचैतत्तस्मात्काशीफलंवदं

ब्र.खं. ॥१३॥ ॥इतिश्रीस्कंदपुराणेवृहद्ब्रह्मोत्तरखंडेकाशीश्वरकथानकेत्रिचत्वारिंश
३०९ तमोऽध्यायः॥४३॥ ॥संपूर्णं॥ ॥समाप्तं॥ ॥छ॥ ॥श्रीसदाशिवाय॥